ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ /1220/583/ છ, તા. 29/08/2020 - થી મંજૂર

# पौरोहित्यम्

## मध्यमा २

## ( ધોરણ 12 )

**प्रतिज्ञापत्रम्**

भारतं मम देश:।
सर्वे भारतीया: मम भ्रातर: भगिन्य: च सन्ति।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि।
प्रत्येकेन सह शिष्टव्यवहारं करिष्यामि।
अहं मम देशाय देशबान्धवेभ्य: च मम निष्ठाम् अर्पयामि।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति।

**मूल्य : ₹ 25.00**

नमसो मा ज्योतिर्गमय

**गुजरातराज्यशालापाठ्यपुस्तकमंडलम्**
**'विद्यायनम्', सेक्टर 10-ए, गान्धीनगरम् - 382010**

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकारा: गुजरातराज्यपाठ्यपुस्तकमण्डलहस्तका: सन्ति। अस्य पाठ्यपुस्तकस्य कश्चिदपि भाग: केनापि रुपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषयमार्गदर्शनम्**
पं. अनिलकुमार: जे. त्रिवेदी

**लेखनम्**
डॉ. अजयकुमार एन. भट्ट (कन्वीनर)
श्री. अशोककुमार एस. जोषी
श्री भद्रेशभाई टी. व्यास
डॉ. हितेशभाई बी. पाठक

**समीक्षणम्**
डॉ. हितेन्द्रभाई जी. व्यास
डॉ. चिंतनकुमार ह. दवे
श्री दिपकभाई बी. महेता
श्री पार्थ के. भट्ट
श्री बालकृष्ण दवे

**भाषाशुद्धि**
श्री अनीतकुमार श्रीवास्तव

**संयोजनम्**
डॉ. क्रिष्णा दवे
(विषय-संयोजक : अंग्रेजी)

**निर्माणायोजनम्**
श्री हरेन शाह
(उपनियामक : शैक्षणिक;)

**मुद्रणायोजनम्**
श्री हरेश एस. लीम्बाचीया
(उपनियामक : उत्पादन)

## प्रस्तावना

प्राच्यगुरुकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयो: अध्ययनाध्यापनयो: पद्धत्यो: समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमिति: (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिता: मानिता: च अभ्यासक्रमा: सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यताया: **मध्यमा 2 (कक्षा 12), पौरोहित्यम्** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञै: सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भि: सूचिता: सूचना: सादरं स्वीकरणीया: एव।।

**पी. भारती** (IAS)
नियामक: | कार्यवाहकप्रमुख:
ता. 26-10-2020 | गान्धीनगरम्

प्रथमावृत्ति : 2020
**प्रकाशक :** गुजरात राज्य शाला पाठ्यपुस्तक मण्डल, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रतिनिध्येन पी. भारती, नियामक:
**मुद्रक** :

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

(क) संविधानं प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

(ख) स्वातन्त्र्याय अस्माकंराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

(ग) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

(घ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धुत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

(ज) वनानां, तडागानां, नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

(झ) वैज्ञानकिमानसाय, मानवतावादाय, जिज्ञासायै भावनाभिगमाभिबोधः।

(ट) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६ तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

---

* भारतीय संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | |
|---|---|
| १. शिख्यादि-वास्तुमण्डलम् १ | 1 |
| २. शिख्यादि-वास्तुमण्डलम् २ | 10 |
| ३. शिख्यादि-वास्तुमण्डलम् ३ | 18 |
| ४. मण्डपप्रवेशः | 27 |
| ५. जलाधिवासः कुटिरहोमश्च | 36 |
| ६. जलयात्रा - शोभायात्रा | 43 |
| ७. स्नपनविधिः १ | 48 |
| ८. स्नपनविधिः २ | 53 |
| ९. अधिवासः-तत्त्वन्यासः | 60 |
| १०. मूर्तिमूर्तिपति लोकपालावाहनम् | 70 |
| ११. होमप्रकरणम् | 74 |
| १२. प्रासादस्नपनम्-प्रासादतत्त्वन्यासाश्च | 81 |
| १३. प्रासादपिण्डिकाधिवासः | 87 |
| १४. देवप्रबोधनम्-प्राणप्रतिष्ठा | 91 |
| १५. समावर्तनसंस्कारः | 96 |
| १६. विवाहसंस्कारः १ | 104 |
| १७. विवाहसंस्कारः २ | 110 |
| १८. विवाहसंस्कारः ३ | 120 |
| १९. अरणिमन्थनप्रयोगः | 125 |
| २०. कालसर्पप्रयोगः | 129 |
| २१. अर्कविवाहप्रयोगः | 137 |

# १ | शिख्यादि-वास्तुमण्डलम् १

**प्रस्तावना**

अस्माकं भारतीय-संस्कृतिः सम्पूर्णविश्वस्मिन् तस्य ज्ञानपरम्परायाः सांस्कृतिकजीवन-शैलीकारणात् विशेषं स्थानं महत्त्वं च भजते। चत्वारो वेदाः, उपनिषदः, धर्मशास्त्राणि च भारतीयसंस्कृतेः आधारस्तम्भरूपाः निखिलज्ञानराशयः च सन्ति। वेदेषु जीवने धर्मार्थकाममोक्षेति-चतुर्विधपुरुषार्थसिद्ध्यै यज्ञादीनां धार्मिकानुष्ठानविधीनां निरूपणं कृतं वर्तते।

तत्रापि वास्तुशास्त्रं विशेषं महत्त्वं भजते। गृहस्थजीवने सुखसमृद्धिप्राप्तिहेतवे मानवाः यज्ञयागाद्यनुष्ठानकर्मणि, नूतनगृहनिर्माणे, गृहप्रवेशे, भूमिपूजने, कूपखनने, शिलान्यासविधौ च वास्तुदेवतानां पूजनं कुर्वन्ति अर्थात् यः कोऽपि याज्ञिको विधिः भवेत् तत्र **वास्तुमण्डलदेवतानां** पूजनम् अनिवार्यं भवति।

तत्र **वास्तुपूजनं द्विधा भवति-**

**१. गृहवास्तुपूजनम्**

**२. मण्डपवास्तुपूजनम्**

**गृहवास्तुपूजने** १०-रेखाः ८१-पदानि च भवन्ति। ततः शिख्यादित्रिषष्टिः देवताः भवन्ति। ईशानकोणादारभ्य देवतास्थापनं भवति। उग्रसेनादयः चतुर्दशाधिकदेवताः भवन्ति। **मण्डपवास्तुपूजने** ०९-रेखाः ६४-पदानि च भवन्ति। ततः ब्रह्मादित्रिषष्टिः देवताः भवन्ति। हृदयमध्यभागादारभ्य देवतास्थापनं भवति।

अत्र वयं **गृहवास्तुपूजने** तदन्तर्गतम् **आहत्य ६३ शिख्यादिवास्तुमण्डलदेवतानां** पूजनं भवति। अतः अस्मिन् पाठ्यपुस्तके शिख्यादिवास्तुमण्डलदेवतानां **त्रिषु प्रकरणेषु प्रतिप्रकरणम्** एकविंशतिसंख्यायां (२१) क्रमशः आवाहन-पूजन-प्रतिष्ठापनविधिः च प्रस्तूयते।

प्रस्तुतेऽस्मिन् प्रथमपाठे एकविंशतिसंख्याकानां **वास्तुमण्डलदेवतानाम्** आवाहन-पूजन-प्रतिष्ठापनविधिं च ज्ञास्यामः।

---

सपत्नीको यजमानो मण्डपस्य नैर्ऋत्यकोणे कृतवास्तुपीठसमीपे पश्चिमाभिमुखः उपविश्य आचम्य प्राणानायम्य संकल्पं कुर्यात्-

**संकल्पः** - अद्य पूर्वोच्चारित शुभपुण्यतिथौ प्रारब्धस्य अमुकयागाख्यस्य कर्मणः सांगतासिद्ध्यर्थं भूमिशोधनार्थम् अष्टशल्यदोषनिवृत्त्यर्थम् एवं नानाविधजीवहिंसादिजन्यसकलदोषपरिहारार्थं चतुष्षष्टिपदे वास्तुपीठे शिख्यादिवास्तुमण्डलदेवतानाम् आवाहन-प्रतिष्ठा-पूजनम् अहं करिष्ये।

आदौ वास्तुपीठाग्नेय्यादिकोणेषु चतुरः शंकून् रोपयेत् -

**विशन्तु भूतले नागाः लोकपालाश्च सर्वतः।**
**मण्डपे चात्र तिष्ठन्तु ह्यायुर्बलकराः सदा ॥**

एवं चतुःषु कोणेषु शंकुरोपणं कृत्वा द्विगुणीकृतसूत्रेण सर्वेषां वेष्टनं कुर्यात्।

आग्नेय्यादि रोपणक्रमेण शंकूनां पार्श्वे माषभक्त-दध्योदनबलिदानम् -

**अग्निकोणशंकुसमीपे बलिं संस्थाप्य -**

ॐअग्निभ्योऽप्यथ सर्पेभ्यो ये चान्ये तान् समाश्रिताः।
बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम्॥

अग्नये नमः इमं बलिं समर्पयामि...।

**नैर्ऋत्यकोणशंकुसमीपे बलिं संस्थाप्य -**

ॐनैर्ऋत्याधिपतिश्चैव नैर्ऋत्यां ये च राक्षसाः।
बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम्॥

निर्ऋतये नमः इमं बलिं समर्पयामि...।

**वायव्यकोणशंकुसमीपे बलिं संस्थाप्य -**

ॐनमो वै वायुरक्षोभ्यो ये चान्ये तान् समाश्रिताः।
बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम्॥

वायवे नमः इमं बलिं समर्पयामि...।

**ऐशानकोणशंकुसमीपे बलिं संस्थाप्य -**

ॐरुद्रेभ्यश्चैव सर्पेभ्यो ये चान्ये तान् समाश्रिताः।
बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम्॥

ईशानाय नमः इमं बलिं समर्पयामि...। 'शंकुदेवताभ्यो नमः' इति नाम मात्रेण पंचोपचारैः पूजयेत्।

**अथ रेखाकरणं पूजनं च -**

वास्तुपीठे पीतवस्त्रं प्रसार्य कनकशलाकया रत्नेन रजतफलपुष्पाणामन्यतमेन वा पश्चिमारम्भाः प्रागन्ता उदकसंस्थाः समाद्व्यङ्गुलान्तरा नवरेखाः कुर्यात्। तद्यथा-

१. ॐलक्ष्म्यै नमः। २. ॐयशोवत्यै नमः। ३. ॐकान्तायै नमः।
४. ॐसुप्रियायै नमः। ५. ॐविमलायै नमः। ६. ॐशिवायै नमः।
७. ॐसुभगायै नमः। ८. ॐसुमत्यै नमः। ९. ॐइडायै नमः।

ततः दक्षिणारम्भाः उदगन्ताः प्राक्संस्थाः नवरेखाः कुर्यात्। तद्यथा -

१. ॐधन्यायै नमः। २. ॐप्राणायै नमः। ३. ॐविशालायै नमः।
४. ॐस्थिरायै नमः। ५. ॐभद्रायै नमः। ६. ॐजयायै नमः।
७. ॐनिशायै नमः। ८. ॐविरजायै नमः। ९. ॐविभावायै नमः।

ॐमनोजूति...० इति मन्त्रेण रेखादेवताः सुप्रतिष्ठिताः वरदाः भवत इति प्रतिष्ठाप्य 'ॐरेखादेवताभ्यो नमः' इति नाम मात्रेण पंचोपचारैः पूजयेत्।

ततः **वास्तुमण्डलदेवतास्थापन-प्रतिष्ठा-पूजनं** कुर्यात्-

तत्र मध्यगं पदचतुष्टयमेकीकृत्य तत्कोणचतुष्टयाद् बहिः कोणचतुष्टये रेखाभिः पदानि उत्कृत्य शिखादि पंचचत्वारिंशद्देवताः स्थापयेत्। यथा -

१. ऐशानकोणे अर्धपदे वास्तोः शिखी --

शिरसि भो शिखिन् ! इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः शिखिनम् आवाहयामि स्थापयामि -

**मन्त्रः - ॐ स नः पावक दीदिवोऽग्ने देवाँ२ इहावह।**
**उपयज्ञं॑ हविश्च नः। ( १७/१ )**

**भावार्थः** - हे पावक ! हे दीप्तिमन् ! हे अग्ने ! त्वं देवान् अस्मिन् यज्ञे आनय। तदनन्तरम् अस्माकं हविर्भूतान् पदार्थान् च देवान् प्रापय।

**श्लोकः - ह्रीं समाह्वयन्तं शिखिनं महोज्जवलं, मेषाधिरूढं सुरराजवन्दितम्।**
**त्रिशूलहस्तं वरदं महेशं भजामि देवं स्वकुलाभिवृद्ध्यै॥**

ऐशानकोणे अर्धपदे वास्तोः शिरसि **भो शिखिन् !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **शिखिने** नमः, **शिखिनम्** आवाहयामि स्थापयामि।

२. तद्दक्षिणसार्धपदे दक्षिणनेत्रे पर्जन्यः -

**मन्त्रः - ॐ निकामे निकामे नः पर्यन्यो वर्षतु फलवत्यो नऽ ओषधयः पच्यन्ताम्।**
**योगक्षेमो नः कल्पताम्। ( २२/२२ )**

**भावार्थः** - अस्माकं राष्ट्रे कामनायां सत्यां पर्जन्यः वृष्टिः नितरां भवतु, अस्माकम् ओषधयः स्वयमेव अतिशयेन फलयुक्ताः पक्वाः भवन्तु, अस्माकं योगक्षेमवहनं अर्थात् अप्राप्तस्य प्राप्तिः प्राप्तस्य च रक्षणं भवेत्।

**श्लोकः - एह्येहि जीमूतसुधाप्रवृष्टे चराचरैः सेवितधर्ममूर्ते।**

**पवित्र देवेश गृहाण पूजां ममाध्वरे पाहि भवन्नमस्ते॥**

**शिखिनः** दक्षिणसार्धपदे दक्षिणनेत्रे **भो पर्जन्य !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **पर्जन्याय** नमः, **पर्जन्यम्** आवाहयामि स्थापयामि।

३. तद्दक्षिणपदद्वये दक्षिणश्रोत्रे जयन्तः -

**मन्त्रः - ॐ मर्माणि ते वर्मणाच्छादयामि सोमस्त्वाराजामृतेनानुवस्ताम्।**

**उरोर्वरीयो व्वरुणस्ते कृणोतु जयन्तन्त्वानुदेवा मदन्तु। (१७/४९)**

**भावार्थः** - तव मर्मस्थलानि कवचेन आच्छाद्य रक्षामि, राजा सोमः त्वाम् अमृतेन रक्षतु, राजा वरुणः तव उरसः कवचं पृथोः अपि प्रथीयः करोतु, देवाः च विजयं प्राप्यमाणस्य तव उत्साहवर्धनं कुर्युः।

**श्लोकः - एह्येहि देवेश जयन्तसूनो शच्याः सदा सर्व सुखैकसेव्य।**

**पीठेऽत्र यज्ञेश गृहाणपूजां शिवाय नः पाहि भवन्नमस्ते॥**

**पर्जन्यस्य** दक्षिणपदद्वये दक्षिणश्रोत्रे **भो जयन्त !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः जयन्ताय नमः, जयन्तम् आवाहयामि स्थापयामि।

४. तद्दक्षिणपदद्वये दक्षिणांसे कुलिशायुधः -

**मन्त्रः - ॐ मरुत्वाँ२ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय।**

**आसिंचस्व जठरे मध्यऽ ऊर्मिम् त्व ꣳ राजासि प्रतिपत्सुतानाम्।**

**उपयाम गृहीतोऽसीन्द्राय त्वा मरुत्वतऽ एषते य्योनिरिन्द्राय त्वा मरुत्वते॥ (०७/३८)**

**भावार्थः** - मरुद्भिर्युक्त हे इन्द्र! अपां वर्षितारं, अन्तरिक्षस्थितं त्वां निवेदयामि यत् त्वं युद्धं करिष्यसि अतः मदवर्धनाय सोमं पिब, तदनन्तरं स्वधापुरोडाशादि-हविष्पदार्थांश्च भुङ्क्ष्व। मधुनः ऊर्मिम् उदरे धारय। त्वं हि प्रतिपदादि-तिथिषु अभिसुतानां सोमरसानां राजा असि। हे सोम! अहं त्वां मरुद्गणसहितस्य इन्द्रस्य कृते गृह्णामि। समरुदिन्द्राय अहं त्वां वेद्यां स्थापयामि।

**श्लोकः - एह्येहि वृत्रघ्न गजाधिरूढ सहस्त्रनेत्र त्रिदशैकराज।**

**शचीपते शक्र सुरेश नित्यं गृहाणपूजां भगवन्नमस्ते॥**

**जयन्तस्य** दक्षिणपदद्वये दक्षिणांसे **भो कुलिशायुध !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **कुलिशायुधाय** नमः, **कुलिशायुधम्** आवाहयामि स्थापयामि।

५. तद्दक्षिणपदद्वये दक्षिणबाहौ सूर्यः -

**मन्त्रः - ॐ आकृष्णेन रजसा व्वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च।**

**हिरण्ययेन सविता रथेना देवो य्योति भुवनानि पश्यन्॥ (३३/४३)**

**भावार्थः** - कृष्णप्रकाशेन सह सन्ततं भ्रममाणः देवादिकं मनुष्यादिकं च स्वस्वप्रदेशेषु स्थापयन् भुवनानि पश्यन् (साध्वसाधुचरितानि विचारयन्) देवः सविता हिरण्यमयेन रथेन आयाति।

**श्लोकः - समाह्वयन्तं द्विभुजं दिनेशं सप्ताश्ववाहं द्युमणिं ग्रहेशम्।**

**सिन्दूरवर्णं प्रतिभावसंभवं भजामि सूर्यं स्वकुलाभिवृद्धयै॥**

**कुलिशायुधस्य** दक्षिणपदद्वये दक्षिणबाहौ **भो सूर्य !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **सूर्याय** नमः, **सूर्यम्** आवाहयामि स्थापयामि।

६. तद्दक्षिणपदद्वये दक्षिणाग्रबाहौ सत्य –

**मन्त्रः – ॐ व्व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्।**

**दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते॥ (१९/३०)**

**भावार्थः** – व्रतेन दीक्षां प्राप्नोति, दीक्षया दक्षिणां प्राप्नोति, दक्षिणया (आस्तिक्यबुद्धिरूपाम्) श्रद्धां प्राप्नोति, श्रद्धया सत्यम् (तत्स्वरूपं ब्रह्म) प्राप्यते।

**श्लोकः – एह्येहि सत्येश महामहेश दुष्टान्तकृत् स्वच्छसुधर्ममूर्ते।**

**पीठेऽत्र देवेश गृहाण पूजां ममाध्वरं पाहि भवन्नमस्ते॥**

**सूर्यस्य** दक्षिणपदद्वये दक्षिणाग्रबाहौ **भो सत्य !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **सत्याय** नमः, **सत्यम्** आवाहयामि स्थापयामि।

७. तद्दक्षिणसार्धपदे दक्षिणकूर्परे भृशः –

**मन्त्रः – ॐ भायै दार्वाहार प्रभायाऽ अग्न्येधं ब्रघ्नस्य विष्टपायाभिषेक्तारं वर्षिष्ठाय नाकाय परिवेष्टारं देवलोकाय पेशितारं मनुष्यलोकाय प्रकरितारꣳ सर्व्वेभ्यो लोकेभ्यऽ उपसेक्तारमवऋत्यै वधायोपमन्थितारं मेधाय वासः पल्पूलीं प्रकामाय रजयित्रीम्॥ (३०/१२)**

**भावार्थः** – (पुरुषमेधान्तर्गतं चतुर्थे यूपे के बद्धाः भवन्त्विति निर्दिशति।) इन्धनार्थं काष्ठहारकं, सूर्यलोकाय अभिषेक्तारं, उत्तमाय स्वर्गाय परिवेषकं, देवलोकाय पेशितारं, मनुष्यलोकाय विक्षेप्तारं, सर्वेभ्यो लोकेभ्यः उपसेचनकर्त्तारं, वधाय उपमन्थनकर्त्तारं, मेधाय वाससां प्रक्षालनकर्त्तारं बध्नीयात्॥

**श्लोकः – समाह्वयन्तं द्विभुजं भृशं हि नीलोत्पलाभासविशालनेत्रम्।**

**नीलाद्रिवर्णं प्रतिभावभासं भजामि देवं कुलवृद्धिहेतोः॥**

**सत्यस्य** दक्षिणसार्धपदे दक्षिणकूर्परे **भो भृश !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **भृशाय** नमः, **भृशम्** आवाहयामि स्थापयामि।

८. तद्दक्षिणसार्धपदे दक्षिणाग्नेयकोणोत्तरार्द्धपदे आकाशम् –

**मन्त्रः – ॐघृतं घृतपावानः पिबतव्वसां व्वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा।**

**दिशः प्प्रदिशऽ आदिशो व्विदिशऽ उद्दिशो दिग्भ्यः स्वाहा॥ (०६/१९)**

**भावार्थः** – हे घृतपावानः देवाः! यूयं घृतं पिबत। हे वसे! त्वम् अन्तरिक्षस्य हविः असि (तव) सुहुतम् अस्तु। दिग्भ्यः, प्रदिग्भ्यः, आदिग्भ्यः, विदिग्भ्यः, उद्दिग्भ्यः च इदं वसाज्यम् आहुतमस्तु॥

**श्लोकः – समाह्वयन्तं गगनं दिवौकसां निवासभूतं सुविनिर्मलं च।**

**आरक्तहीनं रुचिरं पुराणं भजामि नाथं स्वकुलाभिवृद्धयै॥**

**भृशस्य** दक्षिणार्धपदे **भो आकाश !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **आकाशाय** नमः, **आकाशम्** आवाहयामि स्थापयामि।

९. आकाशस्य पश्चिमे अर्धपदे दक्षिणाग्नेयकोणदक्षिणार्धपदे वायुः –

**मन्त्रः – ॐआ नो नियुद्भिः शतिनीभिरध्वरꣳ सहस्त्रिणीभिरुपयाहि य्यज्ञम्।**

**त्वयोऽ अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः॥ (२७/२८)**

**भावार्थः** – शतं सहस्रं च संख्या ताभिः अश्वाभिः अस्माकं यज्ञम् आगच्छ। हे वायो! त्वम् अस्मिन् तृतीये सवने तृप्यस्व। हे देवाः! यूयं सुवचोभिः सदा अस्मान् रक्षत॥

**श्लोकः – धूम्राह्वयं गन्धवहं सुरम्यं मृगाधिरूढं त्रिदशैकवन्द्यम्।**

**सुपूजकानन्दकरं पुराणं भजामि वायुं स्वकुलाभिवृद्धयै॥**

**आकाशस्य** पश्चिमे अर्धपदे **भो वायो !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **वायवे** नमः, **वायुम्** आवाहयामि स्थापयामि।

१०. तत्पश्चिमे सार्धपदे दक्षिणमणिबन्धे पूषा -

**मन्त्रः - ॐपूषन्तव व्रते व्वयं न रिष्येम कदाचन।**

**स्तोतारस्तऽ इह स्मसि॥ ( ३४/४१ )**

**भावार्थः** - हे पूषन्! तव कर्मणि वर्त्तमाना वयं कदापि न विनश्येम। किं च यज्ञे तव स्तुतिकर्त्तारः वयं! यूयं भवामः॥

**श्लोकः - एह्येहि पूषन् सुविचारदक्ष हयाधिरूढाखिलधर्ममूर्ते।**

**पीठेऽत्र देवेश गृहाण पूजां शिवाय नः पाहि भवन्नमस्ते॥**

**वायोः** पश्चिमे सार्धपदे दक्षिणमणिबन्धे **भो पूषन् !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **पूष्णे** नमः, **पूषाणम्** आवाहयामि स्थापयामि।

११. तत्पश्चिमे पदद्वये दक्षिणपार्श्वे वितथः -

**मन्त्रः - ॐविदद्यदी सरमा रुग्णमद्रेर्महि पाथः पूर्व्यꣳ सध्र्यक्कः।**

**अग्नं नयत्सुपद्यक्षराणआमच्छा रवं प्रथमा जानती गात्॥ ( ३३/४१ )**

**भावार्थः** - यदि सरमा देवशुनी इन्द्रेण वान्वेषणाय प्रेषिता सती यदा गिरेः भग्नं द्वारम् अविदत् तदा इन्द्रः हविरन्नं तस्यै दत्तवान्। ततः शोभनपादयुक्ता सा नाशरहितानां गावम् अग्रं प्रान्तं प्राप्नोत्। प्रथमं गवां रवं जानन्ती सा गवामभिमुखमगात्॥

**श्लोकः - समाह्वयन्तं वितथं विशालं सुपूजकानन्दकरं वरेण्यम्।**

**त्रिशूलहस्तं मकराधिरूढं भजामि देवं कमलायताक्षम्॥**

**पूष्णः** पश्चिमे दक्षिणपार्श्वे **भो वितथ !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **वितथाय** नमः, **वितथम्** आवाहयामि स्थापयामि।

१२. तत्पश्चिमे पदद्वये दक्षिणपार्श्वे गृहक्षतः -

**मन्त्रः - ॐगृहा मा बिभीत मा व्वेपध्वमूर्जं बिभ्रतऽ एमसि।**

**ऊर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानैमि मनसा मोदमानः॥ ( ०३/४१ )**

**भावार्थः** - हे गृहस्थाः! भयं नानुभवन्तु, कम्पनं मुंचन्तु। यतः वयं अन्नं धारयाणान् अनुपक्षीणान् भवतः पार्श्वे आगताः स्मः। किं च अहमपि अन्नं धारयन् युष्मान् प्रति शोभनचेताः सुप्रज्ञः सन् आनन्दम् अनुभवन् गृहस्थान् प्रत्यागच्छामि॥

**श्लोकः - एह्येहि लोकेश्वर दिव्यमूर्ते गृहक्षत त्वं कनकाद्रिरूप।**

**पीठेऽत्र देवेश गृहाण पूजां रक्षाध्वरन्नो भगवन्नमस्ते॥**

**वितथस्य** पश्चिमे पदद्वये दक्षिणपार्श्वे **भो गृहक्षत !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **गृहक्षताय** नमः, **गृहक्षतम्** आवाहयामि स्थापयामि।

१३. तत्पश्चिमे पदद्वये दक्षिणोरौ यमः -

**मन्त्रः - ॐयमाय त्वाङ्गिरस्वते पितृमते स्वाहा।**

**स्वाहा घर्माय स्वाहा धर्मः पित्रे॥ ( ३८/०९ )**

**भावार्थः** - हे धर्म! आङ्गिरस्वते पितृमते यमाय त्वां जुहोमि। धर्मः पित्रर्थाय अस्तु। ॥

**श्लोकः - एह्येहि दण्डायुध धर्मराज कालांजनाभास विशालनेत्र।**

**विशालवक्षस्थलरौद्ररूप गृहाण पूजां भगवन्नमस्ते॥**

**गृहक्षतस्य** पश्चिमे पदद्वये दक्षिणपार्श्वे **भो यम !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **यमाय** नमः, **यमम्** आवाहयामि स्थापयामि।

१४. तत्पश्चिमे पदद्वये दक्षिणजानौ गन्धर्वः -

**मन्त्रः - ॐगन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्टयै। यजमानस्य परिधिरस्यग्निरिडऽईडितः॥**

**इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्टयै। यजमानस्य परिधिरस्यग्निरिडऽईडितः॥**

**मित्रावरुणौ त्वोत्तरतः परिधतां ध्रुवेण धर्मणा विश्वस्यारिष्टयै। यजमानस्य**

**परिधिरस्यग्निरिडऽईडितः॥ (०२/०३)**

**भावार्थः** - गन्धर्वः विश्वावसुः त्वां सर्वतः स्थापयतु, सर्वस्य अविनाशाय यजमानस्यापि रक्षायै त्वं परिधिः असि। हे परिधे! त्वं (यजमानस्य अग्नेश्च रक्षणाय) स्तुत्यः स्तुतः च। हे द्वितीयपरिधे! त्वम् इन्द्रस्य दक्षिणो बाहुरसि। सर्वस्य रक्षणाय अविनाशाय च त्वं स्थापितः असि। हे परिधे! त्वं स्तुत्यः स्तुतः च। हे तृतीय-परिधे! वाय्वादित्यौ स्थिरेन धारणेन त्वाम् उत्तरस्यां दिशिपरितः स्थापयताम्। सर्वस्य अविनाशाय यजमानस्य च रक्षार्थं त्वं परिधिः असि तदर्थं त्वं स्तुत्यः त्वं स्तुतः च।

**श्लोकः - एह्येहि गन्धर्व सुरप्रियेश रक्तोत्पलाभास सुधात्वमूर्ते।**

**पीठेऽत्र देवेश गृहाण पूजां ममाध्वरं पाहि भवन्नमस्ते॥**

**यमस्य** पश्चिमे पदद्वये दक्षिणजानौ **भो गन्धर्व !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **गन्धर्वाय** नमः, **गन्धर्वम्** आवाहयामि स्थापयामि।

१५. तत्पश्चिमे सार्धपदे दक्षिणजङ्घायां भृङ्गराजः -

**मन्त्रः - ॐसोमꣳ राजानमवसेऽग्निमन्वारभामहे।**

**आदित्यान्विष्णुँ सूर्यं ब्रह्माणं च बृहस्पतिꣳ स्वाहा॥ (०९/२६)**

**भावार्थः** - रक्षायै सोमराजम्, अग्निं, द्वादशादित्यान्, सूर्यं, ब्रह्माणं, बृहस्पतिं च आह्वयामः। इदं तेभ्यः हविः सुहुतमस्तु।

**श्लोकः - समाह्वयन्तं शिखिपृष्ठसंस्थं श्रीभृङ्गराजं जगतः शरण्यम्।**

**खट्वाङ्गहस्तं वरदं जनेशं भजामि देवं स्वकुलाभिवृद्धयै॥**

**गन्धर्वस्य** पश्चिमे पदद्वये दक्षिणजानौ **भो भृङ्गराज !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **भृङ्गराजाय** नमः, **भृङ्गराजम्** आवाहयामि स्थापयामि।

१६. तत्पश्चिमे नैर्ऋत्यार्धपदे दक्षिणस्फिचि मृगः -

**मन्त्रः - ॐमृगो न भीमः कुचरो गिरिष्ठाः परावथ आजगन्था परस्याः॥**

**सृकꣳ सꣳ शाय पविमिन्द्र तिग्मं वि शत्रून् ताढि वि मृधो नुदस्व॥ (१८/७१)**

**भावार्थः** - सिंह इव भयङ्करः, पृथिवीचारी, पर्वताश्रितः, यश्च अत्यन्तं सुदूरात् द्युलोकादायातः तादृश हे इन्द्र! त्वं स्वीयं वज्रं तीक्ष्णं कुरु। हे इन्द्र! अस्माकं शत्रून् ताडय सुदूरं च नाशय।

**श्लोकः - एह्येहि गोरोचनदिव्यमूर्ते मृगप्रकृष्टार्तिहरासुरारे।**

**पीठेऽत्र देवेश गृहाण पूजां ममाध्वरं पाहि भवन्नमस्ते॥**

**भृङ्गराजस्य** पश्चिमे नैर्ऋत्यार्धपदे दक्षिणस्फिचि **भो मृग !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **मृगाय** नमः, **मृगम्** आवाहयामि स्थापयामि।

१७. मृगस्य उत्तरार्धपदे नैर्ऋत्यकोणपदे पादयोः पितरः -

**मन्त्रः - ॐउदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः।**

**असुं यऽईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु॥ ( १९/४९ )**

**भावार्थः** - सोमसुतः अस्माकं ये पितरः अस्मिन् अधस्तने भूर्लोके स्थितास्ते उन्नतमध्यमलोकस्था भवन्तु। ये च मध्यमलोकस्थास्ते उत्तमलोकस्था भवन्तु। ये च उत्तमलोकस्थास्ते मुक्ता भवन्तु। कौटिल्यरहिताः यज्ञं सत्यं वा जानानाः ये पितरः वायव्यशरीरधारिणो जाताः ते पितरः अस्मान् अह्वानेषु पालयन्तु।

**श्लोकः - समाह्वये दिव्यपितॄन् कुलेशान् रक्तोत्पलाभानिह रक्तनेत्रान्।**

**सुरक्तमाल्याम्बरभूषितांश्च नमामि पीठे कुलवृद्धिहेतोः॥**

**मृगस्य** उत्तरार्धपदे पादयोः **भो पितरः !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **पितृभ्यो** नमः, **पितृन्** आवाहयामि स्थापयामि।

१८. तदुत्तरसार्धपदे वामस्फिचि दौवारिकः -

**मन्त्रः - ॐद्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुपधापयेते।**

**हरिरन्यस्यां भवति स्वाधावाञ्छुक्रो अन्यस्यां ददृशे सुवर्चाः॥ ( ३३/०५ )**

**भावार्थः** - द्वे विभिन्नरूपे शुभमनोरथयुते रात्र्यहनी निरन्तरं प्रवर्तेते। क्रमात् ते उभे एकमेव पुत्रं पयः पाययतः। रसहारी अग्निः (सूर्यो वा) अन्यस्याम् उषाया हविर्मान् भवति, अपरस्यां रात्र्यां च शुभः अग्निः दीप्तिमान् दृश्यते स्वधावाँश्च भवति।

**श्लोकः - एह्येहि दौवारिक दण्डपाणे विशालपङ्केरुहलोलनेत्र।**

**पीठेऽत्र देवेश गृहाण पूजां शिवाय नः पाहि भवन्नमस्ते॥**

**पितृणाम्** उत्तरसार्धपदे दक्षिणस्फिचि **भो दौवारिक !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **दौवारिकाय** नमः, **दौवारिकम्** आवाहयामि स्थापयामि।

१९. तदुत्तरपदद्वये वामजङ्घायां सुग्रीवः -

**मन्त्रः - ॐतन्नो व्वातोमयोभु व्वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः।**

**तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम्॥ ( २५/१७ )**

**भावार्थः** - वायुः अस्माकं हितम् औषधम् आवहतु, तदेव माता पृथिवी, पिता द्यौश्च। सोमाभिषावकः सुखभूमिरूपास्ते प्रस्तराः अपि अस्मान् तत्सुखं, कल्याणं च प्रददतु। हे अश्विनौ ! युवाम् अपि स्वबुद्धया अस्मान् सुखशान्तिपूर्णान् कुरुताम्।

**श्लोकः - एह्येहि सुग्रीव सुरेशपूज्य दशाश्ववाह त्रिगुणात्ममूर्ते।**

**पीठेऽत्र देवेश गृहाण पूजां मनोरमां त्वं भगवन्नमस्ते॥**

**दौवारिकस्य** उत्तरपदद्वये वामजङ्घायां **भो सुग्रीव !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **सुग्रीवाय** नमः, **सुग्रीवम्** आवाहयामि स्थापयामि।

२०. तदुत्तरपदद्वये वामजानौ पुष्पदन्तः -

**मन्त्रः - ॐनमः पार्य्याय चावार्ष्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कुल्याय च नमः शष्प्याय च फेन्न्याय च॥ (१६/४२)**

**भावार्थः** - पारे भवाय नमः, मध्ये भवाय नमः, नौकारूपाय (प्रकरणाय) नमः, तीर्थरूपाय नमः, तटे भवाय नमः, कुशादिशस्य रूपाय नमः, (नदीसमुद्रादीनां जलस्य) फेनरूपाय नमः।

**श्लोकः - आवाहयामि देवेशं पुष्पदन्तं महोज्ज्वलम्।**

**नानाविभारसम्पन्नं महाघण्टविराजितम्॥**

**सुग्रीवस्य** उत्तरपदद्वये वामजानौ **भो पुष्पदन्त !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **पुष्पदन्ताय** नमः, **पुष्पदन्तम्** आवाहयामि स्थापयामि।

२१. तदुत्तरपदद्वये वामोरौ वरुणः -

**मन्त्रः - ॐइमम्मे व्वरुणश्रुधी हवमद्या च मृडय।**

**त्वामवस्युरायके॥ (२१/०१)**

**भावार्थः** - हे वरुण! अद्य त्वं मम इमं आह्वानं शृणु। अस्मान् सुखय। यतोऽहं आत्मनः पालनमिच्छन् त्वां कामये।

**श्लोकः - एह्येहि लोकेश्वर पाशपाणे यादोगणैर्वन्दितपादपद्म।**

**पीठेऽत्र देवेश गृणाण पूजां पाहि त्वमस्मान् भगवन्नमस्ते॥**

**पुष्पदन्तस्य** उत्तरपदद्वये वामोरौ **भो वरुण !** इहागच्छ इह तिष्ठ ॐभूर्भुवःस्वः **वरुणाय** नमः, **वरुणम्** आवाहयामि स्थापयामि।

## शब्दार्थाः

**दीदिवः** हे दीप्तिमन्, **आवह** - प्रापय, **पर्जन्यः** - मेघः, **रणाय** - संग्रामाय, **भायै** - प्रकाशाय, **नियुद्भिः** - अश्वैः, **रिष्येम** - विनश्येम्, **स्मसि** - भवामः, **ईडितः** - स्तुतः, **परिदधातु** - सर्वतः, **ईयुः** - जग्मुः, **हवेषु** - आह्वानेषु, **मृडय** - सुखय, **आचके** - कामये, **श्रुधि** - शृणु॥

## स्वाध्यायः

**१. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) 'अश्वैः' इति पदस्य कृते पाठे ......... शब्दः प्रयुक्तः। (मरुद्भिः / नियुद्भिः / नयद्भिः)

(२) 'भा' इति शब्दस्य ......... पर्यायवाची अस्ति। (विकासः / प्रकाशः / आकाशः)

(३) 'रणाय' इति शब्दस्य ......... इति अर्थो भवति। (रणप्रदेशाय / संग्रामाय / शुष्कप्रदेशाय)

(४) 'सुखय' इति पदस्य कृते पाठे ......... शब्दः प्रयुक्तः। (रिष्य / मृडय / शमय)

(५) 'पर्जन्यः' इति शब्दस्य ......... अर्थः भवति। (मेघः / वरुणः / माघः)

**२. निम्नलिखितप्रश्नानाम् एकवाक्येन उत्तरं लिखत।**

(१) यः कोऽपि याज्ञिको विधिः भवेत् तत्र **केषां** पूजनम् अनिवार्यम् भवति।

(२) वास्तुमण्डलदेवतानां स्थापनस्य सङ्कल्पं लिखत ?

(३) वास्तुमण्डलस्थापनपीठं कस्यां दिशि भवति ?

(४) वास्तोष्पतेः पादयोः कस्य स्थापनं भवति ?

(५) वरुणस्य स्थापनं कस्यां दिशि भवति ?

(६) पूष्णः स्थापनं वास्तोः कस्मिन्नङ्गे भवति ?

(७) मृगस्य स्थापनं कुत्र भवति ?

**३. निम्नलिखितप्रश्नानां सविस्तरम् उत्तरं लिखत।**

(१) वास्तुमण्डलदेवतानां महत्त्वविषये सविस्तरं टिप्पणीं कुरुत।

(२) 'विशन्तु भूतले...' इति कारिकासंदर्भे शङ्कुरोपणविधेः विषदतया टिप्पणीं कुरुत।

(३) रेखाकरण-पूजनविषये सविस्तरं टिप्पणीं कुरुत?

**४. निम्नलिखितमन्त्राणां पूर्तिं कृत्वा भावार्थं लिखत।**

(१) ॐ इमम्मे व्वरुण ......... ०।

(२) ॐ मृगो न भीमः ......... ०।

(३) ॐ गन्धर्वस्त्वा ......... ०।

(४) ॐ आनो नियुद्भिः ......... ०।

(५) ॐ भायै दार्वाहारं ......... ०।

(६) ॐ मरुत्वाँ २ इन्द्र ......... ०।

**५. 'क' विभागस्य मन्त्राणां 'ख' विभागस्य देवैः सह उचितं मेलनं कुरुत।**

| **'क' विभागः** | **'ख' विभागः** |
|---|---|
| (१) ॐ स नः पावक ......... ०। | (१) यमः। |
| (२) ॐ आकृष्णेन ......... ०। | (२) पितरः। |
| (३) ॐ यमाय त्वा. ......... ०। | (३) सूर्यः। |
| (४) ॐ उदीरतामवरऽ ......... ०। | (४) पुष्पदन्तः। |
| (५) ॐ नमः पार्ष्याय चा ......... ०। | (५) वास्तोः। |

**छात्रप्रवृत्तिः**

- अस्मिन् पाठे देवतानां विविधदिक्षु निवासः २१ मन्त्रेषु निर्दिष्टः तेषां देवतानामानि दिशा उभयोः स्फोरकपत्रे (चार्ट-पेपर-मध्ये) कोष्ठकं निर्माय कक्षायां स्थापयन्तु।

**अध्यापकप्रवृत्तिः**

- रेखाकरण-प्रयोगस्य प्रायोगिककार्ये शिक्षकः छात्राणां मार्गदर्शनं कुर्यात्, प्रायोगिकज्ञानं च दद्यात्।

●

# २ शिख्यादि-वास्तुमण्डलम् २

**प्रस्तावना**

वस् धातौ तुण् प्रत्यये वास्तुशब्दः निष्पद्यते। **वाचस्पत्यम्** - इति ग्रन्थानुसारं वास्तुशब्दस्य अर्थः वसनयोग्या भूमिः इति वर्तते। अस्माभिः पूर्वस्मिन् पाठे अवगतं यत् यः कोऽपि याज्ञिको विधिः भवति तत्र **वास्तुमण्डलदेवतानां** पूजनम् अनिवार्यत्वेन कर्तव्यं भवति। अत्र वयं पूर्वस्मिन् प्रकरणे वास्तोः प्रकारद्वयं ज्ञातवन्तः। तत्र **गृहवास्तुपूजने** तदन्तर्गतम् **आहत्य ६३ शिख्यादिवास्तुमण्डलदेवतानां** पूजनं भवति। अतः अस्मिन् पाठ्यपुस्तके शिख्यादिवास्तुमण्डलदेवतानां **त्रिषु प्रकरणेषु प्रतिप्रकरणम्** एकविंशतिसंख्यायां (२१) क्रमशः आवाहन-पूजन-प्रतिष्ठापनविधिः च प्रस्तूयते।

प्रस्तुतेऽस्मिन् द्वितीयपाठे एकविंशतिसंख्याकानां (२२ तः ४२ पर्यन्तं) वास्तुमण्डलदेवतानाम् आवाहन-पूजन-प्रतिष्ठापनविधिं च ज्ञास्यामः।

---

२२. तदुत्तरपदद्वये वामपार्श्वे **असुरः** -

**मन्त्रः - ॐ ये रूपाणि प्रतिमुञ्चामानाऽअसुराः सन्तः स्वधया चरन्ति।**

**परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात्॥ (२ / ३०)**

**भावार्थः** - ये स्थूलानि सूक्ष्मानि च शरीराणि धारयन्ति तान् सर्वान् असुरान् राक्षसादीन् अग्निः अस्मात् यज्ञस्थानात् दूरं नाशयति।

**श्लोकः - आवाहयामि दैत्येन्द्रमसुरं सुरमर्दनम्।**

**उग्ररूपं महावीर्यं खड्गबाणधनुर्धरम्॥**

**वरुणस्य** उत्तरपदद्वये वामपार्श्वे भो **असुर** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **असुराय** नमः **असुरम्** आवाहयामि स्थापयामि।

२३. तदुत्तरसार्धपदे वामपार्श्वे **शेषः**

**मन्त्रः - ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये।**

**शं य्योरभिस्रवन्तु नः॥ (१२ / ३६)**

**भावार्थः** - अभीष्टाय पानाय च दीप्यमाना आपः अस्माकं सुखरूपा भवन्तु। अस्माकं स्नाने पाने च आपः सुखयित्र्यो भवन्तु। अस्माकं रोगाणां शमनं भयानां पृथक्करणं च आपः अभिस्रवन्तु।

**श्लोकः - एह्येहि व्याधीश महामहेश सर्वामरैर्वन्दितपादपद्म।**

**अनेकमूलाधिपरूपशेष गृहाण पूजां भगवन्नमस्ते।**

**असुरस्य** उत्तरसार्धपदे भो **शेष** इहागच्छ इह तिष्ठ ॐ भूभुवः स्वः **शेषाय (शोषाय)** नमः **शेषम्** आवाहयामि स्थापयामि।

२४. तदुत्तरे वायव्यार्धपदे वाममणिबन्धे **पापः** -

**मन्त्रः - ॐ मा भेर्म्मा सँविक्त्थाऽऊर्ज्जं धत्स्व धिषणे व्वीड्वीसती।**

**व्वीडयेथामूर्ज्जं दधायाम् पाप्मा हतो न सोमः॥ (६ / ३५)**

**भावार्थः** - हे सोम ! त्वं मा भैषीः। मा च कम्पनं कृथाः, देवतर्पणार्थमहम् अभिषुणोमि, अतः रसं धारय। हे द्यावापृथिव्यौ ! युवां स्वत एव दृढे सत्यौ आत्मानं दृढं कुरुतम्। एनं प्रस्तरं कुट्टेन यजमानस्य पापीयान् शत्रुः हतः न तु सोमः।

**श्लोकः - आवाहयाम्यहं भीमं पापमुग्रं भयप्रदम्।**

**अधोमुखं क्षमाहीनं दण्डमुदरधारिणम्॥**

**शेषस्य** उत्तरे वायव्यार्धपदे वाममणिबन्धे भो **पाप** इहागच्छ इह तिष्ठ ॐ भूभुवः स्वः **पापाय** नमः **पापम्** आवाहयामि स्थापयामि।

२५. पापस्य पूर्वार्धपदे (वायव्यकोणपूर्वार्धपदे) वामाग्रबाहौ **रोगः** -

**मन्त्रः - ॐ परं मृत्योऽअनु परेहि पन्थां यस्तेऽअन्यऽइतरो देवयानात्।**

**चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत व्वीरान्॥ (३५ / ७)**

**भावार्थः** - हे मृत्यो ! त्वं पराङ्मुखो भूत्वा अन्यमार्गेण गच्छ। नयन-श्रोत्रवते ! त्वामहं कथयामि यत् त्वं मम सुपुत्रान् वीरान् च मा हिंसीः न च तान् प्रति क्रोधं कुरु।

**श्लोकः - आवाहयाम्यहं रोगमनेकविधलक्षणम्।**

**नानालङ्कारसंयुक्तं रक्तश्मश्रुविलोचनम्॥**

**पापस्य** पूर्वार्धपदे वामाग्रबाहौ भो **रोग** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **रोगाय** नमः **रोगम्** आवाहयामि स्थापयामि।

२६. तत्पूर्वसार्धपदे वामाग्रबाहावेव **अहिः** -

**मन्त्रः - ॐ अहिरिव भोगैः पर्य्येति बाहुं ज्याया हेतिं परिबाधमानः।**

**हस्तघ्नो विश्वा व्वयुनानि विद्वान् पुमान्पुमाꣳसम्परिपातु व्विश्वतः॥**

**भावार्थः** - यथा सर्पाः स्वदेहेन हस्तादिकं वेष्टयति तथा ज्यायाः आघातं सोढुं क्षमः शूरः तथा च सर्वान् रक्षोपायान् जानन् हस्तत्राणः योधपुरुषं सर्वतः रक्षतु।

**श्लोकः - समाह्वयन्तं फणिराजमग्र्यं नानाफणामण्डलराजमानम्।**

**भक्तैकगम्यं जनताशरण्यं भजाम्यहं नः स्वकुलाभिवृद्ध्यै॥**

**रोगस्य** पूर्वसार्धपदे वामाग्रबाहौ एव भो **अहि** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **अहये** नमः **अहिम्** आवाहयामि स्थापयामि।

२७. तत्पूर्वपदद्वये वामकूर्परे **मुख्यः** -

**मन्त्रः - ॐ मुखꣳ सदस्य शिरऽइत्सतेन जिह्वा पवित्रमश्विनासन् सरस्वती।**

**चप्यं न पायुर्भिषगस्य व्वालो वस्तिर्न शेपो हरसा तरस्वी॥ (१९ / ८८)**

**भावार्थः** - अस्य इन्द्रस्य मुखम् सत् अजायत। तस्मादेव शिरः, पवित्रं जिह्वा अभवत्, अश्विनौ सरस्वती च मुखे अभवन्, चप्यं च पायुः अभवत्, सुरागलनवस्त्रम् इन्द्रस्य वैद्यः, बस्तिः, लिङ्गं च अभवत्। तत् लिङ्गं वीर्यबलेन अधिकवेगवत् आसीत्।

**श्लोकः - आवाहयाम्यहं देवं मुख्यं जीमूतसन्निभम्।**

**भद्रासनसमारूढं देवं गन्धर्वसेवितम्॥**

**मुख्यस्य** पूर्वपदद्वये वामकूर्परे भो **मुख्य** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **मुख्याय** नमः **मुख्यम्** आवाहयामि स्थापयामि।

२८. तत्पूर्वपदद्वये वामबाहौ **भल्लाटः** -

**मन्त्रः - ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्श्येमाऽक्षभिर्य्यजत्राः।**

**स्थिरैरङ्गैस्तुष्टुवाꣳस स्तनूभिर्व्यशेमहि देवहितं यदायुः॥ (२५ / २१)**

**भावार्थः** - हे देवाः ! वयं कर्णाभ्यां कल्याणकारि श्रुणुयाम। हे देवाः ! वयं नयनाभ्यां भद्रं पश्येम। हे यजत्राः स्थिरैः अङ्गैः देवान् स्तूयमानाः वयं स्वशरीरेभ्यः तदायुः प्राप्नुयाम, यद्देवैः प्रदत्तं विद्यते।

**श्लोकः - आवाहयाम्यहं देवं भल्लाटं मकरध्वजम्।**

**खड्गहस्तं सुखासीनं नीलोत्पलसमप्रभम्॥**

**मुख्यस्य** पूर्वपदद्वये वामबाहौ भो **भल्लाट** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **भल्लाटाय** नमः **भल्लाटम्** आवाहयामि स्थापयामि।

२९. तत्पूर्वपदद्वये वामप्रबाहौ **सोमः** -

**मन्त्रः - व्वयꣳ सोम व्व्रते तव मनस्तनूषु बिभ्रतः।**

**प्प्रजावन्तः सचेमहि॥ ( ३ / ५६ )**

**भावार्थः** - हे सोम ! वयं जायमानाः तव कर्मणि वर्तमानाः अस्माकं तनूषु अस्मदीयं चित्तं धारयन्तः त्वत्कारुण्यात् प्रजावन्तः पुत्रपौत्रादिसम्पन्नाः सन्तः सेवेमहि।

**श्लोकः - एह्येहि ताराधपते सुरेश श्वेतोत्पलाभास सुधाकरेश।**

**पीठेऽत्र देवेश गृहाण पूजां पाहि त्वमस्मान् भगवन्नमस्ते॥**

**भल्लाटस्य** पूर्वपदद्वये वामप्रबाहौ भो **सोम** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **सोमाय** नमः **सोमम्** आवाहयामि स्थापयामि।

३०. तत्पूर्वपदद्वये वामांसे **सर्पः** -

**मन्त्रः - ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु।**

**येऽअन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः॥ ( १३ / ६ )**

**भावार्थः** - ये सर्पाः अस्यां पृथिव्याम् अत्र तत्र विद्यमानाः सन्ति। ये च सर्पाः अन्तरिक्षे, द्युलोके च विद्यमानाः सन्ति, तेभ्यः सर्वेभ्यः सर्पेभ्यः नमः।

**श्लोकः - आवाहयाम्यहं देवमुरगं वक्रगामिनम्।**

**धराधरं महाकायं नानारत्नविभूषितम्॥**

**सोमस्य** पूर्वपदद्वये वामांसे भो **सर्प** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **सर्पाय** नमः **सर्पम्** आवाहयामि स्थापयामि।

३१. तत्पूर्वसार्धपदे वामश्रोत्रे **अदितिः** -

**मन्त्रः - ॐ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता सपिता सपुत्रः।**

**विश्वे देवा ऽ अदितिः पञ्चजनाऽअदितिर्जातमदितिर्जनित्वम्॥ ( २५/२३ )**

**भावार्थः** - अदितः द्यौः, अदितिः अन्तरिक्षम्, अदितिः माता, अदितिः स पिता, सः पुत्रः, च अदितिरेवास्ति। सर्वे देवाः अदितिः सन्ति। किं बहुना उत्पन्नं प्राणिजातं जनित्वं जनिष्यमाणं च सर्वम् अदितिः अस्ति।

**श्लोकः - आवाहयाम्यहं देवीमदितिं देवमातरम्।**

**सर्वकामप्रदां शुद्धामाशु विघ्नविनाशिनीम्॥**

**सर्पस्य** पूर्वसार्धपदे वामश्रोत्रे भो **अदिते** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **अदितये** नमः **अदितिम्** आवाहयामि स्थापयामि।

३१. तत्पूर्वार्धपदे वामनेत्रे **दितिः** -

**मन्त्रः - ॐ अग्निश्च मे धर्मश्च मेर्कश्च मे सूर्यश्च मे प्राणश्च मेश्वमेधश्च मे पृथिवी च मेदितिश्च मेऽदितिश्च मे द्यौश्च मेऽगुलयः शक्वरयो दिशश्च मे यज्ञेन कल्पन्ताम्। ( १८/२२ )**

**भावार्थः** - अग्निः, प्रवर्ग्यः, अर्कनामा यज्ञविशेषः, सूर्यः प्राणः, अश्वमेघः, पृथिवी, अदितिः दितिः, द्यौः, अङ्गुलयः, शक्वयः, दिशः च एतत्सर्व मत्कृते यज्ञेन साधितं भवेत्।

**श्लोकः - आवाहयाम्यहं देवीं दितिं दैत्यस्य मातरम्।**

**सर्वाङ्गसुन्दरीं रम्यां महामोहकरीं शुभाम्॥**

**अदितेः पू**र्वार्धपदे वामनेत्रे भो **दिते** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **दितये** नमः **दितिम्** आवाहयामि स्थापयामि।

३३. मण्डलमध्यस्येशानकोणोत्तरार्धपदे मुखे (शिखि-पदाघः) **आपः** -

**मन्त्रः - ॐ आपो हिष्ठा मयो भुवस्तानऽऊर्ज्जे दधातन।**

**महेरणाय चक्षसे॥ (३६/१४)**

**भावार्थः** - जलं सुखकारकं खलु ! तत् अस्मासु महारमणीयाय प्रकाशाय बलं धारयेत्।

**श्लोकः - समाह्वये श्वेतसुपावनेशीरापः स्वरूपाः प्रबलपन्नाः।**

**सुपाशहस्ता वरदा अपोऽत्र यजामि देवी कुलवृद्धिहेतोः॥**

मण्डलमध्यस्येशानकोणोत्तरार्धपदे मुखे भो **आप** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **अद्भ्यो** नमः **अप** आवाहयामि स्थापयामि।

३४. सवितृपदसंलग्नाग्नेयार्धपदे दक्षिणहस्ते **सावित्रः** -

**मन्त्रः - उपयामगृहीतोऽसि सावित्रोऽसि चनोधाश्चनोधाऽ असि च नो मयि धेहि।**

**जिन्व यज्ञं जिन्व यज्ञपतिं भगाय देवाय त्वा सवित्रे॥ (८/७)**

**भावार्थः** - हे सोम ! त्वम् उपयामपात्रेण गृहीतोऽसि। त्वं खलु सवितुः देवस्य पेयसत्त्वम् अन्नदश्च। हे अन्नदायक ! त्वमस्मभ्यं देहि। हे सोम ! इमं यज्ञं देवकृपापूर्णं भावय। कल्याणकारिणे यज्ञफलाय त्वां गृह्णामि। त्वं यज्ञं यजमानं च प्रसादय सन्तोषय।

**श्लोकः - सामह्वये दिव्यमुदारकीर्तिं कलाकलाभिस्तु महोग्ररूपम्।**

**सावित्र्यमग्र्यं सुविशालमूर्तिं यजामि देवं स्वकुलाभिवृद्ध्यै॥**

सवितृपदसंलग्नाग्नेयार्धपदे दक्षिणहस्ते भोः **सावित्र** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **सावित्राय** नमः **सावित्रम्** आवाहयामि स्थापयामि।

३५. विबुधाधिपसंलग्ननैर्ऋत्यार्धपदे मेढ्रे **जयः** -

**मन्त्रः - गोत्रभिदं गोविदं वज्रबाहुं जयन्त मज्म प्रमृणन्तमोजसा।**

**इमꣳ सजाताऽअनुवीरयध्वमिन्द्रꣳ सखायोऽअनुसꣳरभध्वम्॥ (१७/३८)**

**भावार्थः** - पणीनां गोत्रभिदं, स्तुतिवाग्विदं पण्डितं, वज्रपाणिं युद्धानां जेतारः, स्वबलेन शत्रून् प्रमर्दयन्तम् इममिन्द्रं हे समानजन्मनः सखायः ! वीरकर्मभिः तं प्रोत्साहयन्तु, तं च युद्धाय प्रेरयन्तु।

**श्लोकः - आवाहयाम्यहं देवं जयं जयकरं परम्।**

**हयारूढं महाबाहुं नानालङ्कारशोभितम्॥**

विबुधाधिपसंलग्ननैर्ऋत्यार्धपदे मेढ्रे भो **जय** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **जयाय** नमः **जयम्** आवाहयामि स्थापयामि।

३६. यक्ष्मसंलग्नवायव्यार्धपदे वामहस्ते **रुद्रः** -

**मन्त्रः - ॐ या ते रुद्र शिवा तनूरघोरा पापकाशिनी।**

**तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि॥ (१६/२)**

**भावार्थः** - हे रुद्र ! या तव मङ्गलरूपा, सौम्या, पुण्यफलदा तनूः अस्ति, तया अस्मान् सुखमय्या तन्वा हे गिरिशन्त ! अभिपश्य।

**श्लोकः - एह्येहि सर्वज्ञ पिनाकपाणे सुरासुरैर्वन्दितपादपद्म।**

**पीठेऽत्र देवेश गृहाण पूजां रक्षाध्वरं नो भगवन्नमस्ते॥**

यक्ष्मसंलग्नवायव्यार्धपदे वामहस्ते भो **रुद्र** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **रुद्राय** नमः **रुद्रम्** आवाहयामि स्थापयामि।

३७. मध्ये पूर्वपदत्रये दक्षिणस्तने **अर्यमा** -

**मन्त्रः - ॐ तान्पूर्वया निविदा हूमहे व्वयं भगं मित्रमदितिं दक्षमस्त्रिधम्।**

**अर्य्यमणं व्वरुणꣳ सोममश्विना सरस्वती नः सुभगा मयस्करत्॥ ( २५/१६ )**

**भावार्थः** - प्राचीनाभिः स्तुतिभिः वयं तान् भग-मित्र-अदिति-दक्षान् आह्वयामः। तैः सह अर्यमणं, वरुणं, सोमं, अश्विनौ च आह्वयामः। सुभगा सरस्वती अस्माकं कल्याणं कुर्यात्।

**श्लोकः - आवाहयाम्यर्यमाणमहं देवं सुरेश्वरम्।**

**नीलाम्बुजसमाभासं तेजोराशिं जगत्पतिम्॥**

मध्ये नवपदात् पूर्वपदत्रये दक्षिणस्तने भो **अर्यमन्** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **अर्यम्णे** नमः **अर्यमाणम्** आवाहयामि स्थापयामि।

३८. आग्नेयकोणे अर्धपदे दक्षिणहस्ते **सविता** -

**मन्त्रः - उदुत्यं जातवेदसं देवं व्वहन्ति केतवः।**

**दृशे व्विश्वाय सूर्य्यम्॥ ( ३३/३१ )**

**भावार्थः** - तं जातप्रज्ञानं सूर्यं विश्वदर्शनाय रश्मयः उपरि द्युलोकमानयन्ति।

**श्लोकः - एहेयि पीठे सवितर्दिनेश सप्ताश्वसंयुक्तरथाधिरूढ।**

**रक्तोत्पलाभास विशालनेत्र गृहाण पूजां भगवन्नमस्ते॥**

आग्नेयकोणे अर्धपदे दक्षिणहस्ते भोः **सवितः** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **सवित्रे** नमः **सवितारम्** आवाहयामि स्थापयामि।

३९. तत्पश्चिमपदद्वये जठरदक्षिणभागे **विवस्वान्** -

**मन्त्रः - ॐ विवस्वान्नादित्यैष ते सोमपीथस्तस्मिन्मत्स्व।**

**श्रदस्मै नरो व्वचसे दधातन यदाशीर्दा दम्पती व्वाममश्नुत**

**पुमान्पुत्रो जायते व्विन्दते वस्वधा व्विश्वाहारपऽएधते गृहे॥ ( ८/५ )**

**भावार्थः** - हे तमोनिवारक आदित्य। इदं तव सोपानम्। तस्मिन् मत्स्व। हे आशिषो दातारः ऋत्विजः ! यूयं मयि श्रद्धां कुरुत। इमौ दम्पती वरणीयं धनं यज्ञफलस्वरूपं व्याप्नुतः। पुरुषत्वोपेतः पुत्रः एतयोः स्यात्। सः पुत्रः धनं प्राप्नुयात्। धनप्राप्त्यनन्तरं च सोऽपि धनपुत्रादीनां वर्धनं कुर्यात्।

**श्लोकः - रक्ताम्बरं पद्महस्तं विवस्वन्तं प्रभाकरम्।**

**सर्वपापहरं देवं पीठेऽत्रावाहयाम्यहम्॥**

सवितुः पश्चिमपदद्वये जठरदक्षिणभागे भोः **विवस्वन्** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **विवस्वते** नमः **विवस्वन्तम्** आवाहयामि स्थापयामि।

४०. नैर्ऋत्यपदपूर्वार्धे वृषणयोः **विबुधाधिपः** -

**मन्त्रः - ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम्।**

**ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः॥ ( २०/५० )**

**भावार्थः** - रक्षितारम् इन्द्रम्, आह्वने यज्ञे प्रीणयितारं शूरम् इन्द्रम्, सर्वसमर्थं पुरुहूतं च इन्द्रम् अहम् आवाहयामि।

**श्लोकः - आवाहयाम्यहं देवं विबुधाधिपतिं प्रभुम्।**

**चतुर्हस्तं गजारूढं हिमाद्रिशिखरोदयम्॥**

नैर्ऋत्यपदपूर्वार्धे वृषणयोः भोः **विबुधाधिप** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **विबुधाधिपाय** नमः **विबुधाधिपम्** आवाहयामि स्थापयामि।

४१. विबुधाधिपस्य उत्तरपदद्वये जठरवामभागे **मित्रः** -

**मन्त्रः - ॐ मित्रस्य चर्षणी धृतोवो देवस्य सानसि।**

**द्युम्नं चित्रश्रवस्तमम्॥ ( ११/६३ )**

**भावार्थः** - प्रजानां पोषकस्य धारकस्य द्योतमानस्य च मित्रस्य (सूर्यस्य) देवस्य प्राचीनतमं संरक्षणम् अत्यन्तश्रवणीयं धनान्नादिकं च वयं याचामहे।

**श्लोकः - एह्येहि रक्ताम्बरधारि मित्र ! सप्ताश्ववाह त्रिदशैकनाथ।**

**श्वेतोत्पलाभास विशालनेत्र गृहाण पूजां भगवन्नमस्ते॥**

विबुधाधिपस्य उत्तरपदद्वये जठरवामभागे भो **मित्र** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **मित्राय** नमः **मित्रम्** आवाहयामि स्थापयामि।

४२. तदुत्तरे वायव्यपदपश्चिमार्धे वामहस्ते राजयक्ष्मा -

**मन्त्रः - ॐ साकं यक्ष्म प्रपत चाषेण किकिदीविना।**

**साकं व्वातस्य ध्राज्या साकं नश्य निहाकया॥ ( १२/८७ )**

**भावार्थः** - हे यक्ष्मन् (रोग) ! त्वं चषेण पक्षिणा किकिदीविना वायुगत्या च सह अस्मात् शरीरात् दूरं गच्छ। हे यक्ष्म ! सर्वप्रकारकाभिः पीडाभिः व्याधिभिश्च त्वमेव विनष्टो भव।

**श्लोकः - आवाहयाम्यहं राज्ययक्ष्माणं रोगनन्दनम्।**

**त्रिशिरस्कं महाघोरं नागयज्ञोपवीतिनम्॥**

मित्रस्य उत्तरे वायव्यपदपश्चिमार्धे वामहस्ते भो **राजयक्ष्मन्** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **राजयक्ष्मणे** नमः **राजयक्ष्माणम्** आवाहयामि स्थापयामि।

## शब्दार्थाः

**रीरिषः** हिंसीथाः, **ज्याया** - आयुधात्, **हेतिम्** - बाणः, **यजत्राः** - यजनीयाः, **पञ्चजनाः** - मनुष्याः, **शक्वरयः** - शक्तयः, **चनोधाः** - अन्नानां धारयिता, **गोत्रभिदम्** - इन्द्रम्, **सोमपीथः** - सोमपानकर्ता, **अधा** - अथ, **मयस्करत्** - सुखं करोतु, **केतवः** - रश्मयः, **वसु** - धनम्, **मित्रः** - सूर्यः, **चर्षणी** - मनुष्यः॥

## स्वाध्यायः

**१. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) 'मनुष्यः' इति पदस्य कृते पाठे ......... शब्दः प्रयुक्तः। (मानवः / चर्षणी / मनुजः)

(२) 'रिरीषः' इति शब्दस्य ......... पर्यायवाची अस्ति। (हिंसीथाः / शिरीषः / जीववात्)

(३) 'अधा' इति शब्दस्य ......... इति अर्थो भवति। (अधः / अथ / अदः)

(४) 'शक्तयः' इति पदस्य कृते पाठे ......... शब्दः प्रयुक्तः। (मध्यर्यः / शक्वरयः / चत्वारः)

(५) 'गोत्रभिद्' इति इति शब्दस्य ......... अर्थः भवति। (इन्द्रः / वरुणः / गात्रम्)

**२. निम्नलिखितप्रश्नानाम् एकवाक्येन उत्तरं लिखत।**

(१) वास्तुशब्दे कः धातुः प्रत्ययश्च प्रयुक्तः ?

(२) वाचस्पत्यम् - इति ग्रन्थानुसारं वास्तुशब्दस्य अर्थः कः ?

(३) द्वितीयपाठे कति वास्तुमण्डलदेवतानाम् आवाहन-पूजन-प्रतिष्ठापनमन्त्राः प्रदत्ताः ?

(४) रोगस्य स्थापनं वास्तोः कस्मिन् अङ्गे भवति ?

(५) कः देवः वास्तोः वामकूर्पररूपः अस्ति ?

(६) सर्पाणां स्थापनं कतिपदेषु भवति ?

(७) दितेः स्थापनं कुत्र भवति ?

(८) अपां स्थापनं वास्तोः कस्मिन्नङ्गे भवति ?

(९) विबुधाधिपस्य स्थापनं कुत्र भवति ?

(१०) विवस्वतः स्थापनं कुत्र भवति ?

**३. निम्नलिखितमन्त्राणां पूर्तिं कृत्वा भावार्थं लिखत।**

(१) ॐ ये रूपाणि प्रति ......... ०।

(२) ॐ विवस्वन्नादित्यै ......... ०।

(३) ॐ गोत्रभिदं गोविदं ......... ०।

(४) ॐ अग्निश्च मे धर्म्म ......... ०।

(५) ॐ साकं यक्ष्म प्रपत ......... ०।

(६) ॐ परं मृत्योऽअनु ......... ०।

**४. निम्नलिखितश्लोकानां पूर्तिं कुरुत।**

(१) ॐ एह्येहि व्याधीश ......... ०।

(२) ॐ आवाहयाम्यहं भीमं ......... ०।

(३) ॐ एह्येहि ताराधिपते ......... ०।

(४) ॐ समाह्वये दिव्यमुदार ......... ०।

(५) ॐ रक्ताम्बरं पद्महस्तं ......... ०।

(६) ॐ एह्येहि रक्ताम्बरधारि ......... ०।

**५. 'क' विभागस्य श्लोकानां 'ख' विभागस्य देवैः सह उचितं मेलनं कुरुत।**

| 'क' विभागः | 'ख' विभागः |
| --- | --- |
| (१) ॐ आवाहयामि दैत्ये ......... ०। | (१) राजयक्ष्मा:। |
| (२) ॐ आहयाम्यहं देवमुरगं ......... ०। | (२) सावित्रः। |
| (३) ॐ समाह्वयेदिव्यमुदारकीर्तिं ......... ०। | (३) असुरः। |
| (४) ॐ एह्येहि सर्वज्ञ पिनाक ......... ०। | (४) पुष्पदन्तः। |
| (५) ॐ आवाहयाम्यहं राज ......... ०। | (५) अहिः। |

**छात्रप्रवृत्तिः**

- अस्मिन् पाठे देवतानां विविधदिक्षु निवासः २१ श्लोकेषु निर्दिष्टः तेषां देवतानामानि दिशा उभयोः स्फोरकपत्रे (चार्ट-पेपर-मध्ये) कोष्ठकं निर्माय कक्षायां स्थापयन्तु।

**अध्यापकप्रवृत्तिः**

- शिक्षकः वास्तुमण्डलदेवतानां पूजने छात्राणां मार्गदर्शनं कुर्यात्, प्रायोगिकज्ञानं च दद्यात्।

●

# ३ | शिख्यादि-वास्तुमण्डलम् ३

**प्रस्तावना**

अत्र वयं प्रथम-द्वितीयपाठयोः माध्यमेन ज्ञातवन्तः यत् वास्तुशान्तिः भूमिशोधनार्थम् अष्टशल्यमेदिनीदोषनिवृत्त्यर्थम् एवं नानाविधजीवहिंसादिजन्यसकलदोषपरिहारार्थं नितान्तम् आवश्यकविधिः वर्तते। तत्रापि अष्टशल्यमेदिनीदोषाः के ? इति विचारयामश्चेत् सुवर्ण-रजत-ताम्र-त्रपु-सीसक-कांस्य-लोह-पाषाणेति अष्टौ शल्यमेदिनीदोषाः सन्ति, येषां निवृत्तिः नितरामावश्यकी वर्तते। वयं जानीमो यत् **गृहवास्तुपूजने** तदन्तर्गतम् **आहत्य ६३ शिख्यादिवास्तुमण्डलदेवतानां** पूजनं भवति इति।

प्रस्तुतेऽस्मिन् तृतीयपाठे एकविंशतिसंख्याकानां (४३ तः ६३ पर्यन्तं) **वास्तुमण्डलदेवतानाम्** आवाहन-पूजन-प्रतिष्ठापनविधिं च ज्ञास्यामः।

---

४३. तत्पूर्वपदद्वये वामस्तने पृथ्वीधरः -

**मन्त्रः - ॐ पृथिवि देवयजन्योषध्यास्ते मूलं मा हिꣳ सिषं व्रजं गच्छ गोष्ठानं वर्षतु ते द्यौर्ब्बधान देव सवितः परमस्यां पृथिव्याꣳ शतेन पाशैर्योऽ स्मान्द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक्॥ ( ०१/२५ )**

**भावार्थः** - हे देवयजनरूपिणिभूमे ! अहं औषधीन् यज्ञार्थं ग्रहीष्यामि। नाहम् औषधीनां मूलं विनाशयेयम्। हे मृत्तिके ! त्वं व्रजं गवां स्थानं गच्छ। हे वेदिके ! तव द्युलोकः वर्षतु। हे देव सवितः ! पृथिव्याः अधस्तले विद्यमाने अन्धतामिस्रनाम्नि नरके त्वं तं शतैः पाशैः बद्ध्वा पातय यः अस्माकं द्वेषं करोति वयं च यस्य द्वेषं कुर्मः। तं च ततः मा मामुञ्च।

**श्लोकः - आवाहयाम्यहं देवं पृथ्वीधरमतीन्द्रियम्।**
**शंखचक्रगदापद्मैरलङ्कृतचतुर्भुजम्॥**

**राजयक्ष्मणः** पूर्वपदद्वये वामस्तने **भो पृथ्वीधर !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **पृथ्वीधराय** नमः **पृथ्वीधरम्** आवाहयामि स्थापयामि।

४४. ईशानपददक्षिणार्धे उरसि आपवत्सः -

**मन्त्रः - ॐ आपोऽ अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु। विश्वꣳहिरिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूतऽ एमि। दीक्षातपसोस्तनूरसि तां त्वा शिवाꣳ शग्मा परिदधे भद्रं वर्णं पुष्यन्॥ ( ०४/०२ )**

**भावार्थः** - मातृसदृश्यः आपः अस्मान् पवित्रान् कुर्वन्तु। घृतेन पुनानाः आपः अस्मान् यज्ञयोग्यान् कुर्वन्तु। इमाः द्योतमानाः आपः शरीरस्य समग्रं मालिन्यम् आत्मनः पापं च परिहरन्ति। एतेभ्यः पयोभ्यः शुचिर्भूत्वाहं बहिर्निर्गच्छामि। हे वस्त्र ! यत् त्वं दीक्षातपसोः शरीरं भवसि अतः कल्याणरूपयुक्तं, शान्तं त्वाम् आच्छादयामि॥

**श्लोकः - आवाहयाम्यहं देवम् आपवत्सं महाबलम्।**
**मयूरवाहनं रौद्रं नानाभूषणभूषितम्॥**

**पृथ्वीधरस्य** ईशानपददक्षिणार्धे उरसि **भो आपवत्स !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **आपवत्साय** नमः **आपवत्सम्** आवाहयामि स्थापयामि।

४५. मध्ये चतुष्पदे हृन्नामयोः ब्रह्मा -

**मन्त्रः - ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेनऽ आवः। सबुद्ध्न्याऽ उपमाऽ अस्य व्विष्ठाः शतश्च योनिमसतश्च व्विवः॥ ( १३/०३ )**

**भावार्थः** – पूर्वस्यां दिशि जायमानः सुन्दरकिरणयुक्तः आदित्य सीमानं सुरोचान् लोकान् स्वप्रकाशेन विवृतान् अकरोत्। अनन्तरं मेधावी सः अन्तरिक्षम् अभितः विद्यमाना दिशः विवृणोति। विद्यमानस्य स्थानम् अविद्यमानस्य प्रभवं च प्रकाशयति॥

**श्लोकः** – **एह्येहि विप्रेन्द्र पितामहेश हंसाधिरूढ त्रिदशैकवन्द्य।**

**श्वेतोत्पलाभासकुशाब्जहस्त गृहाण पूजां भगवन्नमस्ते॥**

**आपवत्सस्य** मध्ये चतुष्पदे ह्न्नामयोः **भो ब्रह्मन् !** इहागच्छ इह तिष्ठ ॐ भूभुवः स्वः **ब्रह्मणे** नमः **ब्रह्माणम्** आवाहयामि स्थापयामि।

**ततो मण्डलाद्बहिः ऐशानादिकोणेषु देवताः स्थापयेत्।**

४६. मण्डलाद्बहिः ऐशाने चरकी –

**मन्त्रः** – **ॐ चत्वारि शृङ्गा त्रयोऽ अस्य पादा द्वे शीर्षे सप्त हस्तासोऽ अस्य।**

**त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्याऽ२ आविवेश॥ ( १७/११ )**

**भावार्थः** – अस्य यज्ञरूपिणः ऋषभस्य चत्वारो ऋत्विजः हि चत्वारि शृङ्गाणि, त्रयो वेदाः पादाः,

हविर्धानप्रवर्यौ हि द्वे मस्तके, सप्तच्छन्दांसि एव सप्तहस्ताः सन्ति। त्रिषु सवनेषु बद्धः अयं यज्ञरूपः वृषभः उन्मुक्तः भूत्वा वेदनादं करोति। इत्थंरूपः अयं महान् यज्ञदेवः मनुष्येषु प्रविष्टः॥

**श्लोकः** – **आवाहयामि तां देवीं चरकीं चन्दनप्रियाम्।**

**ब्रह्मवष्णुशिवाद्यैश्च पूजितां पापनाशिनीम्॥**

**सर्वाभरणभूषाढ्यां नानारत्नोपशोभिताम्।**

**आगच्छ चरकीदेवी वास्तुमण्डलशाङ्करे॥**

मण्डलाद्बहिः ऐशाने **भो चरकि !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **चरक्यै** नमः **चरकीम्** आवाहयामि स्थापयामि।

४७. आग्नेये विदारी –

**मन्त्रः** – **ॐ ततो व्विराडजायत विराजो अधि पूरुषः।**

**स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः॥ ( ३१/५ )**

**भावार्थः** – तस्मात् परमात्मनः विराट् पुरुषः उदपद्यत। विराजः पुरुषः तस्मादेव पुरुषात् विश्वोत्पत्तिः जाता। तदनु सः भूम्यादिलोकान् असृजत्॥

**श्लोकः** – **आवाहयामि तां देवीं विदारीं विश्वतेजसीम्।**

**विदार्य ह्यसुरान् सर्वान् संस्थितां वियदम्बराम्॥**

**आगच्छ त्वं महादेवि पूजयामि नमो नमः।**

**वास्तुमण्डलदिग्भागे ह्याग्नेयीं दिशमाश्रिते॥**

मण्डलाद्बहिः आग्नेय्यां **भो विदारि !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **विदार्यै** नमः **विदारीम्** आवाहयामि स्थापयामि।

४८. नैर्ऋत्ये पूतना –

**मन्त्रः** – **ॐ द्रुपदा दिवमुमुचानः स्विन्नः स्नातो मलादिव।**

**पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः॥ ( २०/२० )**

**भावार्थः** - यथा पादुकायाः मुच्यमानः पुरुषः तत्संबन्धिदोषैः पृथग्भवति, यथा स्विन्नः पुरुषः स्नातः चेत् मलात् पूतः-शुद्धः भवति यथा च कम्बलमयेन घृतं शुद्धं भवेत् तथा आपः मां पापेभ्यः पृथक्कुर्वन्तु, पवित्रं कुर्वन्तु॥

**श्लोकः - आवाहयामि तां देवीं पूतनां पापरूपिणीम्।**

**कृष्णवस्त्रां समायातां रक्तमाल्यानुलेपनाम्॥**

**आगच्छ पूतने देवि पूजयामि नमो नमः।**

**वास्तुमण्डलदिग्भागे नैर्ऋतिं दिशमाश्रिते॥**

मण्डलाद्बहिः नैर्ऋत्यां **भो पूतने !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **पूतनायै** नमः **पूतनाम्** आवाहयामि स्थापयामि।

४९. वायव्ये पापराक्षसी -

**मन्त्रः - ॐ रक्षसां भागोऽसि निरस्तꣳ रक्ष इदमहꣳ रक्षोऽभितिष्ठामीदमहꣳ रक्षोऽवबाध**

**इदमहꣳरक्षोऽधमं तमो नयामि। घृतेन द्यावापृथिवी प्रोर्णुवाथां वायो वेस्तोकानामग्निराज्यस्य वेतु स्वाहा स्वाहाकृते ऊर्ध्वनभसं मारुतं गच्छतम्॥ (६/१६)**

**भावार्थः** - हे रक्तरञ्जित तृण ! त्वं राक्षसानां भागः असि। अयं राक्षसवर्गः यज्ञस्थानात् निःसृतः अयमहं राक्षसगणान् पदाक्रान्तेन परिहरामि, राक्षसान् पदाक्रान्तेन पीडयामि, राक्षसान् अन्धेन तमसि नयामि। हे द्यावापृथिव्यौ ! युवां स्वर्गं जलेन प्राच्छादयतम्। हे वायो ! त्वं वसायाः बिन्दून अवगच्छ, आहवनीयाग्निः घृताहुतिं जानीयात्, इयमाहुतिः अग्नयेऽस्ति। (इति तृणविशेषान् अग्नौ जुहुयात् अध्वर्युः) हे वपाश्रयण्यौ ! अग्नौ आहूते युवाम् ऊर्ध्वम् अन्तरिक्षे विद्यमानं पवनं प्राप्नुतम्॥

**श्लोकः - आवाहयामि तां देवीं पापात्मानं च राक्षसीम्,**

**निशाचरीं निरामायां नागहाराङ्गशोभिताम्।**

**आगच्छ वायुदिग्भागे पापे त्वं वास्तुपीठके॥**

मण्डलाद्बहिः वायव्यां **भो पापराक्षसि !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **पापराक्षस्यै** नमः **पापराक्षसीम्** आवाहयामि स्थापयामि।

५०. पूर्वे स्कन्दः -

**मन्त्रः - ॐ यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्द्रादुत वा पुरीषात्।**

**श्येनस्य पक्षा हरिणस्य बाहूऽउपस्तुत्यं महिजातं तेऽअर्व्वन्॥ (२९/१२)**

**भावार्थः** - हे अश्व ! आन्तरिक्षलोकात् पार्थिवाद्वा समुद्रात् प्रथमोत्पत्तिसमये जायमानः त्वं यदा हेषारवमकार्षीः हे अर्वन् ! तदा श्येनस्य पक्षौ अजैषीः, हरिणस्य बाहू शीघ्रतया अजैषीः, अतः तव तत्सर्वं स्तवनीयम् अभवत्॥

**श्लोकः - आवाहयामि देवेशं स्कन्दं सर्वत्रवल्लभम्।**

**नानाबुद्धिसमाकीर्णं नानावस्त्रशुशोभितम्॥**

मण्डलाद्बहिः पूर्वे **भो स्कन्द !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **स्कन्दाय** नमः, **स्कन्दम्** आवाहयामि स्थापयामि।

५१. दक्षिणे अर्यमा -

**मन्त्रः - ॐ अर्यमणं बृहस्पतमन्द्रं दानाय चोदय।**

**वाचं विष्णुꣳ सरस्वतीꣳ सवितारं च वाजिनꣳ स्वाहा॥ (९/२७)**

**भावार्थः** – हे ईश्वर ! त्वम् अर्यमणम्, बृहस्पतम्, इन्द्रं च दानार्थं प्रेरय। वागधीश्वरीं सरस्वतीम्, विष्णुम्, सवितारम् अन्नवतं प्रजापतिं च दानाय प्रेरय। इदं तेभ्यः सहुतमस्तु॥

**श्लोकः – आवाहयाम्यर्यमाणं देवेशं स्वार्थसिद्धये।**

**महावीर्यं महाक्रान्तं तेजोराशिं बलप्रदम्॥**

मण्डलाद्बहिः पूर्वे **भो अर्यमन् !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **अर्यम्णे** नमः, **अर्यमाणम्** आवाहयामि स्थापयामि।

५२. पश्चिमे जृम्भकः –

**मन्त्रः – ॐ हींकाराय स्वाहा हींकृताय स्वाहा क्रन्दते स्वाहावक्रन्दाय स्वाहा प्रोथते स्वाहा प्रपोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहासीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृत्ताय स्वाहा सꣳहानाय स्वाहोपस्थिताय स्वाहायनाय स्वाहा प्रायणाय स्वाहा॥ (७/२२)**

**भावार्थः** – (अश्वस्य चेष्टाः वर्णयन् यजमानः जुहोति। यथा –) हे अश्व ! तव हींकारमुद्दिश्य हींकृतमुद्दिश्य, क्रन्दनम्, अवक्रन्दनम्, प्रोथम्, घोणां, गन्धम्, प्राणरूपां क्रियाम्, निःशेषेण प्रवेशनम्, उपवेशनम्, सम्यक् खण्डनक्रियाम्, वल्गनम्, आसीनत्वम्, शयानत्वम्, सुषुप्तत्वम्, जागरणम्, कूजनम्, प्रबुद्धम्, विजृम्भणम्, उद्दीप्तत्वम्, सङ्गतशरीरं प्रति उपस्थिततत्वम्, चलनम् प्रचलनश्च उद्दिश्य इमाः हवीः जुहोमि॥

**श्लोकः – आवाहयामि देवेशं जृम्भकं सर्ववन्दितम्।**

**महाबलं महावीर्यं सर्वमानवपूजितम्॥**

मण्डलाद्बहिः पश्चिमे **भो जृम्भक !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **जृम्भकाय** नमः, **जृम्भकम्** आवाहयामि स्थापयामि।

५३. उत्तरे पिलिपिच्छः –

**मन्त्रः – ॐ न तं विदाथ य इमा जजानान्यद्युष्माकंमन्तरं बभूव।**

**नीहारेण प्रावृता जल्प्या चासुतृप अक्थशाश्चरन्ति॥ (३१/१७)**

**भावार्थः** – हे जीवाः ! यूयं तं विश्वकर्माणं न जानीथ य इमानि भूतानि जनयति उपसंहारति च। करणात् युष्माकं तस्य पुरुषस्य च महत् अन्तरं बभूव। पुरुषः जनकः यूयं जन्याः, पुरुषो भ्रामको यूयं भ्राम्याः, ये चैते अविद्यया अवगुण्ठिताः ये च कुतार्किकाः ये च प्राणान्तपर्ययन्ति (अलंकारप्रियाः) तैः अपि सह महदन्तरं बभूव। ये उक्थनां शंसितारः, ये यज्ञशीलास्ते पुरुषं प्रति विचरन्ति, ये तु पुरुषविदः ते पुरुष एव भवन्ति, नीहारप्रवृत्तास्तु नरकयायिनः भवन्ति॥

**श्लोकः – आवाहयामि देवेशं पिलिपिच्छगणद्वयम्।**

**सर्वेषाञ्चैव देवानां क्षत्रियस्य च रक्षकम्॥**

मण्डलाद्बहिः पश्चिमे **भो पिलिपिच्छ !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **पिलिपिच्छाय** नमः, **पिलिपिच्छम्** आवाहयामि स्थापयामि।

५४. पूर्वादिक्रमेण पूर्वे इन्द्राः –

**मन्त्रः – ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम्।**

**ह्वयामि शक्रं पुरुहूतमिन्द्रꣳ स्वस्तिनो मघवा धात्विन्द्रः (२०/५०)**

**भावार्थः** - रक्षितारम् इन्द्रम्, आह्वाने यज्ञे प्रीणयितारं शूरम् इन्द्रम्, सर्वसमर्थं पुरुहूतश्च इन्द्रम् अहम् आह्वयामि। धनवान् इन्द्रः अस्माकम् अविनाशं दधातु॥

**श्लोकः - इन्द्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः।**

**शतयज्ञाधिपो देवो सुरराज नमोऽस्तु ते॥**

मण्डलाद्बहिः पूर्वे **भो इन्द्र !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **इन्द्राय** नमः, **इन्द्रम्** आवाहयामि स्थापयामि।

५५. आग्नेय्याम् अग्निः -

**मन्त्रः - ॐ त्वन्नोऽग्ने तवदेव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य।**

**त्राता तोकस्य तनये गवामस्य निमेषꣳ रक्षमाणस्तव व्रते॥ (१३/३४)**

**भावार्थः** - हे वन्द्य ! द्योतमान अग्ने ! तव कर्मणि वर्तमानान् यजमानान् (तेषां) धनानि च त्वं परिपालय। अस्माकं शरीराणि च रक्ष। त्वं तनयस्य पोत्रस्य गवां च अनिमेषं रक्षकोऽसि। तव व्रतं वयं स्याम॥

**श्लोकः - सर्वतेजोमयो देवो रक्तवर्णो महाबलः।**

**शक्तिहस्तो महावीर्यो ह्याग्नेय्यामग्नये नमः॥**

मण्डलाद्बहिः आग्नेय्यां **भो अग्ने !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **अग्नये** नमः, **अग्निम्** आवाहयामि स्थापयामि।

५६. दक्षिणे यमः -

**मन्त्रः - ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा।**

**स्वाहा धर्माय स्वाहा धर्मः पित्रे॥ (९/३८)**

**भावार्थः** - हे धर्म ! अङ्गिरस्वते पितृमते यमाय त्वां जुहोमि। घर्म पित्रर्थाय अस्तु॥

**श्लोकः - कृष्णाजिनधरः श्यामो धर्माध्यक्षो महाबलः।**

**दण्डहस्ताधिपो देवो धर्मराज नमोऽस्तु ते॥**

मण्डलाद्बहिः दक्षिणे **भो यम !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **यमाय** नमः, **यमम्** आवाहयामि स्थापयामि।

५७. नैर्ऋत्ये निर्ऋतिः -

**मन्त्रः - ॐ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य।**

**अन्यमस्मदिच्छ सा तऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु॥ (१२/६२)**

**भावार्थः** - हे निर्ऋते ! सोमयागम् अकुर्वाणम् अयजमानश्च त्वं गृहाण। किं च गुप्तचोरस्य प्रकटचोरस्य च पृष्ठतो गत्वा तौ अपि गृहाण। सर्वथा सोमं हविर्यागैश्च यजद्भ्यः अस्मदन्यमिच्छ, सा तव इत्या - गतिः। हे देवि ! नैर्ऋते ! एवं भूतायै तुभ्यं नमः॥

**श्लोकः - सर्वप्रेताधिपो देवो निर्ऋतिर्नीलविग्रहः।**

**खड्गचर्मधरो देवो नैर्ऋते वै नमोऽस्तु ते॥**

मण्डलाद्बहिः दक्षिणे **भो निर्ऋते !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **निर्ऋतये** नमः, **निर्ऋतिम्** आवाहयामि स्थापयामि।

५७. पश्चिमे वरुणः -

**मन्त्रः - ॐ तत्त्वा यामि ब्रह्मणावन्दमानस्तदा शास्ते यजमानो हविर्भिः।**

**अहेडमानो व्वरुणेह बोध्युरुशꣳ स मा न आयुः प्रमोषीः॥ (२१/२)**

**भावार्थः** – हे वरुण ! यजमानः दत्तैः हविर्भिः यद् धनपुत्रादिकम् इच्छति तत् त्वामहं याचे। हे प्रभूतयशो वरुण ! तत् द्रव्यम् अक्रुध्यन् त्वं बुध्यस्व। अस्माकं जीवनं मा चोरय (पूर्णामायुर्देहि)॥

**श्लोकः – पाशहस्तात्मको देवो जलराजो महाबलः।**

**नीचगामी च विख्यातो जलराज नमोऽस्तु ते॥**

मण्डलाद्बहिः पश्चिमे **भो वरुण !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **वरुणाय** नमः, **वरुणम्** आवाहयामि स्थापयामि।

५९. वायव्ये वायुः –

**मन्त्रः – ॐ आ नो नियुद्भिः शतिनीभिरध्वरꣳ सहस्त्रिणीभिरुपयाहि यज्ञम्।**

**व्वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः॥ (२७/२८)**

**भावार्थः** – हे वायो ! त्वं शतं सहस्त्रं च संख्या ताभिः अश्वाभिः अस्माकं यज्ञम् आगच्छ। हे वायो। त्वम् अस्मिन् तृतीये सवने तृप्यस्व। हे देवाः ! यूयं सुवचोभिः सदा अस्मान् रक्षत॥

**श्लोकः – सर्वप्राणाधिपो देवः सर्वाङ्गो वायुरेव च।**

**द्विहस्तश्च महाप्राणस्तस्मात् प्राणाय वै नमः॥**

मण्डलाद्बहिः वायव्य **भो वायो !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **वायवे** नमः, **वायुम्** आवाहयामि स्थापयामि।

६०. उत्तरे सोमः –

**मन्त्रः – ॐ व्वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः।**

**प्रजावन्तः सचेमहि॥ (३/५६)**

**भावार्थः** – हे सोम ! वयं यजमानाः तव कर्मणि वर्तमानाः अस्माकं तनूषु अस्मदीयं चित्तं धारयन्तः त्वत्कारुण्यात् प्रजावन्तः पुत्रपौत्रादिसम्पन्नाः सन्तः सेवेमहि॥

**श्लोकः – नक्षत्राणां च सर्वेषां सोमो राजा प्रकीर्तितः।**

**गदाया धारिणे तुभ्यं सोमराजाय वै नमः॥**

मण्डलाद्बहिः उत्तरे **भो सोम !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **सोमाय** नमः, **सोमम्** आवाहयामि स्थापयामि।

६१. ईशाने ईशानः –

**मन्त्रः – ॐ तमीशानं जगतस्तस्थुषस्पतिं धियञ्जिन्वमवसे हूमहे व्वयम्।**

**पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये (२५/१८)**

**भावार्थः** – वयं जङ्गमस्य स्थावरस्य च भूतजातस्य पालकम् एवं सन्तोषकारकं तर्पयितुं तम् ईशानम् आह्वयामः।

**श्लोकः – सर्वयज्ञाधिपो देव ऐशानो नाम नामतः।**

**शूलपाणिर्महादेवस्त्रैलोक्याधिपते नमः॥**

मण्डलाद्बहिः ऐशान्यां **भो ईशान !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **ईशानाय** नमः, **ईशानम्** आवाहयामि स्थापयामि।

६२. पूर्वेशानमध्ये ब्रह्मा –

**मन्त्रः – ॐ अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः।**

**यः शꣳसते स्तुवते धायि पज्रऽइन्द्रज्येष्ठा अस्माँ२ अवन्तु देवाः॥ (३३/५०)**

**भावार्थः** – यः शस्त्राणि शंसते, स्तौति, यश्च उपार्जितानि धन-हवींषि प्रस्तौति तम् अस्माँश्च धनादिसेक्ता रुद्रः, पर्वते युद्धाह्वने, वृत्रहत्यायाञ्च सप्रीतयः, इन्द्रनेतारो देवाः, दुःखितेभ्यो अवन्तु॥

**श्लोकः – चतुर्वेदश्चतुर्बाहुश्चतुर्वेदकरः प्रभुः।**

**हंसारूढः सृष्टिकर्ता ऊर्ध्वं वै ब्रह्मणे नमः॥**

मण्डलाद्बहिः पूर्वेशानयोर्मध्ये **भो ब्रह्मन् !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **ब्रह्मणे** नमः, **ब्रह्माणम्** आवाहयामि स्थापयामि।

६३. निर्ऋतिपश्चिममध्ये अनन्तः –

**मन्त्रः – ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी।**

**यच्छा नः शर्म सप्रथाः॥ (३६/१३)**

**भावार्थः** – हे पृथिवि ! त्वम् अस्माकं सुखरूपा अकण्टका साधुप्रतिष्ठाना च भव। अस्मान् सर्वतः पृथुः शरणं यच्छ॥

**श्लोकः – पन्नगानां च सर्वेषामनन्त इति नामतः।**

**पाताले वसते नित्यं नागराजाय ते नमः॥**

मण्डलाद्बहिः निर्ऋतिपश्चिमयोर्मध्ये **भो अनन्त !** इहागच्छ इह तिष्ठ ॐ भूर्भुवः स्वः **अनन्ताय** नमः, **अनन्तम्** आवाहयामि स्थापयामि।

(हेतुकादयः कृताकृताः पूर्वादिक्रमेण)

१. हेतुकाय नमः हेतुकम् आवाहयामि स्थापयामि।

२. त्रिपुरान्तकाय नमः त्रिपुरान्तकम् आवाहयामि स्थापयामि।

३. अग्निवेतालाय नमः अग्निवेतालम् आवाहयामि स्थापयामि।

४. अग्निजिह्वाय नमः अग्निजिह्वम् आवाहयामि स्थापयामि।

५. महाकालाय नमः महाकालम् आवाहयामि स्थापयामि।

६. करालाय नमः करालम् आवाहयामि स्थापयामि।

७. एकपदे नमः एकपदम् आवाहयामि स्थापयामि।

८. भीमरूपाय नमः भीमरूपम् आवाहयामि स्थापयामि।

९. अद्भ्यो नमः अपः आवाहयामि स्थापयामि।

१०. क्षितिरूपाय नमः क्षितिरूपम् आवाहयामि स्थापयामि।

मनोजूतिरिति प्रतिष्ठाप्य **ॐ भूर्भुवःस्वः शिख्यादिवास्तुमण्डलदेवताभ्यो** नमः इत्यनेन यथोपचारैः संपूजयेत्॥

**सङ्कल्पः – अनया पूजया शिख्यादिवास्तुमण्डलदेवताः प्रीयन्तां न मम॥**

## शब्दार्थाः

**गोष्ठानम्** – गवां स्थानम्, **मा मौक्** – मा मुञ्च, **रिप्रम्** – सर्वपापदाहकम्, **एनसः** – पापत्, **वेतु** – पिबतु, **चोदय** – प्रेरय, **नीहारेण** – अविद्यया, **पायुभिः** – पालनैः, **अहेडमानः** – अक्रुध्यन्, **मादयस्व** – तृप्यस्व, **तस्थुषः** – स्थावरस्य, **भरहूतौ** – संग्रामाह्वने, **सजोषाः** – समानप्रीतयः, **पज्रः** – प्रजार्तिधनः, **स्योना** – सुखरूपा, **अनृक्षरा** – अकण्टका, **सप्रथाः** – सर्वतः, **विस्तृता** – पृथुः॥

## स्वाध्यायः

**१. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) 'वेतु' इति शब्दस्य ......... अर्थः भवति। (वहतु / वदतु / पिबतु)

(२) 'प्रेरय' इति शब्दस्य ......... पर्यायवाची अस्ति। (शोधय / चोदय / प्रकाशय)

(३) 'तस्थुषः' इति शब्द ......... विभक्तिः भवति। (प्रथमा / तृतीया / षष्ठी)

(४) 'अकण्टका' इत्यस्य कृते पाठे ......... शब्दः प्रयुक्तः। (निष्कण्टका / नृक्षरा / अनृक्षरा)

(५) 'सर्वतः' इत्यस्य कृते पाठे ......... शब्दः प्रयुक्तः। (सुपृथाः / सुप्रथाः / सप्रथाः)

**२. निम्नलिखितप्रश्नानाम् एकवाक्येन उत्तरं लिखत।**

(१) आपवत्सस्य निवासः कुत्र, तस्य वाहनञ्च किं वर्तते ?

(२) मित्रस्य स्थापनं वास्तोः कस्मिन्नङ्गे भवति ?

(३) ब्रह्मणः स्थापनं कतिपदेषु भवति ?

(४) विदार्याः स्थापनं कुत्र भवति ?

(५) निर्ऋतेः स्थापनं वास्तोः कस्यां दिशि भवति ?

(६) पाशहस्तो देवः कः ?

(७) ब्रह्मणः वाहनं किम् ?

(८) सर्वयज्ञाधिपो देवः कः ?

(९) शक्तिहस्तो देवः कः ?

(१०) धर्माध्यक्षो देवः कः ?

**३. निम्नलिखितप्रश्नानां सविस्तरम् उत्तरं लिखत।**

(१) प्रथमद्वितीय-पाठयोः माध्यमेन वयं किं ज्ञातवन्तः ? इति टिप्पणीं कुर्वन्तु।

(२) शल्यमेदिनीदोषाः कति ? के च ते ?

(३) हेतुकादयः कृताकृताः पूर्वादिक्रमेण निरूपयन्तु।

**४. निम्नलखितमन्त्राणां पूर्तिं कृत्वा भावार्थं लिखत।**

(१) ॐ पृथिवी देवयजन्यो ......... ०।

(२) ॐ असुन्वन्तम ......... ०।

(३) ॐ त्वन्नोऽअग्ने ......... ०।

(४) ॐ हींकाराय स्वाहा हींकृताय ......... ०।

(५) ॐ अस्मे रुद्रा ......... ०।

**५. ‘क’ विभागस्य देवतानां ‘ख’ विभागस्य देवैः सह उचितं मेलनं कुरुत।**

| **‘क’ विभागः** | **‘ख’ विभागः** |
|---|---|
| (१) पापराक्षसी। | (१) वामस्तने। |
| (२) पृथिवीधरः। | (२) दक्षिणे। |
| (३) पिलिपिच्छः। | (३) निर्ऋतिपश्चिममध्ये। |
| (४) यमः। | (४) वायव्ये। |
| (५) अनन्तः। | (५) उत्तरे। |

**छात्रप्रवृत्तिः**

- अस्मिन् पाठे देवतानां विविधदिक्षु निवासः २१ मन्त्रेषु निर्दिष्टः तेषां देवतानामानि दिशा उभयोः स्फोरकपत्रे (चार्ट-पेपर-मध्ये) कोष्ठकं निर्माय कक्षायां स्थापयन्तु।

**अध्यापकप्रवृत्तिः**

- अष्टशल्यमेदिनीदोषानां विषये शिक्षकः विशेषं विस्तृतं ज्ञानं दद्यात्।

●

# ४ मण्डपप्रवेशः

**प्रस्तावना**

कस्याऽपि यज्ञस्य शोभा सुन्दरेण मण्डपेन एव भवति। अस्माकं यज्ञीयपरम्परायां मण्डपः कीदृशः भवेत् एतदपि विशदं वर्णितं वर्तते। कारणं मण्डपः ईश्वरस्वरूपः अस्ति। अस्मिन्नेव मण्डपे ऋचः पठ्यन्ते, आहुतयः दीयन्ते, प्रार्थनादिकं च क्रियते। देवब्राह्मणानुज्ञां प्राप्य यजमानः वर्धिनीकलशेन साकं मण्डपं प्रविशेत्।

सपत्नीको यजमानो पत्नीहस्तयोः वर्धिनीकलशं दत्त्वा तां अग्रतः कृत्वा शान्तिसूक्तादिभिः वेदमङ्गलघोषेण यथोक्तप्रकारेण निर्मितं मण्डपं प्रदक्षिणीकृत्य पश्चिमद्वारि कुम्भं निधाय उपविशेत्।

---

संकल्पः - प्रारब्धस्य कर्मणः साङ्गतासिद्ध्यर्थं मण्डपप्रवेशाङ्गभूतं भूमिपूजनादिकं करिष्ये।

अक्षतान् गृहीत्वा भूमिं ध्यायेत् -

चतुर्भुजां शुक्लवर्णां कूर्मपृष्ठोपरि स्थिताम्।

शंखपद्मधरां चक्रशूलयुक्तां धरां भवेत्।

आगच्छ देवि कल्याणि वसुधे लोकधारिणि।

पृथिवि ब्रह्मदत्तासि काश्यपेनाभिवन्दिता॥

**ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्**

**पिपृतां नो भरीमभिः॥**

ॐ भूर्भुवः स्वः सांगायै सपरिवारायै भूम्यै नमः इति पंचोपचारैः सम्पूज्य।

**पुष्पांजलिमादायः**

उद्धृतासि वराहेण कृष्णेन शतबाहुना।

दंष्ट्राग्रे लीलया देवि यज्ञे भार्गवि रम्यताम्॥ इति दण्डवत् प्रणम्य।

ततो अर्घपात्रं गृहीत्वा जानुभ्यां धरणीं स्थित्वा अर्घं दद्यात्।

ब्रह्मणा निर्मिते देवि विष्णुना शंकरेण च।

पार्वत्या चैव गायत्र्या स्कन्देन श्रवणेन च॥ १॥

यमेन पूजिते देवि धर्मस्य विजिगीषया।

सौभाग्यं देहि पुत्राँश्च धनं रूपं च पूजिते।

गृहाणार्घमिमं देवि सौभाग्यं च प्रयच्छ मे॥ २॥

ॐ भूर्भुवः स्वः सांगायै सपरिवारायै भूम्यै नमः अर्घं समर्पयामि।

ततो गन्धादिना सम्पूज्य -

उपचारानिमान् तुभ्यं ददामि परमेश्वरि।

भक्त्या गृहाण देवेशि त्वामहं शरणं गतः॥

ततो गन्ध-पुष्प-पायस- लाजासहितं सदीपं बलिं निधाय-

ॐ भूर्भुवः स्वः सांगायै सपरिवरायै भूम्यै नमः आसादितं सदीपं बलिं समर्पयामि।

**प्रार्थना:**

नन्दे नन्दस्य वासिष्ठि वसुभिः प्रजया सह।
जये भार्गवि दायादे प्रजानां जयमावह॥
पूर्णे गिरिशदायादे पूर्णान् कामान् कुरुष्व मे।
भद्रे काश्यपि दायादे कुरु भद्रां मतिं मम॥
सर्वबीजसमायुक्ते सर्वरत्नोषधीवृते।
रुचिरे नन्दने नन्दे वासिष्ठि रम्यतामिह॥
प्रजापतिसुते देवि चतुरस्त्रे महीयसि।
सुभगे सुव्रते देवि यज्ञे भार्गवि रम्यताम्॥
पूजिते परमाचार्यैर्गन्धमाल्यैरलंकृते।
भवभूतिकरि देवि यज्ञे काश्यपि रम्यताम्॥
अव्यक्ते वादृते पूर्णे शुभ्रे चांगिरसः सुते।
इष्टदे त्वं प्रयच्छेष्टं त्वामहं शरणं गतः॥
देशस्वामिपुरस्वामिगृहस्वामिपरिग्रहे।
मनुष्यधनहस्त्यश्वपशुवृद्धिकरी भव॥

ततो यजमानो मण्डपद्वार-तोरण-फलक-ध्वज-पताका-शिखरादिकं ॐ मण्डपदेवताभ्योः नमः इति गन्धाक्षतपुष्पैः सम्पूज्य।

यजमानः - भो आचार्य प्रविशानि?

आचार्यः - सुखेन प्रविश।

इत्यनुज्ञातः पत्नी हस्तयोः वर्धिनीकलशं दत्त्वा तामग्रतः कृत्वा दक्षिणपादेन प्रविश्य द्वारवामशाखां दक्षिणांसेन स्पृशन् अधोलिखितमन्त्रेण मन्त्रद्वयेन साचार्यर्त्विक् सपत्निको यजमानः प्रविश्य आग्नेय्यां वा ब्रीहिराशौ वर्धिनीकलशं स्थापयेत्।

**ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः।**

**व्वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥**

**ॐ उपइताऽइहगावऽइपइताऽअजवयः। अथो अन्नस्य कीलालऽउपइतो ग्रहेषुनः। क्षेमय वः शन्त्यै प्रपद्ये शिव ꣳ शग्म ꣳ शंयोः शयोः॥**

ततो मण्डपस्य ऐशान्यां ग्रहपीठादधःकोणे लाजा-सर्षप-ब्रीहिराशिं कृत्वा साक्षातपूर्णपात्रं कलशं निधाय पूर्णपात्रे नवग्रहान् नाममन्त्रैः आवाह्य सम्पूज्य विसृज्य तं कलशमादाय ऐशानीमारभ्य ऐशानीपर्यन्तं जलधारां दुग्धधारां च प्रदक्षिणक्रमेण पातयेत्। त्रिगुणीकृतसूत्रेण मण्डपं वेष्टयेत्।

**समाचारात् मण्डपस्थषोडशस्तम्भपूजनम् :**

यजमानो मण्डपान्तः प्राङ्मुख उपविश्य सङ्कल्पं कुर्यात्-अद्येत्यादि-पूर्वोच्चारितशुभपुण्यतिथौ क्रियमाणप्रतिष्ठाकर्माङ्गत्वेन मण्डपस्थषोडशस्तम्भदेवतानामावाहनादिकं करिष्ये।

**१. मध्यवेद्याः ईशानस्तम्भे ब्रह्मा -**

**ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो व्वेनऽआवः।**
**सबुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः॥**

मध्यवेद्याः ईशानस्तम्भे ॐ भूर्भुवः स्वः **ब्रह्मणे** नमः **ब्रह्माणम्** आवाहयामि स्थापयामि॥ १॥

ॐ भूर्भुवः स्वः सावित्र्यै नमः सावित्रीम् आवाहयामि स्थापयामि॥ २॥

ॐ भूर्भुवः स्वः वास्तुदेवतायै नमः वास्तुदेवताम् आवाहयामि स्थापयामि॥ ३॥

ॐ भूर्भुवः स्वः ब्राह्म्यै नमः ब्राह्मीम् आवाहयामि स्थापयामि॥ ४॥

ॐ भूर्भुवः स्वः गङ्गायै नमः गङ्गाम् आवाहयामि स्थापयामि॥ ५॥

ॐ ब्रह्मादिदेवताभ्यो नमः इति मन्त्रेण सम्पूजयेत्।

**स्तम्भमालभ्य - ॐ ऊर्ध्वऽ ऊषुणऽ ऊतये तिष्ठा देवो न सविता।**

**ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभिर्वाधद्भिर्व्विह्वयामहे॥(११/४२)**

स्तम्भग्रे - ॐ नागमात्रे नमः इति शाखामालभ्य -

**ॐ आयङ्गौः पृश्निरक्क्रमीदसदन्मातरम्पुरः।**

**पितरञ्च प्रयन्त्स्वः॥**

इति शाखाबन्धनम्।

**ॐ यतो यतः समीहसे ततो नोऽअभयं कुरु।**

**शन्नः कुरु प्रजाभ्यो भयन्नः पशुभ्यः॥**

इति मन्त्रेण शाखामनुमन्त्र्य स्तम्भानुमन्त्रणम्॥

**२. मध्यवेद्याः आग्नेयस्तम्भे विष्णुः**

**ॐ इदं विष्णुर्विचक्क्रमे त्रेधा निदधे पदम्।**

**समूढमस्य पाꣳसुरे स्वाहा॥**

ॐ मध्यवेद्याः आग्नेयस्तम्भे ॐ भूर्भुवः स्वःविष्णवे नमः विष्णुम् आवाहयामि स्थापयामि॥ १॥

ॐ भूर्भुवः स्वः लक्ष्म्यै नमः लक्ष्मीम् आवाहयामि स्थापयामि॥ २॥

ॐ भूर्भुवः स्वः नन्दायै नमः नन्दाम् आवाहयामि स्थापयामि॥ ३॥

ॐ भूर्भुवः स्वः वैष्णव्यै नमः वैष्णवीम् आवाहयामि स्थापयामि॥ ४॥

इत्यावाह्य विष्णवादिदेवताभ्यो नमः इति मन्त्रेण सम्पूजयेत्। स्तम्भमालभ्य - **ॐ ऊर्ध्वऽऊषुणऽऊतये...**

स्तम्भाग्रे ॐ नागमात्रे नमः इति शाखमालभ्य -

ॐ आयङ्गौः - इति शाखाबन्धनम्

ॐ यतो यतः इति मन्त्रेण शाखामनुमन्त्र्य स्तम्भानुमन्त्रणम्।

**३. मध्यवेदीनैर्ऋत्यस्तम्भे शङ्करः -**

**ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय नमः शिवाय च शिवतराय च।**

मध्यवेद्याः नैर्ऋत्यस्तम्भे ॐ भूर्भुवः स्वः शङ्करम् आवाहयामि स्थापयामि॥ १॥

ॐ भूर्भुवः स्वः गौर्यै नमः गौरीम् आवाहयामि स्थापयामि॥ २॥

ॐ भूर्भुवः स्वः माहेश्वर्यै नमः माहेश्वरीम् आवाहयामि स्थापयामि॥ ३॥

ॐ भूर्भुवः स्वः शौभनायै नमः शोभनाम् आवाहयामि स्थापयामि॥ ४॥

इत्यावाह्य ॐ शङ्करादिदेवताभ्यो नमः इति मन्त्रेण सम्पूजयेत्। स्तम्भमालभ्य - **ॐ ऊर्ध्वऽऊषुणऽऊतये...**

स्तम्भाग्रे ॐ नागमात्रे नमः इति शाखामालभ्य -

ॐ **आयङ्गौः** - इति शाखाबन्धनम्

ॐ **यतो यत:** इति मन्त्रेण शाखामनुमन्त्र्य स्तम्भानुमन्त्रणम्।

**४. मध्यवेदीवायव्यस्तम्भे इन्द्र:**

**त्रातारमिन्द्रमवितारमिन्द्र ꣳ हवे हवे सुहवꣳ शूरमिन्द्रम्।**

**ह्वयामि शक्रं पुरुहूतमिन्द्रꣳस्वस्ति नो मघवा धात्विन्द्र:॥**

मध्यवेद्या: वायव्यस्तम्भे ॐ भूर्भुव: स्व: इन्द्राय नम: इन्द्रम् आवाहयामि स्थापयामि॥ १॥

ॐ भूर्भुव: स्व: इन्द्राण्यै नम: इन्द्राणीम् आवाहयामि स्थापयामि॥ २॥

ॐ भूर्भुव: स्व: आनन्दायै नम: आनन्दाम् आवाहयामि स्थापयामि॥ ३॥

ॐ भूर्भुव: स्व: विभूत्यै नम: विभूतिम् आवाहयामि स्थापयामि॥ ४॥

इत्यावाह्य ॐइन्द्रादिदेवताभ्यो नम: इति मन्त्रेण सम्पूजयेत्। स्तम्भमालभ्य - ॐ ऊर्ध्वऽऊषुणऽऊतये...

स्तम्भाग्रे ॐ नागमात्रे नम: इति शाखामालभ्य -

ॐ **आयङ्गौ:** - इति शाखाबन्धनम्

ॐ यतो यत: इति मन्त्रेण शाखामनुमन्त्र्य स्तम्भानुमन्त्रणम्।

ततो यजमानो मण्डपाद् बहिरागत्य ईशानकोणादारभ्य प्रादक्षिणेन शेषद्वादशस्तम्भान् पूजयेत्।

**५. ईशानस्तम्भे सूर्य:** -

**ॐ आकृष्णेन रजसा व्वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च।**

**हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥**

ईशानस्तम्भे ॐ भूर्भुव: स्व: सूर्याय नम: सूर्यम् आवाहयामि स्थापयामि॥ १॥

ॐ भूर्भुव: स्व: शङ्करात्मने नम: शङ्करात्मानम् आवाहयामि स्थापयामि॥ २॥

ॐ भूर्भुव: स्व: सावित्र्यै नम: सावित्रीम् आवाहयामि स्थापयामि॥ ३॥

ॐ भूर्भुव: स्व: मङ्गलायै नम: मङ्गलाम् आवाहयामि स्थापयामि॥ ४॥

इत्यावाह्य ॐ सूर्यादिदेवताभ्यो नम: इति मन्त्रेण सम्पूजयेत्। स्तम्भमालभ्य - **ॐ ऊर्ध्वऽऊषुणऽऊतये...**

स्तम्भाग्रे ॐ नागमात्रे नम: इति शाखामालभ्य -

ॐ **आयङ्गौ:** - इति शाखाबन्धनम्

ॐ यतो यत: इति मन्त्रेण शाखामनुमन्त्र्य स्तम्भानुमन्त्रणम्।

**६. ईशानपूर्वान्तरालस्तम्भे गणेश:** -

**ॐ गणानान्त्वा गणपतिꣳ हवामहे प्प्रियाणान्त्वा प्रियपति ꣳ हवामहे निधीनान्त्वा निधिपति ꣳ हवामहे व्वसोमम। आहमजानि गर्भधमात्वमजासि गर्भधम्॥**

ईशानपूर्वान्तरालस्तम्भे ॐ भूर्भुव: स्व: गणपतये नम: गणपतिम् आवाहयामि स्थापयामि॥ १॥

ॐ भूर्भुव: स्व: सरस्वत्यै नम: सरस्वतीम् आवाहयामि स्थापयामि॥ २॥

ॐ भूर्भुव: स्व: विघ्नहारिण्यै नम: विघ्नहारिणीम् आवाहयामि स्थापयामि॥ ३॥

ॐ भूर्भुव: स्व: जयायै नम: जयाम् आवाहयामि स्थापयामि॥ ४॥

इत्यावाह्य गणपत्यादिदेवताभ्यो नम: इति मन्त्रेण सम्पूजयेत्। स्तम्भमालभ्य - **ॐ ऊर्ध्वऽऊषुणऽऊतये...**

स्तम्भाग्रे ॐ नागमात्रे नम: इति शाखामालभ्य -

ॐ आयङ्गौ: - इति शाखाबन्धनम्

ॐ यतो यत: इति मन्त्रेण शाखामनुमन्त्र्य स्तम्भानुमन्त्रणम्।

**७. पूर्वाग्नेयान्तरालस्तम्भे यम: -**

**ॐ यमायत्वाङ्गिरस्वते पितृमते स्वाहा। स्वाहा घर्माय स्वाहा घर्म: पित्रे॥**

पूर्वाग्नेयान्तपालस्तम्भे ॐ भूर्भुव: स्व: यमाय नम: यमम् आवाहयामि स्थापयामि॥ १॥

ॐ भूर्भुव: स्व: पूर्वसन्ध्यायै नम: पूर्वसन्ध्याम् आवाहयामि स्थापयामि॥ २॥

ॐ भूर्भुव: स्व: अञ्जन्यै नम: अञ्जनीम् आवाहयामि स्थापयामि॥ ३॥

ॐ भूर्भुव: स्व: क्रूरायै नम: क्रूराम् आवाहयामि स्थापयामि॥ ४॥

ॐ भूर्भुव: स्व: नियन्त्र्यै नम: नियन्त्रीम् आवाहयामि स्थापयामि॥ ५॥

इत्यावाह्य ॐ यमादिदेवताभ्यो नम: इति मन्त्रेण सम्पूजयेत्। स्तम्भमालभ्य - **ॐ ऊर्ध्वऽऊषुणऽऊतये...**

स्तम्भाग्रे ॐ नागमात्रे नम: इति शाखामालभ्य -

ॐ आयङ्गौ: - इति शाखाबन्धनम्

ॐ यतो यत: इति मन्त्रेण शाखामनुमन्त्र्य स्तम्भानुमन्त्रणम्।

**८. बाह्याग्नेयकोणस्तम्भे नागराज: -**

**ॐ आयङ्गौ: पृश्निरक्रमीदसदन्मातरम्पुर:।**

**पितरञ्च प्रयन्त्स्व:॥**

बाह्याग्नेयकोणस्तम्भे ॐ भूर्भुव: स्व: नागराजाय नम: नागराजम् आवाहयामि स्थापयामि॥ १॥

ॐ भूर्भुव: स्व: मध्यमसन्ध्यायै नम: मध्यमसन्ध्याम् आवाहयामि स्थापयामि॥ २॥

ॐ भूर्भुव: स्व: धरायै नम: धराम् आवाहयामि स्थापयामि॥ ३॥

ॐ भूर्भुव: स्व: महापद्मायै नम: महापद्माम् आवाहयामि स्थापयामि॥ ४॥

इत्यावाह्य नागराजादिदेवताभ्यो नम: इति मन्त्रेण सम्पूजयेत्। स्तम्भमालभ्य - **ॐ ऊर्ध्वऽऊषुणऽऊतये...**

स्तम्भाग्रे ॐ नागमात्रे नम: इति शाखामालभ्य -

ॐ आयङ्गौ: - इति शाखाबन्धनम्

ॐ यतो यत: इति मन्त्रेण शाखामनुमन्त्र्य स्तम्भानुमन्त्रणम्।

**९. आग्नेयदक्षिणान्तरालस्तम्भे स्कन्द: -**

**ॐ यदक्रन्द: प्रथमञ्जायमानऽउद्यन्त्समुद्रादुतवा पुरीषात्।**

**श्येनस्य पक्षा हरिणस्य बाहूऽउपस्तुत्यं महिजातं ते ऽ अर्वन्॥**

आग्नेयदक्षिणान्तरालस्तम्भे ॐ भूर्भुव: स्व: स्कन्दाय नम: स्कन्दम् आवाहयामि स्थापयामि॥ १॥

ॐ भूर्भुव: स्व: पश्चिमसन्ध्यायै नम: पश्चिमसन्ध्याम् आवाहयामि स्थापयामि॥ २॥

ॐ भूर्भुव: स्व: जयायै नम: जयाम् आवाहयामि स्थापयामि॥ ३॥

ॐ भूर्भुव: स्व: शक्तये नम: शक्तिम् आवाहयामि स्थापयामि॥ ४॥

इत्यावाह्य ॐ स्कन्दादिदेवताभ्यो नम: इति मन्त्रेण सम्पूजयेत्। स्तम्भमालभ्य - **ॐ ऊर्ध्वऽऊषुणऽऊतये...**

स्तम्भाग्रे ॐ नागमात्रे नम: इति शाखामालभ्य -

ॐ आयङ्गौ: - इति शाखाबन्धनम्

ॐ यतो यत: इति मन्त्रेण शाखामनुमन्त्र्य स्तम्भानुमन्त्रणम्।

**१०. दक्षिणनैऋत्यान्तरालस्तम्भे वायुः -**

**ॐ आनो नियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम्।**

**व्वायो ऽ अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः॥**

दक्षिणनैऋत्यान्तरालस्तम्भे ॐ भूर्भुवः स्वः वायवे नमः वायुम् आवाहयामि स्थापयामि॥ १॥

ॐ भूर्भुवः स्वः वायव्यै नमः वायवीम् आवाहयामि स्थापयामि॥ २॥

ॐ भूर्भुवः स्वः मध्यमसन्ध्यायै नमः मध्यमसन्ध्याम् आवाहयामि स्थापयामि॥ ३॥

ॐ भूर्भुवः स्वः गायत्र्यै नमः गायत्रीम् आवाहयामि स्थापयामि॥ ४॥

इत्यावाह्य ॐ वायव्यादिदेवताभ्यो नमः इति मन्त्रेण सम्पूजयेत्। स्तम्भमालभ्य - **ॐ ऊर्ध्वऽऊषुणऽऊतये...**

स्तम्भाग्रे ॐ नागमात्रे नमः इति शाखामालभ्य -

ॐ आयङ्गौः - इति शाखाबन्धनम्

ॐ यतो यतः इति मन्त्रेण शाखामनुमन्त्र्य स्तम्भानुमन्त्रणम्।

**११. बाह्यनैर्ऋत्यस्तम्भे सोमः -**

**ॐ आप्यायस्व समेतु ते व्विश्वतः सोम वृष्ण्यम्।**

**भवा व्वाजस्य संगथे॥**

बाह्यनैर्ऋत्यस्तम्भे ॐ भूर्भुवः स्वः सोमाय नमः सोमम् आवाहयामि स्थापयामि॥ १॥

ॐ भूर्भुवः स्वः सावित्र्यै नमः सावित्रीम् आवाहयामि स्थापयामि॥ २॥

ॐ भूर्भुवः स्वः अमृतकलायै नमः अमृतकलाम् आवाहयामि स्थापयामि॥ ३॥

ॐ भूर्भुवः स्वः विजयायै नमः विजयाम् आवाहयामि स्थापयामि॥ ४॥

ॐ भूर्भुवः स्वः पश्चिमसन्ध्यायै नमः पश्चिमसन्ध्याम् आवाहयामि स्थापयामि॥ ५॥

इत्यावाह्य ॐ सोमादिदेवताभ्यो नमः इति मन्त्रेण सम्पूजयेत्। स्तम्भमालभ्य - **ॐ ऊर्ध्वऽऊषुणऽऊतये...**

स्तम्भाग्रे ॐ नागमात्रे नमः इति शाखामालभ्य -

ॐ आयङ्गौः - इति शाखाबन्धनम्

ॐ यतो यतः इति मन्त्रेण शाखामनुमन्त्र्य स्तम्भानुमन्त्रणम्।

**१२. नैर्ऋत्यपश्चिमान्तरालस्तम्भे वरुणः -**

**ॐ इमम्मे वरुण श्रुधी हवमद्या च मृडय।**

**त्वामवस्युराचके॥**

नैर्ऋत्यपश्चिमान्तरालस्तम्भे ॐ भूर्भुवः स्वः वरुणाय नमः वरुणम् आवाहयामि स्थापयामि॥ १॥

ॐ भूर्भुवः स्वः वारुण्यै नमः वारुणीम् आवाहयामि स्थापयामि॥ २॥

ॐ भूर्भुवः स्वः पाशधारिण्यै नमः पाशधारिणीम् आवाहयामि स्थापयामि॥ ३॥

ॐ भूर्भुवः स्वः बृहस्पत्यै नमः बृहस्पतीम् आवाहयामि स्थापयामि॥ ४॥

इत्यावाह्य ॐ वरुणादिदेवताभ्यो नमः इति मन्त्रेण सम्पूजयेत्। स्तम्भमालभ्य - **ॐ ऊर्ध्वऽऊषुणऽऊतये...**

स्तम्भाग्रे ॐ नागमात्रे नमः इति शाखामालभ्य -

ॐ आयङ्गौः - इति शाखाबन्धनम्

ॐ यतो यतः इति मन्त्रेण शाखामनुमन्त्र्य स्तम्भानुमन्त्रणम्।

**१३. पश्चिमवायव्यान्तरालस्तम्भे अष्ट वसवः -**

**ॐ सुगावो देवाः सदना ऽ अकर्म यऽ आजग्मेदᳬं सवनं जुषाणाः।**

**भरमाणा व्वहमाना हवीᳬंष्यस्मे धत्त व्वसवो व्वसूनि स्वाहा॥**

पश्चिमवायव्यान्तरालस्तम्भे ॐ भूर्भुवः स्वः अष्ट-वसुभ्यो नमः अष्टवसून् आवाहयामि स्थापयामि॥ १॥

ॐ भूर्भुवः स्वः विनतायै नमः विनताम् आवाहयामि स्थापयामि॥ २॥

ॐ भूर्भुवः स्वः आणिमायै नमः अणिमाम् आवाहयामि स्थापयामि॥ ३॥

ॐ भूर्भुवः स्वः विभूत्यै नमः विभूतिम् आवाहयामि स्थापयामि॥ ४॥

ॐ भूर्भुवः स्वः गरिमायै नमः गरिमाम् आवाहयामि स्थापयामि॥ ४॥

इत्यावाह्य ॐ वस्वादिदेवताभ्यो नमः इति मन्त्रेण सम्पूजयेत्। स्तम्भमालभ्य - **ॐ ऊर्ध्वऽऊषुणऽऊतये...**

स्तम्भाग्रे ॐ नागमात्रे नमः इति शाखामालभ्य -

ॐ आयङ्गौः - इति शाखाबन्धनम्

ॐ यतो यतः इति मन्त्रेण शाखामनुमन्त्र्य स्तम्भानुमन्त्रणम्।

**१४. बाह्यवायव्यस्तम्भे धनदः -**

**ॐ व्वय ᳬं सोम व्रते तव मनस्तनूषु विभ्रतः।**

**प्रजावन्तः सचेमहि॥**

बाह्यवायव्यस्तम्भे ॐ भूर्भुवः स्वः धनदाय नमः धनदम् आवाहयामि स्थापयामि।

ॐ भूर्भुवः स्वः अदित्यै नमः अदितिम् आवाहयामि स्थापयामि।

ॐ भूर्भुवः स्वः लघिमायै नमः लघिमाम् आवाहयामि स्थापयामि।

ॐ भूर्भुवः स्वः सिनीवाल्यै नमः सिनीवालीम् आवाहयामि स्थापयामि।

इत्यावाह्य ॐ धनदादिदेवताभ्यो नमः इति मन्त्रेण सम्पूजयेत्। स्तम्भमालभ्य - **ॐ ऊर्ध्वऽऊषुणऽऊतये...**

स्तम्भाग्रे ॐ नागमात्रे नमः इति शाखामालभ्य -

ॐ आयङ्गौः - इति शाखाबन्धनम्

ॐ यतो यतः इति मन्त्रेण शाखामनुमन्त्र्य स्तम्भानुमन्त्रणम्।

**१५. वायव्योत्तरान्तरालस्तम्भे बृहस्पतिः -**

**ॐबृहस्पतेऽ अतियदर्योऽअर्हा द्युमद्विभाति क्रतुमज्जनेषु।**

**यद्दीदयच्छवसऽऋतप्रजा ततदस्मासु द्रविणं धेहि चित्रम्॥**

वायव्योत्तरान्तरालस्तम्भे ॐ भूर्भुवः स्वः बृहस्पतये नमः बृहस्पतिम् आवाहयामि स्थापयामि॥ १॥

ॐ भूर्भुवः स्वः पूर्णमास्यै नमः पूर्णमासीम् आवाहयामि स्थापयामि॥ २॥

ॐ भूर्भुवः स्वः सावित्र्यै नमः सावित्रीम् आवाहयामि स्थापयामि॥ ३॥

इत्यावाह्य ॐ बृहस्पत्यादिदेवताभ्यो नमः इति मन्त्रेण सम्पूजयेत्। स्तम्भमालभ्य - **ॐ ऊर्ध्वऽऊषुणऽऊतये...**

स्तम्भाग्रे ॐ नागमात्रे नमः इति शाखामालभ्य -

ॐ आयङ्गौः - इति शाखाबन्धनम्

ॐ यतो यतः इति मन्त्रेण शाखामनुमन्त्र्य स्तम्भानुमन्त्रणम्।

**१६. उत्तरेशानान्तरालस्तम्भे विश्वकर्मा: -**

**ॐ विश्वकर्मन् हविषा वावृधान: स्वयं यजस्व पृथिवीमुत द्याम्।**

**मुह्यान्त्वन्ये अभित: सपत्नाऽइहास्माकं मघवा सूरिरस्तु॥**

उत्तरेशानान्तरालस्तम्भे ॐ भूर्भुव: स्व: विश्वकर्मणे नम: विश्वकर्माणम् आवाहयामि स्थापयामि॥ १॥

ॐ भूर्भुव: स्व: सिनीवाल्यै नम: सिनीवालीम् आवाहयामि स्थापयामि॥ २॥

ॐ भूर्भुव: स्व: वास्तुदेवतायै नम: वास्तुदेवताम् आवाहयामि स्थापयामि॥ ३॥

ॐ भूर्भुव: स्व: सावित्र्यै नम: सावित्रीम् आवाहयामि स्थापयामि॥ ४॥

इत्यावाह्य ॐ विश्वकर्मादिदेवताभ्यो नम: इति मन्त्रेण सम्पूजयेत्। स्तम्भमालभ्य - **ॐ ऊर्ध्वऽऊषुणऽऊतये...**

स्तम्भाग्रे ॐ नागमात्रे नम: इति शाखामालभ्य -

ॐ आयङ्गौ: - इति शाखाबन्धनम्

ॐ यतो यत: इति मन्त्रेण शाखामनुमन्त्र्य स्तम्भानुमन्त्रणम्।

**इति मण्डपस्थषोडशस्तम्भपूजनम्**

## शब्दार्था:

**विजिगीषा** - जेतुमिच्छा, **उपचार:** - पूजायामावश्यकं वस्तु, **दायदा** - पुत्री, **रुचिरा** - प्रकाशिता, **महीयसी** - विशाला, **इष्टदा** - अभिलषितदायिनी, **फलकम्** - शिला, **पताका** - ध्वज:, **दक्षिणांस** - दक्षिणबाहु:, **लाजा** - आर्द्रधान्यम्॥

## स्वाध्याय:

**१. कोष्ठकप्रदत्तविकल्पेभ्य: योग्यं विकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) वर्धिनीकलशं ......... धारयति। (यजमान: / यजमानपत्नी / पुरोहित:)

(२) मण्डप: ......... स्वरूप: अस्ति। (वसु / इन्द्र / ईश्वर)

(३) यज्ञस्य शोभा ......... अस्ति। (मण्डपम् / वेदी / स्थापनम्)

(४) ब्रह्मणा ......... देवि। (संस्थिते / निर्मिते / वाहिते)

(५) आगच्छ देवि .........। (भद्राणि / कल्याणि / मातस्त्वम्)

(६) प्रजावन्त: .........। (सचेमहि / च कुर्महे / देवा:)

**२. श्लोकपूर्तिं कुरुत।**

(१) उपचारानिमान् ......... गत:।

(२) नन्दे नन्दय ......... जयमावह।

(३) उद्धृताऽसि ......... रम्यताम्।

**३. मन्त्रपूर्तिं कुरुत।**

(१) सुगावो देवा .........

(२) ऊर्ध्वऽऊषुण .........

(३) व्वयꣳ .........

**४. योग्यं योजनं कुर्वन्तु।**

| अ | | ब |
|---|---|---|
| (१) ईशानस्तम्भे | - | (१) धनदः |
| (२) बाह्यवायव्ये | - | (२) यमः |
| (३) पश्चिमवायव्ये | - | (३) नागराजः |
| (४) पूर्वाग्नेये | - | (४) सूर्यः |
| (५) बाह्याग्नेये | - | (५) अष्टवसवः |

**५. अधोलिखितानां प्रश्नानामुत्तराणि यच्छत।**

(१) धरा कस्य पृष्ठोपरि स्थिता ?

(२) याजकः धरणीं प्रति किं किं याचते ?

(३) मध्यवेद्याः ईशानस्तम्भे कस्य देवस्य पूजनं भवति ?

(४) पश्चिमवायव्यान्तरालस्तम्भे को देवो निवसति ?

(५) उत्तरेशानान्तरालस्तम्भे कासां देवतानामावाहनं भवति ?

**प्रायोगिकम्**

- छात्राः यज्ञशालायाः पर्यवेक्षणं कुर्वन्तु।
- छात्राः मण्डपस्य स्फोरकचित्र-निर्माणं (चार्टनिर्माणं) कृत्वा सम्यक्तया अवगच्छेयुः।

**अध्यापकप्रवृत्तिः**

- अध्यापकः छात्रान् मण्डपविषये कुण्डमण्डपसिद्ध्यादिग्रन्थेभ्यः पाठसम्बद्धोपचारान् अवबोधयेत्।

•

# ५ जलाधिवासः कुटिरहोमश्च

**प्रस्तावना**

प्रतिष्ठायाः प्रथमदिने प्रातः एव सर्वाः प्रतिष्ठाः समाप्य प्रतिमाः सावधानतया वाहने संस्थाप्य तासां प्रतिमानां ग्रामस्य प्रदक्षिणा कर्तव्या। अनन्तरं मण्डपाद् बहिः सावधानतया स्थापनीयाः। भद्रसूक्तपाठं गणेशस्मरणं प्रैषात्मकपुण्याहवाचनं च कृत्वा भूतशुद्धिं विधाय भूमेः प्रतिमादीनां च प्रोक्षणं कर्तव्यम्। मूर्तिषु घृतलेपनं कृत्वा अग्न्युत्तारणं कर्तव्यम्।

प्रतिमादेवतायाः प्रार्थनां कृत्वा सम्मार्जनं कर्तव्यम्। मृत्तिकादिद्रव्यैः स्नपनं कारयित्त्वा प्रतिमासंरक्षणाय कौतुकबन्धनं करणीयम्। तदर्थं च मूर्तीनां क्रमाणामनुसारं दीर्घं श्वेतम् ऊर्णसूत्रं गृहीत्वा जलपात्रे हरिद्राद्रिक्तं कृत्वा मन्त्रोच्चारपूर्वकं अभिमन्त्रणं कृत्वा प्रत्येकस्याः मूर्तेः दक्षिणहस्ते **ॐ यदाबध्नन्** इति मन्त्रेण रक्षासूत्रबन्धनं कर्तव्यम्। तत्पश्चात् धान्यराशौ बृहज्जलपात्रं स्थापयित्वा जलमातृका-जीवमातृकादीनां, पात्राद् बहिर्वायव्यां क्षेत्रपालपूजनं, बलिदानं, जले गंगादिनदीनां, मानसादिसरसां, सप्तघृतमातृकानाम् आवाहन-पूजने विधाय पात्रस्य दक्षिणे द्वे जलपात्रे निधाय, ब्रह्मसुदर्शनस्य पूजनं विधेयम्। जलपात्रे पंचामृतं, २८ दर्भाणां कूर्चं निधाय विष्णुं शिवं वा स्मृत्वा प्रतिमाः शुद्धपूर्वस्यां दिशि मस्तकं भवेत् तथा स्थापनीयाः।

(अयं जलाधिवासविधिः प्रतिष्ठापद्धतिकल्पलतोक्तो वासुदेवीकल्पलता निरूपितः। प्रतिमासन्धानच्छिद्रापक्वसशर्करपाषाणादिपरीक्षापूर्वकमर्चाशुद्धयर्थं विहितः। केचिदत्र घृताधिवासं कुर्वन्ति, किन्तु प्रयोगे **मूर्तिं घृतेनाभ्युज्य जलधारां कुर्यात्** इत्युक्तत्त्वात् घृतेनाभ्यंजनमात्रं विहितं न घृते निक्षेपः। शिवलिंगादिकं घृते निक्षिपन्ति **घृतग्रहणहेतुना याज्ञिकाः जलधारां न कुर्वन्ति।** घृतनिक्षेपणनिष्कासनादिना चैक्कण्यवशात् मूर्तीनां वर्णलोपः, स्खलनादिना प्रतिमाभंगसम्भवश्च एवं काकिणीलोभेन गजो हतः इतिवत् घृतग्रहणलोभं पुरस्कृत्य घृताधिवासं ये कुर्वन्ति, ते वान्ध्या एव)

---

साचार्यो यजमानो वेदनिनादछत्रचमरादिरथादियानसहितः शिल्पिशालायां सन्निधापितप्रतिमागृहं वा गत्वा तत्र प्रतिमा वस्त्रादिना विभूष्य गन्धपुष्पादिमालादिना संपूज्य शिल्पिनः प्रतिमानिर्मातॄन् वस्त्रगन्धादिना संतोष्य कुद्दालादिशिल्पशस्त्राणि च हरिद्रादिना भूषयित्वा -

**ॐ विश्वकर्मन् हविषावर्द्धनेन त्रातारमिन्द्रमकृणोरवध्यम्।**

**तस्मै विशः समनमन्त पूर्व्वीरयमुग्रो विहव्यो यथासत्।**

इति विश्वकर्माणं नत्वा याने प्रतिमामारोप्य ग्रामनगरादिप्रादक्षिण्येन जलाधिवासमण्डपमानयेत्॥

शाकुंतसूक्तं पठेत् -

**ॐ कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम्।**

**सुमंगलश्च शकुने भवासि मा त्वा काचिदभिभा विख्या विदत्॥ १॥**

**मात्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा विददिषुमान् वीरो अस्ता।**

**पित्र्यामनु प्रदिशं कनिक्रदत्सुमंगलो भद्रवादीवदेह॥ २॥**

**अवक्रन्द दक्षिणतो गृहाणा सुमंगलो भद्रवादी शकुन्ते।**

**मा नः स्तेन ईशतमाघशंसो बृहद्वदेम विदथे सुवीराः॥ ३॥ (ऋ मं. २० सू, ४२)**

प्रदक्षि क्षिणिद्वभिगृणन्ति कारवो वयो वदन्त ऋतुथा शकुन्तयः।

उभो वाचो वदन्ति सामगा इम गायत्रं च त्रैष्टुभं चानु राजति॥ १॥

उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि।

वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमावद विश्वतो नः शकुने पुण्यमावद॥ २॥

आ वदस्त्वं शकुने भद्रमावद तूष्णीमासीनः।

सुमतिं चिकिद्धिनः तदुत्पतन् वदसि कर्करिर्यथा बृहद् वदेम विद्रथे सुवीराः॥ ३॥ (ऋ मं. २ सू. ४३)

**ॐ आ नो भद्रा...** इति भद्रसूक्तं पठेत्॥ आनीतासु मूर्तीषु ताः ॐ अनाधृष्टा... इति नीरज्य जलाधिवासमण्डपे स्वसम्मुखं प्रांगमुखीः स्थापयेत्॥ सचार्यो यजमानः - आचम्य। प्राणायामः। शान्तिपाठः। जलमादय अद्य.. पुण्यतिथौ प्रतिष्ठांगत्वेन प्रतिमाशुद्धयर्थं जलाधिवासाख्यं कर्म करिष्ये।

**ॐ गणनान्त्वा...** गणपतये नमः सर्वोपचारार्थं नमस्करोमि। प्रैषात्मकं पुण्याहवचनं कृत्वा। सर्षपदानाय-ॐ **रक्षोहणं... वा कृणुष्वपाज...** शत्रून्-अपसर्पन्तु... देवयागं करोम्यहम्-इति सर्षपान् विकीर्य वामपादेन त्रिवारं भूमिं ताडयित्वाउदकमुपस्पृशेत्। मन्त्रैः पंचगव्यं सम्पाद्य मण्डपं प्रतिमां ब्राह्मणाश्च प्रोक्षेत्-**ॐ आपो हि ष्ठा ..... ०३॥** सर्वेषां पवित्रतास्तु॥

### अग्त्युत्तारणम्

अद्य... आसां प्रतिमानां (अस्याः प्रतिमायाः) अंगप्रत्यंगसंधिसमुत्पन्नकुद्दालकादि- टद्कादि- आतपाग्निसंयोगजनितदोष- परिहारार्थं घनादिदोषपरिहारार्थं अग्न्युत्तारणमहं करिष्ये। मूर्तिं घृतेनाभ्यज्योपरि जलधारां कुर्यात्। आग्वैदिकमग्निपदरहितमग्नि पदसहितमग्निसूक्तं पठेत्।

### अग्निपदसहितम्

ॐ अग्निः सप्तिं वाजं भरददात्यग्निर्वीरश्रुत्यं कर्मनिष्ठाम्। अग्निरोदसी विचरत्समजन्नग्निर्नारी वीराकुर्क्षि पुरन्धिम् ॥ १॥

अग्नेरप्रसः समिदस्तु भद्रग्निर्महीं रोदसी आविवेश। अग्निरेकं चोदयत्समत्स्वग्निर्वृत्राणि दयते पुरूणि॥ २॥

अग्निर्हत्यं जरतः कर्णमावाग्निरद्भ्यो निरदहज्जरूथम्। अग्निरत्रिं घर्म उरूष्यदन्तरग्निर्नृमेघं प्रजया सृजत्सम्॥ ३॥

अग्निर्दाद्रविणं वीरपेशा अग्निर्ऋर्षिय: सहस्रासनोति। अग्निर्दिवि हाव्यमाततानाग्नेर्धामानि बिभृता पुरुत्रा॥ ४॥

अग्निमुक्थैर्ऋषयो विहवयन्तेग्नि नरो यामनिबाधितासः। अग्नि र्वयो अन्तरिक्षे पतन्तोग्निः सहस्रा परियाति गोनाम्॥ ५॥

अग्निर्विष ईल्ते मानुषीर्या अग्नि मनुष्यो नहुषो विजाताः। अग्नि गांधर्वीपथ्या मृतस्याग्निर्गव्यूतिर्घृतमानिषत्ता॥ ६॥

अग्नयेब्रह्मऋभवस्ततक्षुशन्तर्महामवोचामासु वृक्तिम्। अग्निर्प्राविजरितारं यविष्ठाग्नेमहिद्रविणमायजस्व॥ ७॥

### शुक्लयजुर्वेदे

ॐ अश्मन्नूर्ज्जं.... तृषाणो अजरं... इति दशामन्त्रानुवाकं वा समुद्रस्य त्वा व्वकयाग्ने... शिवो भव ४ तः १५ मंत्रान् अनुवाद्वयं वा पठेत्॥ यथा -

ॐ अश्मन्नूर्जम्पर्व्वते शिश्रियाणामद्भ्ऽओषधीभ्यो व्वनस्पतिभ्यऽअधि सम्भृतम्पयः। तान्नऽइषमूर्ज्जंधत्त मरूतः सँरराणाऽ अरम्मँस्तेक्षुन्नमयि तऽ ऊर्ग्यन्द्वीष्मस्तन्ते शुगृच्छतु॥ १॥

इमामेऽअग्नऽइष्टका धेनवः सन्त्वेका च दश च दश च शतञ्च शतञ्च सह्स्रञ्च सह्स्रञ्चयुतञ्चायुतञ्च नियुञ्च नियुतञ्च प्रयुतञ्चार्बुदञ्चाबुर्दञ्च समुद्रश्च मध्यञ्चान्तश्च परार्धश्चैता मेऽअग्नऽइष्टका धेनवः सन्त्वमुत्रामुष्मिँल्लोके॥ २॥

ऋतवस्थऽ ऋतावृधऽ ऋतुष्ठास्थऽऋतावृधाः। घृतश्चुतोमधुश्चुतो विराजो नाम कामदुघाऽ अक्षीयमाणाः॥ ३॥

समुद्रस्यत्वा व्वकयाग्ने परिव्ययामसि। पावकोऽ अस्मभ्यꣳ शिवो भव॥ ४॥

हिमस्यत्वा जरायुणाग्ने परिव्ययामसि। पावकोऽ अस्मभ्यꣳ शिवो भव॥ ५॥

उपज्मन्नुपवेतसेवतरनदीष्व।

अग्ने पित्तमपामसि मण्डुकिता भिरागहिसेमन्नो षज्ञं पावकवर्णꣳ शिवङ्कृधि॥ ६॥

अपमिदन्ययनꣳ समुद्रस्य निवेशनम्। अन्याँस्ते ऽ अस्मत्तपन्तु हेतयः पावकोऽ अस्मभ्यꣳ शिवो भव॥ ७॥

अग्ने पावकरोचिषा मन्द्रया देवह्विया। आ देवान् वक्षि यक्षि च॥ ८॥

स नः पावकदीदिवोऽग्ने देवाँ इहावह। उपयज्ञꣳ हविश्चनः॥ ९॥

पावकया पाश्चितयन्त्या कृपाक्षामन्नुरुचऽ उषसो न भानुना।

तूर्वन्नयाम्ने तसस्य नूरणऽ आयोध्रेणेन तत्रेशाणो अजरः॥ १०॥

नमस्ते हरसे शोचिषे नमस्तेऽ अस्त्वर्चिषे। अन्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भवा॥ ११॥

नृसदेवेड्प्सु देवेड् बर्हिषदेवड् वनसदेवेट् स्वर्विदेवेट्॥ १२॥

ये देवा देवानां यज्ञिया यज्ञियानाꣳ सम्वत्सरीणमुपभागमासते।

अहुतादो हविषो यज्ञेऽअस्मिन् स्वयं पिबन्तु मधुनो घृतस्य॥ १३॥

ये देवा देवेष्ववधिदेवत्वायन्ये ब्रह्मणः पुरऽ एतारोऽ अस्य।

येभ्यो नऽ ऋते पपवते धाम किञ्चन न ते दिवो पृथिव्याऽ अधिष्नुषु॥ १४॥

प्राणदाऽ अपानदा व्यानदा वर्चोदा व्वरिवोदाः।

अन्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भव॥ १५॥

ततो देवं प्रार्थयेत् -

ॐ त्वयि सम्पूजयामीशं नारायणमनामयम्। रहितः सर्वदोषैस्त्वं ऋद्धियुक्तः सदा भव॥ १॥

इति प्रार्थ्य प्रतिमां कुशैः सम्मार्ज्य (ॐ प्रत्युष्टꣳ रक्षः) मध्वाज्याभ्यङ्गेन सतूर्यनिनादं देवस्य व्रणभङ्गः कार्यः।

ततो मृदा गोमयेन गोमूत्रेण भस्मना क्षीरेण च पृथक् पृथक् जलान्तरितेन स्नापयित्वा गन्धादिभिरभ्यर्च्य सितपुष्पैः सम्पूज्य सुवर्णपात्रे मधुसर्पिषि संस्थाप्य सुवर्णशलाकया मधुसर्पिभ्यां नेत्रे आपूर्य मधुच्छिष्टेन (मीण) नेत्रावरणञ्च कृत्वा पश्चाद् कलशोदकेन देवं संस्नाप्य यजमानाय दापयेत्। ततो यजमानः प्रतिमां गृहीत्वा - भो गुरो! प्रतिमां सावयवां निरीक्षस्व - इत्यनुज्ञाप्य आचार्यः - (ॐ मित्रस्य चक्षुषा प्रतीक्षे...) इति सावयवां प्रतिमां निरीक्षेत। यजमानः प्रतिमां मूलमन्त्रेण षोडशोपचारैः पञ्चोपचारैः वा सम्पूज्य कौतुकसूत्रबन्धनं कुर्यात्।

कौतुकसूत्रबन्धनम् -

आचार्यः (सूर्यचन्द्रमसौ यावत्) देवरक्षार्थं कौतुकबन्धनं करिष्ये - इति संकल्प्य उदकपूर्णं कुम्भं निधाय शीतोर्णादिसूत्रनिर्मितं वितस्तिमात्रं पञ्चागुङ्गुलं वा हरिद्राक्तं कौतुकसूत्रं सर्वोषधिसहितं कुम्भोदकेन सूत्रं वक्ष्यमाणैः मन्त्रैः अभिषिञ्चेत् - यथा

१. ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्॥

२. ॐ इषेत्वोर्जेत्वा व्वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमग्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा मा वस्तेन ईशत माघशꣳ सो ध्रुवा अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि॥

३. ॐ अग्न आयाहि वीतये गृणानो हव्य दातये। नि होता सत्सि बर्हिषि॥

४. ॐ शन्नो देवी रभिष्टय आपो भवन्तु पीतये। शं यो रभिस्रवन्तु नः॥

५. ॐ राजन्तमध्वराणां गोपामृतस्य दीदिविम्। वर्धमानꣳस्वे दमे॥

६. ॐ स नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वानः स्वस्तये॥

७. ॐ आपोहिष्ठा मयो भवस्तान ऊर्जे दधातन। महेरणाय चक्षसे॥

१०. ॐ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इन्द्राय पातवे सुतः॥

११. ॐ रक्षोहा विश्वचर्षणिरभियोनिमयोहते। द्रोणे सधस्तमा सदत॥

१२. कृणुष्वपाजः ... ०। (१२ तः १६)१७. ॐ सहस्रशीर्षा ... ०। (१७ तः ३२)

३३. ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाᳫंसि।

योऽअस्कभायदुत्तरᳫं सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा॥

३४. ॐ इरावती धेनुमती हि भूतᳫंसूयवसिनी मनवे दशस्य।

व्यस्कभ्ना रोदसी विष्णवे ते दाधर्थ पृथिवीमभितो मसूखैः स्वाहा॥

३५. ॐ हिरण्यवर्णां ... ०। (३प तः ४९) ४० ॐ यज्जाग्रतो ... ०। (५० तः ५५)

५६. ॐ न तद्रक्षा ... ०।

५७. ॐ द्रविणोदाः ... ०। (५७ तः ६०)

एभ्यो यथासम्भवं मन्त्रान् प्रपठ्य सूत्रं गन्धेनानुलिप्य देवस्य दक्षिणहस्ते -

ॐ यदाबध्नन् ... ०। इति मन्त्रेण बध्नीयात्। ततो जलाधिवासं कुर्यात्।

**जलाधिवासः -**

धान्यराशौ द्रोणीं कटाहं वा निधाय तदभावे जलधारार्थं शिक्यादि सम्पाद्य द्रोण्यादिकं गन्धोदकेनापूर्य तन्मध्ये अष्टाविंशतिदर्भमयं कूर्चं निशाय - ॐ यदत्र संस्थितं ... ०। इति सर्षपैः भूतशुद्धिं विधाय तस्मिन् कूर्चे हरिं हरं वा भावयित्वा चक्रमुद्रां प्रदर्श्य जलद्रोणितो दक्षिणदिशि धान्यपुञ्जे सवस्त्रं कलशं करकं च विधिना स्थापयेत्। तत्र कलशे - ॐ ब्रह्मणे नमः, करके ॐ सुदर्शनाय नमः इत्यावाह्य पूजयेत्।

यजमानः अद्य ० तिथौ प्रतिष्ठाङ्गत्वेन वरुणप्रीतये जलमातृ-दीवामातृ-क्षेत्रपाल-वरुणपूजनं करिष्ये। जले अक्षतैः आवाहयेत् - १. मत्स्यै नमः। २. कच्छप्यै नमः। ३. कूर्म्यै नमः। ४. वाराह्यै नमः। ५. दर्दूर्यै नमः। ६. शिशुमार्यै नमः। ७. ईश्वर्यै नमः।

अथ जीवमातुरक्षतपुञ्जेषु कटाहभित्तौ वा - १. मत्स्यै नमः। २. ह्रद्यायै नमः। ३. गोधायै नमः। ४. मकर्यै नमः। ५. दुन्दुभ्यै नमः। ६. दर्दुर्यै नमः। ७. जल्यै नमः॥ जले - चतुःषष्ठियोगिनीभ्यो नमः - वायव्यां कुंकुमेन क्षेत्रपालं विलिख्य - ॐ क्षेत्रपालाय नमः - इत्यावाह्य सम्पूज्य बलिदानं दध्योदनेन - ॐ क्षेत्रपालाय नमः बलिं समर्पयामि।

ततो जले - ॐ अद्भ्यो नमः। ॐ सप्तसागरेभ्यो नमः। ॐ मानसादिसरोभ्यो नमः।

ॐ पुष्करादितीर्थेभ्यो नमः। ॐ गङ्गादिनदीभ्यो नमः। इति जले गन्धाक्षतान् क्षिपेत्।

ततो जले - ॐ वरुणाय नमः इति सम्पूज्य जले तन्मन्त्रेण पञ्चामृतं क्षिपेत्। ततो जलद्रोण्यादेरुपरि सर्षपान् विकीर्य सम्भवेऽष्टकलशान् पात्रपरितः संस्थाप्य तत्र इन्द्रादीनावाह्य अग्रतः सुवर्चसं दीपं दद्यात्। जलान्तः शमीपीठं स्थापयित्वा तदुपरि वस्त्रमास्तीर्य प्रतिमां वस्त्रेणाच्छाद्य कुशैरावेष्ट्य वेदगीततुर्यनिनादैः प्राङ्मुखीम् उदङ्मुखीं वा जलेऽधिवासयेत्। (अस्य कमलाधिवास इत्यागमप्रसिद्धिः। अयमेव सरोजसङ्घातनामकाधिवासः)। जलद्रोण्यभावे सन्ततधारां कुर्यात्। जलाधिवासं सप्तपञ्चत्र्येकरात्राद्यन्यतमपक्षेण सद्यो यामं गोदोहनमात्रं वा कुर्यात्। ततो यथासम्भवे सूक्तानि पठेयुः - ॐ सहस्रशीर्षा ... ०। (षोडशमन्त्राः।) पञ्चाक्षररुद्रजपः। अघोरमन्त्रपाठः। अतो देवा ...०। इदं यो ... ०। रक्षसां भागोऽसि ... ०। रक्षोहा ... ०। अन्यप्रतिमासु तत्तत्सूक्तपाठः। आचार्यादिभ्यो दक्षिणां दद्यात्।

**॥ इति जलाधिवासः॥**

(एकाध्वरपक्षे कृताकृतोऽयम्।) अनेन जलाधिवासकर्मणा आसां प्रतिमानां सकलदोषनिवृत्तिपूर्वकम् अर्चाशुद्धिपूर्वकं भगवान्परमेश्वरः प्रीयताम्।

## ॥ अथ कुटीरहोमः ॥

प्रतिमानिर्माणस्थानात् क्रीत्वा स्वग्राममानीतानां प्रतिमानां प्रतिमानिर्माणस्थलं गत्वा कुटीरहोमकरणस्य सर्वथा असम्भवात् मण्डपाद्बहिः स्थण्डिलं विधाय तत्र जलाधिवासः कुटिरहोमश्च ग्रामनगरप्रादक्षिण्येन मण्डपमानीतासु प्रतिमासु प्रथमेऽहनि यथासमयं कार्यः जीर्णप्रतिमोद्धारोऽपि चिकीर्षितश्चेत् प्रथमेऽहनि नान्दीश्राद्धोत्तरं कार्यः। अयमेव होमः शान्तिहोमः इत्यभिधीयते।

यजमानो मण्डपाद्बहिः उपविश्य आचम्य प्राणानायम्य - ॐ द्यौः ... ०। सुमुखश्चेत्यादि ... ०। सङ्कल्पः - अद्य ...० तिथौ प्रतिमानिर्माणे अशुचिदेश-अशुचिकाल-अशुचिस्पर्शादिजन्यदोषपरिहारार्थं प्राणिवधादिदोषोपशमनार्थं प्रतिमापिण्डकादिषु न्यूनातिरिक्तदोषशान्तये सकलदुरनिमित्तोपशमनार्थं प्रतिष्ठाङ्गत्वेन कुटीरहोमं करिष्ये। तदङ्गभूतं स्थण्डिले पञ्चभूसंस्कारपूर्वकं बह्निस्थापनमहं करिष्ये। पञ्चभूसंस्काराः। वरदानामाग्निस्थापनम् - वरदनामाग्नये नमः। इति सम्पूज्य - दक्षिणतो ब्रह्मासनादिः - आघाराज्यभागन्तं कृत्वा। अग्निं सम्पूज्य। त्यागसङ्कल्पः - इदं सम्पादितं हविस्तेन या या यक्ष्यमाणाः देवताः ताभ्यस्ताभ्यः मया परित्यक्तं न मम। यथा दैवतमस्तु। आज्येन घृताक्ततिलैर्वा होमः।

१. प्रासादे स्थापयिष्यमाणदेवताः। तत्तत्पिण्डिकाश्चोद्दिश्य - स्थाप्यदेवमन्त्रेण शतद्वयं (२००)

प्रतिदैवतमाहुतीर्दद्यात्।

२. ॐ परं मृत्योऽ अनुपरैः पन्थाँ यस्तेऽ अन्यऽ इतरो देवयानात्।

चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोतव्वीरान् स्वाहा॥

इदं मृत्यवे न मम। (१०८ वा २८ आहुतयः।)

३. ॐ अघोरेभ्योऽथ घोरेभ्यो घोर घोरतरेभ्यः।

सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽअस्तु रुद्ररूपेभ्यः स्वाहा॥

इदं अघोराय न मम। (१०८ वा २८ आहुतयः।) (या ते रुद्र शिवा ...० चाकशीः।)

४. ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीय माऽमृतात् स्वाहा॥

इदं रुद्राय न मम। (१०८ वा २८ आहुतयः।)

५. ॐ यद्ग्रामे यदरण्ये यत् सभायां यदिन्द्रिये। यदेनश्चकृमा वयमिदन्तव यजामहे स्वाहा॥

इदं एनसे न मम। (१०८ वा २८ आहुतयः।)

ततः आज्यहोमे प्रथमं नवाहुतयः ततः स्विष्टकृत्। तिलहोमे प्रथमं तिलाज्याभ्यां स्विष्टकृत् तत आज्येन नवाहुतयः। ॐ मूर्धानं ...० पूर्णाहुतिः। संस्रवप्राशनादि ... प्रणीताविमोकन्तं कृत्वा। अनेन कुटीरहोम (शान्तिहोम) करणेन प्रतिमानिर्माणे अशुचिदेशकाल-स्पर्शादिदोषजन्य-प्राणीवधादिदोषप्रतिमा- पिण्डिकादिन्यूनाधिक्यदोषनिवृत्तिपूर्वकं सकलदुर्निमित्तदुरितोपशमनमस्तु।

## ॥ इति कुटीरहोमः ॥

## शब्दार्थाः

**शिल्पिशाला** - प्रतिमानिर्माणगृहम्, **कौतुकबन्धनम्** - प्रतिमारक्षणार्थं कंकणबन्धनम्, **प्राङ्मुखी** - पूर्वाभिमुखी, **प्रैषात्मकम्** - आशीर्वादात्मकम्, **जलाधिवासः** - मूर्तेः जले स्थापनम्, **सितपुष्पैः** - श्वेतपुष्पैः, **शमीपीठम्** - शमीकाष्ठेन निर्मितम् आसनम्, **कुटिरम्** - प्रतिष्ठापूर्वकम् अधिवासार्थं मूर्तीनां स्थापनगृहम्, **अर्चा** - मूर्तिः ॥

## स्वाध्यायः

**१. कोष्टकप्रदत्तविकल्पेभ्यः योग्य-विकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) आचार्यः देवरक्षार्थं ......... करोति। (कंकणबन्धनम् / कौतुकबन्धनम् / सूत्रबन्धनम्)

(२) धान्यराशौ ......... निधातव्यम्। (द्रोणिः / उलूखलम् / कलशः)

(३) कौतुकसूत्रं ......... भवति। (हरिद्राक्तम् / रक्तम् / सिन्दूरद्रवम्)

(४) जलद्रोण्युपरि ......... विकीर्याः। (सर्षपाः / अक्षताः / पुष्पाणि)

(५) अर्चा अर्थात् ......... भवति। (पूजनम् / मूर्तिः / शुद्धिः)

**२. मन्त्रपूर्तिः विधेया।**

(१) यद्ग्रामे यदरण्ये .........०

(२) रक्षोहा .........०

(३) इरावती .........०

(४) विष्णोर्नुकं .........०

(५) अघोरेभ्योऽथ .........०

**३. अधस्तनप्रश्नानामुत्तराणि लिखत।**

(१) जलाधिवासः कदा कर्तव्यः ?

(२) जलाधिवासाय मण्डपः कुत्र रच्यते ?

(३) जलाधिवाससमये केषां पूजनं भवति ?

(४) जलाधिवाससमये देवमुखं कस्यां दिशि भवेत् ?

(५) अग्न्युत्तारणे कस्य सूक्तस्य पाठो विधेयः ?

(६) कौतुकसूत्रनिर्माणे सूत्रं कीदृशं भवेत् ?

**४. अधस्तनविधीनां टिप्पणी विधेया।**

(१) अग्न्युत्तारणम्

(२) कौतुकसूत्रबन्धनम्

(३) जलाधिवासः

(४) कुटिरहोमः

**छात्रप्रवृत्तिः**

- छात्राः कौतुकसूत्रबन्धनाय सूत्ररचनां कुर्वन्तु।
- छात्राः अगन्युत्तारणविधेः मन्त्रान् मुखपाठान् कुर्वन्तु।
- कौतुकसूत्रस्य रचनां कुवन्तु।

**अध्यापकप्रवृत्तिः**

- अध्यापकः प्रतिष्ठाविधौ जलाधिवासे कर्तव्यानि कर्माणि सप्रयोगं छात्रान् बोधयेत्।
- कुटिरहोमार्थं स्थादिकं द्रव्याणां शुद्धिः आहुतिसंख्या आदिषु विषयेषु छात्रान् बोधयेत्।

●

# ६ जलयात्रा - शोभायात्रा

**प्रास्तावना**

आगमादिषु यज्ञार्थं देवताप्रासादस्नपनाद्यर्थं नदीकूपतडागवापीनिर्झरान्यतमस्थानात् जलाहरणं प्रोक्तम्। इदमेव जलयात्रा शोभायात्रापदेन च कथ्यते। इयं प्रथमे दिने प्रतिमादीनां रथादिना ग्रामनगरादि-प्रादक्षिण्येन यात्रया सह, द्वितीये दिने स्वातन्त्र्येण वा भवति। इदं जलानयनं द्विजसुवासनीभिः द्विजकुमारिकाभिश्च सुस्नाता लंकृताभिः कार्यम्। ब्राह्मणैः नागरिकैः च वेदमन्त्रादिघोषपुरःसरं आम्रपल्लवी-पूगीफल-दूर्वा-दक्षिणा-नारिकेलादिसमेतान् कलशानादय प्रादक्षिण्येन जलाशयं गत्वा भूमिपूजनं जलसम्भृतकलशपूजनं जलमातृका-क्षेत्रपालपूजनं बलि-होमादिकं कृत्वा जले यथोक्तं कर्म कृत्वा सुवासिनीपुरःसरं ब्राह्मणाः जनाश्च गीतवाद्यादिभिः सर्वे मण्डपद्वारसमीपमागच्छेयुः। तत्र सुवासिनी-कुमारिका-शिरःस्थितान् कलशान् यजमानो गन्धपुष्पाक्षतादिभिः सम्पूज्य नीराजनं च कृत्वा शुद्धपात्रे तज्जलं क्षिप्त्वा यज्ञार्थं संरक्षेत्। तेन जलेन च स्नपनादिकं कार्यम्।

---

**॥ जलयात्राप्रयोगः॥**

साचार्यर्त्विग्यजमानः पूजासम्भारान् अष्टौ नव वा कलशानादाय द्विजकुमारिका-सुवासिनी-सहितः शान्तिसूक्तादिकं पठन् मङ्गलघोषं कुर्वन् जलाशयं वापीकूपतडागादिकं प्रति शोभायात्रायां गच्छेत्।

जलाशयसमीपे तीरे शुचौ देशे शुभ्रवस्त्रे तण्डुलैः सप्तसप्ताक्षतपञ्चानां चतस्रः पंक्तीः दिक्षु च दिक्पालानामक्षतपुञ्जान् कृत्त्वा तेषु पूगीफलानि निधाय प्राङ्मुखो वा यजमानः सपत्नीकः उपविश्य तिलककरणं। शिखाबन्धनम्। आचमनम्। प्राणायामः। पवित्रधारणम्। शान्तिमन्त्रान् पठित्वा।

जलमादाय - अद्य पूर्वो... तिथौ प्रतिष्ठाङ्गत्वेन करिष्यमाण-प्रतिमाप्रासादस्नपनाद्यर्थं जलाहरणरूपं जलयात्राकर्माहं करिष्ये।

तत्रादौ गणेशस्मरणम्। **ॐ प्राच्यै दिशे स्वाहा...** इति मन्त्रेण सर्षपान् चतुर्दिशि विकीर्य। वामपादपार्ष्णिना भूमौ घातत्रयं कुर्यात्। उदकोपस्पर्शः। श्वेतवस्त्रैः गोधूमैः तण्डुलैर्वा अष्टदलं पद्मं कृत्वा तत्र पूगीफलं निधाय - **ॐ भूरसि...** इति मन्त्रेण ॐ सपरिवारायै भूम्यै नमः - इति भूमिमावाह्य षोडशोपचारैः भूमिं पूजयेत्। इति भूमिपूजा।

द्विजकुमारिका-सुवासनीभिः स्वपञ्चानीतान् कलशान् शुद्धजलेनापूर्तेषु सर्वौषधी-पञ्चल्लव-दूर्वा-मृत्तिका-पूगीफल-हिरण्य-पञ्चरत्नादिकं प्रक्षिप्य तेषु नारिकेलानि निधाय मण्डलपरितः स्थापयित्वा **महीर्द्यौ**रित्यादि-पूर्णपात्रनिधानान्तं कृत्वा वरुणमावाहयेत्।

**ॐ तत्त्वायामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः।**

**अहेडमानो व्वरुणेह बोद्ध्युरुशꣳ समान आयुः प्रमोषी॥ (४/४९)**

**ॐ ये तीर्थानि प्रचरन्ति सृका हस्ता निषङ्गिणः।**

**तेषाꣳसहस्त्रयोजनेवधन्वानि तन्मसि॥ (१६/६१)**

ॐ अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सतीर्थं वरुणमावाहयामि स्थापयामि। **मनोजूर्तिः**... इति मन्त्रेण प्रतिष्ठाप्य पञ्चोपचारैः पूजयेत्। ततः प्रार्थना - कलशस्य मुखे... देवदानवसंवादे... नमो नमस्ते स्फटिक...।

ॐ कुम्भो व्वनिष्ठुर्जनिता राचीभिर्प्यास्मिन्नग्ने योन्याद्गर्भोऽअन्तः।

प्लाशिव्व्यंक्तः राधारऽउत्सो दुहे न कुम्भी स्वधाम्पितृभ्यः॥

ॐ शङ्खस्फटिकवर्णाय श्वेतहाराम्बरावृत। पाशहस्त महाबाहो दयां कुरु दयानिधे॥

ॐ भूभुर्वः स्व साङ्गाय सपरिवाराय सतीर्थाय वरुणाय नमः।

**सङ्कल्पः** - अनया पूजया साङ्गः सपरिवारः सतीर्थः वरुणः प्रीयताम्

**॥ इति वरुणपूजा॥**

पश्चात् जलमातृका-जीवमातृका-स्थलमातृका-सप्तसागरान् अक्षतपुञ्जेषु वा क्रमेण पंक्तिषु उदकस्थमावाहयेत्।

**जलमातृकाः** - अक्षतान् गृहीत्वा - प्रथमपंक्तौ क्रमेण

१. ॐ भूर्भुवः स्वः मत्स्यै नमः मत्सीम् आवाहयामि स्थापयामि।

२. ॐ भूर्भुवः स्वः कूर्म्यै नमः कूर्मीम् आवाहयामि स्थापयामि।

३. ॐ भूर्भुवः स्वः वाराह्यै नमः वाराहीम् आवाहयामि स्थापयामि।

४. ॐ भूर्भुवः स्वः ददुर्यै नमः ददुरीम् आवाहयामि स्थापयामि।

५. ॐ भूर्भुवः स्वः मकर्यै नमः मकरीम् आवाहयामि स्थापयामि।

६. ॐ भूर्भुवः स्वः जलक्यै नमः जलकीम् आवाहयामि स्थापयामि।

७. ॐ भूर्भुवः स्वः तन्तुक्यै नमः तन्तुकीम् आवाहयामि स्थापयामि।

**जीवमातृकाः** - द्वितीयपंक्तौ क्रमेण

१. ॐ भूर्भुवः स्वः कोमार्यै नमः कौमारीम् आवाहयामि स्थापयामि।

२. ॐ भूर्भुवः स्वः धनदायै नमः धनदाम् आवाहयामि स्थापयामि।

३. ॐ भूर्भुवः स्वः नन्दायै नमः नन्दाम् आवाहयामि स्थापयामि।

४. ॐ भूर्भुवः स्वः विमलायै नमः विमलाम् आवाहयामि स्थापयामि।

५. ॐ भूर्भुवः स्वः मङ्गलायै नमः मङ्गलाम् आवाहयामि स्थापयामि।

६. ॐ भूर्भुवः स्वः चलायै नमः चालाम् आवाहयामि स्थापयामि।

७. ॐ भूर्भुवः स्वः पद्मायै नमः पद्माम् आवाहयामि स्थापयामि।

**स्थलमातृकाः** - तृतीयपंक्तौ क्रमेण

१. ॐ भूर्भुवः स्वः ऊर्म्यै नमः उर्मिम् आवाहयामि स्थापयामि।

२. ॐ भूर्भुवः स्वः लक्ष्म्यै नमः लक्ष्मीम् आवाहयामि स्थापयामि।

३. ॐ भूर्भुवः स्वः महामायायै नमः महामायाम् आवाहयामि स्थापयामि।

४. ॐ भूर्भुवः स्वः पानदेव्यै नमः पानदेवीम् आवाहयामि स्थापयामि।

५. ॐ भूर्भुवः स्वः वारुण्यै नमः वारुणीम् आवाहयामि स्थापयामि।

६. ॐ भूर्भुवः स्वः निर्मलायै नमः निर्मलाम् आवाहयामि स्थापयामि।

७. ॐ भूर्भुवः स्वः गोधायै नमः गोधाम् आवाहयामि स्थापयामि।

**सप्तसागराः** - चतुर्थपंक्तौ क्रमेण

१. ॐ भूर्भुवः स्वः क्षारोदाय नमः क्षारोदम् आवाहयामि स्थापयामि।

२. ॐ भूर्भुवः स्वः क्षीरोदाय नमः क्षीरोदम् आवाहयामि स्थापयामि।

३. ॐ भूर्भुवः स्वः इक्षुसमुद्राय नमः इक्षुसमुद्रम् आवाहयामि स्थापयामि।

४. ॐ भूर्भुवः स्वः दधिसमुद्राय नमः दधिसमुद्रम् आवाहयामि स्थापयामि।

५. ॐ भूर्भुवः स्वः गुडोदाय नमः गुडोदम् आवाहयामि स्थापयामि।

६. ॐ भूर्भुव: स्व: घृतसमुद्राय नम: घृतसमुद्रम् आवाहयामि स्थापयामि।

७. ॐ भूर्भुव: स्व: स्वादुसमुद्राय नम: स्वादुसमुद्रम् आवाहयामि स्थापयामि।

**समुद्रादूर्मि,,,,, इति मन्त्रेण आवाह्य**

तत: दशदिक्षु दिक्पालान् क्रमेण

पूर्वे ॐ इन्द्राय नम: इन्द्रम् आवाहयामि स्थापयामि।

आग्नेय्याम् ॐ अग्नये नम: अग्निम् आवाहयामि स्थापयामि।

दक्षिणस्याम् ॐ यमाय नम: यमम् आवाहयामि स्थापयामि।

नैर्ऋत्याम् ॐ निर्ऋतये नम: निर्ऋतिम् आवाहयामि स्थापयामि।

पश्चिमायाम् ॐ वरुणाय नम: वरुणम् आवाहयामि स्थापयामि।

वायव्याम् ॐ वायवे नम: वायुम् आवाहयामि स्थापयामि।

उत्तरस्याम् ॐ सोमाय न: सोमम् आवाहयामि स्थापयामि।

ऐशान्याम् ॐ ईशानाय नम: ईशानम् आवाहयामि स्थापयामि।

ऊर्ध्वम् ॐ ब्रह्मणे नम: ब्रह्माणम् आवाहयामि स्थापयामि।

अधस्तात् ॐ अनन्ताय नम: अनन्तम् आवाहयामि स्थापयामि।

**ॐ मनोजूति...** इति प्रतिष्ठाय ॐ मत्स्याद्यावाहितदेवताभ्यो नम: इति सम्पूज्य बलिं दद्यात्। बलिं निधाय सम्पूज्य।

ॐमत्स्याद्यावाहितदेवताभ्यो: नम: बलिं समर्पयामि।

जलमादाय - अनया पूजया मत्स्याद्यावाहितदेवता: प्रीयन्ताम्।

## जलाश्रितवरुणपूजनम्

जले घृतहोमश्च। जलसमीपं गत्वा ध्यायेत्।

ॐ एह्येहि यादोगणवारिधीनां गणेन पर्जन्यसहाप्सरोभि:।

विद्याधरेन्द्रामरगीयमान पाहि त्वमस्मान् भगवन्नमस्ते।

ॐ उरुछहि राजा व्वरुपाश्चकार सूर्य्याय पन्थोमन्वेतवऽउ।

अपदेपादा प्प्रतिधातवे करूता पवक्ता हृदयाव्विधश्चित्। नमोव्वरुणायाभिष्ठितो व्वरुणस्य पाश:॥

**ॐ इमम्मे व्वरुण श्रुधी हवमद्या च मृडय।**

**त्वामवस्युराचके॥**

ॐ भूर्भुव: स्व: वरुणाय नम:, इत्यावाह्य सम्पूजयेत्। ॐ वरुणाय नम: इति नैवेद्यं घृतं दधि पञ्चामृतं वा समर्पयेत्।

॥ अनेन वरुण: प्रीयताम्॥

कुशचतुष्टयेन चतुरस्रां वेदीं कृत्वा जले निधाय तत्र आज्येन स्रुवेण होम:। त्यागोच्चारणमात्रम्। न संस्रव:।

१. ॐ अद्भ्य: स्वाहा इदमभ्यो न मम।

२. ॐ वार्भ्य: स्वाहा इदं वार्भ्यो न मम।

३. ॐ उदकाय स्वाहा इदमुदकाय न मम।

४. ॐ तिष्ठन्तीभ्य: स्वाहा इदं तिष्ठन्तीभ्यो न मम।

५. ॐ स्रवन्तीभ्यः स्वाहा इदं स्रवन्तीभ्यो न मम।

६. ॐ स्यन्दमानाय स्वाहा इदं स्यन्दमानाभ्यो न मम।

७. ॐ कूप्याय स्वाहा इदं कूप्याभ्यो न मम।

८. ॐ सुद्याभ्यः स्वाहा इदं सुधाभ्यो न मम।

९. ॐ धार्याभ्यः स्वाहा इदं धार्यभ्यो न मम।

१०. ॐ अर्णवाय स्वाहा इदमर्णवाय न मम।

११. ॐ समुद्राय स्वाहा इदं समुद्राय न मम।

१२. ॐ सरिराय स्वाहा इदं सरिराय न मम।

इति द्वादशाहुतीः स्रुवेण जले हुत्वा **ॐ नमो नमस्ते... इमम्मे...** इति नारिकेलार्धं गृहीत्वा

ॐ प्रतीचीश नमस्तुभ्यं सर्वाघौघनिषूदन।
पवित्रं कुरु मां देव सर्वकालेषु सर्वदा॥
ज्ञानतोऽज्ञानतो वाऽऽपि भगवन् यन्मया कृतम्।
तत्सर्वं पूर्णतां यातु त्वत्प्रसादाज्जलोद्भव॥
ज्ञानतोऽज्ञानतो वाऽऽपि यावान् विधिरनुष्ठितः।
स सर्वस्त्वत्प्रसादेन पूर्णो भवत्वपाम्पते॥

इति नारिकेलं जले प्रक्षिप्य। जलमादाय - अनेन पूजन-पूर्वकं होमकर्मणा सपरिवारो वरुणः प्रीयताम्।

## शब्दार्थाः

**जलयात्रा** - विविधवापीकूपतडागादितीर्थानां जलमाहर्तुं कर्तव्या यात्रा, **उदकस्थम्** - उत्तराभिमुखम्, **प्राङ्मुखम्** - पूर्वाभिमुखम्, **जलमातृकाः** - जलस्य तत्त्वानि, **बलिः** - देवभागः, **चतुरस्रां** - चतुष्कोणां, **वेदीम्** - पीठम्/आसनम्, **स्रुवः** - होमचमसः, **संस्रवः** - होमानन्तरं स्रुवे अवशिष्टस्य प्रणीतायां त्यागः।

## स्वाध्यायः

**१. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) जलयात्राया घृतहोमः ......... क्रियते। (पर्वते, जले, शिरसि)

(२) जलयात्रायां पूजने ......... आवाहनं भवति। (वरुणस्य, वायोः, मेरोः)

(३) प्रतिमाप्रासादस्नपनार्थं ......... यात्रा भवति। (तीर्थयात्रा, जलयात्रा, रथयात्रा)

(४) जलमातृका ......... संख्यात्मिका वर्तते। (अष्ट, दश, सप्त)

(५) उत्तरस्यां दिशि ......... दिक्पालः विराजते। (इन्द्रः, यमः, सोमः)

**२. निम्नलिखितप्रश्नानां द्वि-त्रिवाक्यैः उत्तराणि लिखत।**

(१) वरुणावाहनस्य मन्त्रं लिखत।

(२) जलानयनार्थं के गच्छन्ति।

(३) सप्तसागरनामानि लिखत।

(४) जलाशये किं पूजनं विधेयम् ?

(५) कस्मात् स्थानात् जलाहरणं प्रोक्तम् ?

(६) जीवमातृकानामानि लिखत।

**३. अधस्तनप्रश्नानां विस्तरेण वर्णनं कुरुत।**

(१) जलयात्रायां नेयपदार्थाः।

(२) जलयात्रायां द्वादशाहुतेः वर्णनम्।

(३) अर्घ्यप्रदानसमये के श्लोकाः उच्चार्यन्ते।

(४) स्थानमातृकानामानि यथाक्रमं लिखत।

**४. निम्नलखितमन्त्रपूर्तिं कुरुत।**

(१) ॐ ये तिर्थानि ......... ०।

(२) ॐ इमम्मे ......... ०।

(३) ॐ कुम्भोवनिष्ठुर ......... ०।

(४) ॐ उरुथ्रहि राजा ......... ०।

**५. श्लोकपूर्तिं कुरुत।**

(१) प्रतीचीश ......... सर्वदा।

(२) ज्ञानतोऽज्ञानतो ......... भवत्वपाम्पते।

(३) एह्येहि यादोगण ......... भगवन्नमस्ते।

**छात्रप्रवृत्तिः**

- छात्राः जलयात्रायाः विविध सामाजिकलौकिकं विधिम् अवगच्छेयुः।
- छात्राः मातृकाणां नामानि मुखपाठं कुर्युः।
- छात्राः व्यावहारिकं ज्ञानं जलयात्राविषये प्राप्नुयुः।

**अध्यापकप्रवृत्तिः**

- अध्यापकः जलयात्रायां सुवासिनीनां महत्त्वं ज्ञापयेत्।
- जलयात्रा-समये प्रतिमारक्षणविषये कथयेत्।

•

# ७ स्नपनविधिः १

**प्रस्तावना**

पूर्वं स्नपनप्रकारनिदर्शकपरिशिष्टात् प्रथमादिसप्तप्रकारान्ताः पक्षा एकदिनसाध्यप्रतिष्ठायां सम्पादयितुं शक्यन्ते। अष्टादित्रयोदशप्रकारान्ताः पक्षाः त्रिदिनसाध्यायामेकरात्राधिवासपक्षेण द्वितीयेऽहनि भवितुमर्हन्ति। सप्त-पंच-त्रि-दिनाधिवासनपक्षेष्वर्चाशुद्धिरूपमातिदेशिकत्वम् स्वीकृत्य सति सम्भवे चतुर्दशपंचदशषोडशप्रकाराः प्रयत्नेन सम्पादयितुमर्हाः सन्ति। प्रतिष्ठायां प्रधानमण्डपादुत्तरे तदर्धमानेन स्नानमण्डपः कार्यः। एका वेदी, वेदीद्वयं, वेदीत्रयं वा एकप्रतिमाप्रतिष्ठाकरणे एव सम्भवति। सपरिवार-शिव-लक्ष्मीनारायण-रामचन्द्रसीता-लक्ष्मण-रादाकृष्णाद्येकाधिकप्रतिमाप्रतिष्ठायां वेदीत्रयेण स्नपनं शक्यमिति। वेद्यग्रे दोलादिकाष्ठपट्टका निधेयाः। यद्यपि शिल्पशास्त्रे प्रसादगर्भगृहमानेन मूर्तिदैर्घ्यादिकं निर्दिष्टं तथाऽपि वर्तमानयुगे शिल्पशास्त्रमवगणय्य महत्यः पुरुषमात्राः प्रतिमाः स्थाप्यन्ते। ईदृशि प्रसंगे छायामण्डपे चलयितशक्यत्वे स्वस्थानस्थितानामेव प्राक्शिरसां वा स्नपनविधिः सम्पादनीयः। इतस्ततः संचारणे महदापत्प्रसंगात्। एतदवधेयम् - एककलशादारभ्य तदधिककलशस्नपनपक्षस्वीकारेऽपि स्नपनविधौ सामान्यत्वेन विहिता विधयः बहुविधा भवन्ति।

---

जलाधिष्ठिताः प्रतिमा शङ्खतूर्यवेदघोषैः **ॐ उत्तिष्ठ ब्रह्मणस्पते** ० इति मन्त्रेण प्रबोध्य - **रथे तिष्ठन्नयति व्वाजिनः पुरो षत्र कामयते सुषारथिः। अभिषूणां महिमानम्पनायतमनः पश्चादनु षच्छन्ति रश्मयः॥ (२९.४३)** इति मन्त्रेण रथादिना जलाधवासमण्डपात् कर्मकुटीरतो देवता मण्डपप्रादक्षिम्येन सस्नानमण्डपमानीय पीठे पट्टके वा पूज्यपूजकयोर्मध्ये प्राची प्रकल्प्य स्वसम्मुखं प्रङ्मुखीं देवदिगभिप्रायेण स्थापयेत्। तत्रादौ पञ्चगव्येन ॐ नमो नारायणाय (ॐ नमो विच्चे-) इत्यादि तत्तद्देवतामूलमन्त्रेण स्नपनभूमिं वेदिकात्रयञ्च सम्प्रोक्ष्य दक्षिणवेदिकायां वालुका आस्तीर्य-

**ॐ स्वस्ति न इन्द्रो** ० अनेन व्रीह्यादिना स्वस्तिकं विरच्य तत्र **ॐ भद्रं कर्णेभिः** ० इति भद्रपीठं निधाय तत्र **ॐ स्तीर्ण्णं बर्हिः सुष्टरीमाजुषाणोरु पृथु प्प्रथमानं पृथिव्याम्। देवेभिर्य्युक्तमदितिः सजोषाः स्योनङ्कृण्वाना सुविते दधातु॥ २९.॥** इति मन्त्रेण वेद्यां कुशानास्तीर्य देवं स्थापयेत्। प्रतिष्ठोद्योते शुद्धदिगभिप्रायेण प्रत्यङ्मुखमित्युक्तम्॥

**स्नपनप्रयोगः**

उदङ्मुखो यजमानः आचम्य प्राणानायम्य। शान्तिपाठादिः। जलमादाय - अद्य ० पू ० तिथौ आसां प्रतिमानां अशुचिदेशकालादि-स्पर्शादि-सकलमालिन्य-निवृत्तिपूर्वकं शुचित्व-सिद्धये देवकलासान्निध्यहेतवे अर्चाशुद्ध्यर्थं प्रतिष्ठाङ्गभूतं स्नपनविधिं करिष्ये। तत्रादौ गणपतिस्मरणपूर्वकं कलशासादनं करिष्ये। ॐ **गणानान्त्वा....** गणपते नमः नमस्करोमि। ततः पूर्णपात्रवर्जं **ॐमही द्यौ** ० इत्यारभ्य **ॐ तत्त्वायामि** ० एषु कलशेषु वरुणम् आवाहयामि स्थापयामि। कलशान् वरुणं गन्धपुष्पादिभिः सम्पूज्य - **ॐ कलशस्य मुखे विष्णु** ० **ये तीर्थानि** ० इति सर्वकलशेषु तीर्थान्यावाह्य कलशाभिमन्त्रणम्। उत्तवेदीपरितोऽष्टकलशान् पूर्वादक्रमेण स्पृष्ट्वा ॐ हिरण्यगर्भः ० इत्यष्टमन्त्रैरभिमन्त्रयेत्।

ॐ हिरण्यगर्ब्भः समवर्त्तताग्रे भूतस्य जातः परिरेकऽआसीत्।
सदाधार पृथिवीं द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥ २३.१ ॥

उपयाम गृहीतोऽसि प्रजापतयेत्त्वा जुष्टङ्गृह्णाम्ये षते योनिः सूर्यस्ते महिमा।

यस्ते हन्त्संवत्सरे महिमा सम्बभूव यस्ते व्वायावन्तरिक्षे महिमा सम्बभूव यस्ते दिवि सुर्स्य महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये स्वाहा देवेभ्यः ॥ २३.२ ॥

षः प्राणतो निमिषतो महित्त्वैकऽइद्राजा जागतो बभूव।

यऽईशेऽअस्य द्विपदश्चतुष्पदः कस्मै देवाय हविधा बिधेम ॥ २३.३॥

उपयामगृहीतोसि प्रजापतये त्वा जुष्टङ्गृह्णाम्येष ते योनिश्चन्द्रमास्ते महिमा।

यस्ते रात्रौ संवत्सरे महिमा सम्बभूव षस्ते पृथिव्यामग्नै महिमा सम्बभूव षस्ते चन्द्रमसि महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये देवेभ्यः स्वाहा ॥ २३.४॥

युञ्जन्ति ब्रध्नमरुषञ्चरन्तम्परि तस्थुषः। रोचन्ते रोचना दिवि ॥ २३.५॥

षुञ्जन्त्यस्य काम्म्या हरी विपक्ष सारथे। शोणा धृष्णू नृवाहसा ॥ २३.६॥

यद्वा तोऽअपोऽअगनीगन्प्रियामिन्द्रस्य तन्वम्।

एत ऽस्तोतरनेन पथा पुनरश्वमावर्तयासि नः ॥ २३.७॥

वसवस्त्वाञ्जन्तु गायत्रेण च्छन्दसा रुद्रास्त्वाञ्जन्तु त्रैष्टुभेनच्छन्दसाऽऽदिस्त्वाञ्जन्तु जागतेन च्छन्दसा।

भूर्भुवः स्वार्ल्लाजी२ञ्छाची२न्यव्ये गव्यऽएतदन्नमत्त देवाऽएतदन्नमद्धि प्रजापते ॥ २३.८॥

**इत्यष्टकलशाभिमन्त्रणम्।**

ततः उत्तरवेद्यामन्तिमपङ्क्तौ स्थापितान् दशकलशान् क्रमेण -

त्रातारमिन्द्र ० त्वन्नोऽअग्ने ० यमायत्वाऽङ्गिरस्वते ० असुन्वन्तमयजमान ० तत्त्वायामि ० आनो नियुद्भिः ० वय ऽसोम ० तमीशानं ० अस्मे रुद्रा ० (ब्रह्मजज्ञानं ०) स्योना पृथिवि ० (नमोस्तु सर्पेभ्यो ०) इति लोकपालमन्त्रैरभिमन्त्रणम्। ततो दक्षिणवेदीसमीपस्थित-द्वितीयपङ्क्तेरन्तिमं हिरण्यादिसहितं स्थपतिसंज्ञकं द्वादशं कलशमादाय देवसमीपे निधाय तस्मिन् तीर्थान्यावाहयेते-

ॐ काशी कुशस्थली मायाऽवन्त्ययोध्या मधोः पुरी। शालिग्रामं सगोकर्णं नर्मदा च सरस्वती ॥ १॥
तीर्थान्येतानि कुम्भेऽस्मिन् विशन्तु ब्रह्मशासनात्। झषारूढा सरोजाक्षी पद्महस्ता शशिप्रभा ॥ २॥
आगच्छन्तु सरिज्ज्येष्ठा गङ्गा पापप्रणाशिनी। नीलोत्पलदलश्यामा पद्महस्ताम्बुजेक्षणा ॥ ३॥
आयातु यमुना देवी कूर्मयानस्थिता सदा। प्राची सरस्वती पुण्या पयोष्णी गौतमी तथा ॥ ४॥
ऊर्मिला चन्द्रभागा च सरयूर्गण्डिकी तथा। जम्बुका च शतद्रूश्च कलिङ्गा सुप्रभा तथा ॥ ५॥
वितस्ता च विपाशा च शर्मदा च पुनः पुनः। गोदावरी महावर्ता शर्कराऽवर्तमार्जनी ॥ ६॥
कावेरी कौशिकी चैव तृतीया च महानदी। विटङ्का प्रतिकूला च सोमनन्दा च विश्रुता ॥ ७॥
करतोया वेत्रवती देविका वेणुका च या। अत्रिगङ्गा वैतराणी काश्मीरी ह्लादिनी च या ॥ ८॥
प्लाविनी च शवित्रा सा कल्माषा शंसिनी तथा। वासिष्ठी चाप्यपापा च सिन्धुवत्यारुणी तथा ॥ ९॥
ताम्रा चैव त्रिसन्ध्या च तथा मन्दाकनी परा। तैलोष्णी चैव पारा च दुन्दुभिर्नकुली तथा ॥ १०॥
नीलगन्धा च गोधा च पूर्णचन्द्रा शशिप्रभा। अमरेशं प्रभासं च नैमिषं पुष्करं तथा ॥ ११॥
अषाढी दिष्टिभारत्नं भारभूतं बलाकुलम्। हकिश्चन्द्रं परं गुह्यं मध्यं मध्यमकेश्वरम् ॥ १२॥
श्रीपर्वतं समाख्यातं जलेश्वरमतः परम्। आम्रातकेश्वरं चैव महाकालन्तथैव च ॥ १३॥
केदारमुत्तमं गुह्यं महाभैरवमेव च। गया चैव कुरुक्षत्रं गुह्यं कनखलं तथा ॥ १४॥
विमलं चन्द्राहासं च माहेन्द्रं भीममष्टकम्। वस्त्रापदं रुद्रकोटिं ह्यविमुक्तं महाबलम् ॥ १५॥
गोकर्णं भद्रकर्णं च महेशस्वानमुत्तमम्। छागलाह्वं द्विरण्डं च कर्कोटं मण्डलेश्वरम् ॥ १६॥
कालञ्जरवनं चैव देवदारुवनं तथा। शङ्कुकर्णं तथैवेह स्थलेश्वरमतः परम् ॥ १७॥

एता नद्यश्च तीर्थानि गुह्यक्षेत्राणि सर्वशः। तानि सर्वाणि कुम्भेऽस्मिन् विशन्तु ब्रह्मशासनात् ॥ १८॥

इति तीर्थान्यावाह्य स्थपतिर्यजमानो वा-

ॐ ये तीर्थानि प्रचरन्ति ॰ ॐ इमम्मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं स च ता परुष्ण्या। असिक्न्या मरूद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया॥ (ऋ) इति मन्त्राभ्यां देवं स्नपयेत्।

यजमानो यथाशक्ति शिल्पिवर्गं सम्पूज्य मण्डेषाद बहिर्दितु प्राच्यां वा सिद्धार्थ घृतपायसबलिं दद्यात् पम्बकं पूजा जामहे ॰ रुद्राय नमः बलिं समर्पयामि। अप उपस्पृश्य देवसमीपमागत्य - सर्षपैः - ॐ त्रातरमिन्द्र ॰इति लोकपालमन्त्रैः ॐ प्राच्यै दिशे स्वाहेति ॰ मन्त्रेण वा मण्डपान्तर्दिग्रक्षणं कुर्यात्।

देवस्याग्रे चतुरो ब्राह्मणानुपवेश्य - जलमादाय - आसां प्रतिमानाम् अर्चाशुद्धि-देवकलासान्निध्यहेतवे स्नपनविध्यभ्युदयार्थं प्रैषात्मकपुण्याहवाचनं करिष्ये। सहिरण्यं पूगीफलमादाय - भो ब्राह्मणाः, प्रतिमाशुद्धिदेवकलासान्निध्यहेतवे करिष्यमाण प्रतिष्ठाङ्गभूतस्नपनकर्मणः **पुण्याहं** भवन्तो ब्रवन्तु इति त्रिः। **कल्याणं** ॰ **ऋद्धिं** ॰ **स्वस्ति** ॰ **श्रीरस्त्विति** ॰। ब्राह्मणाः - अस्तु पुण्याहम्। अस्तु कल्याणम्। कर्म ऋद्ध्यताम्। आयुष्मते स्वति। अस्तु श्रीः - इति प्रतिप्रैषान् क्रमेण दद्युः।

ब्राह्मणेभ्यो दक्षिणां दास्ये - दक्षिणां दत्त्वा स्नपनविधिमारभेत। स्नपनकलशेभ्यः किञ्चद् वारि परिशेष्य पात्रान्तरे संरक्ष्य तेन प्रासादध्वजपिण्डिकाशिखरादि प्रोक्षोत्। उदङ्मुखः प्राङ्मुखो वा यजमानः। स्वसम्मुखः प्रत्यङ्मुखो देवः।

**दक्षिणवेदी स्नपनम्**

| | |
|---|---|
| १. प्रथमेन मृत्तिकाकलशेन | ॐ अग्निर्मूर्धा दिवः ककुत्पतिः ॰। |
| २. द्वितीयेन कषायकलशेन | ॐ यज्ञा षज्ञावोऽअग्नये गिरा गिरा च दक्षसे। प्रप्रवयममृतञ्जातवेदसम्प्रिय - म्मित्रन्नश ँसिषम्॥ (२७.४२) |
| ३. तृतीयेन गोमुत्रकलशेन | ॐ तत्सवितु ॰। (गायत्री त्रिष्टुप् ॰)। |
| ४. चतुर्थेन गोमयकलशेन | ॐ गन्धाद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामहोपह्वये श्रियम्॥ (ऋ परि.) |
| ५. पञ्चमेन भस्मकलशेन | ॐ मानस्तोके तनये ॰। |
| ६. षष्ठेन गन्धोदककलशेन | ॐ ता ँसवितुर्व्वरेणस्य चित्रामाहं वृणे सुमतिं विश्वजनयाम्। यामस्य कण्वोऽअदुहत्प्रपीना ँसहस्रधाराम्पयसा महीङ्गाम्॥ (१७.७४) |

ततो द्वितीयपङ्क्तिस्थपञ्चदैवत्यैः कलशैः क्रमेण-

| | |
|---|---|
| १. गन्धोदकेन | ॐ नमः शम्भवाय च ॰। |
| २. गन्धोदकेन | ॐ हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता व्वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदतसद्व्योमसदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत्॥ (१०.२४) |
| ३. गन्धोदकेन | ॐ या ते रुद्र शिवा तनूरघोरा ॰। |
| ४. गन्धोदकेन | ॐ विष्णोरराटमसि ॰। |
| ५. गन्धोदकेन | ॐ ब्रह्मजज्ञानम्प्रथम ॰। |

ततो देवमूर्ध्नि दूर्वाक्षतपुष्पाणि दद्यात्।

ॐ शतं वोऽअम्ब धामानि सहस्रमुतवो रुहः।
अधा शतक्रत्त्वो षूयमिमम्मेऽअगदङ्कृत॥ (१२.७६)

सितसूक्ष्मवस्त्रेण देवमाच्छादयेत् -

ॐ सुजातो ज्योतिषा सह शर्म्म वरूथमासदत्स्वः।

वासोऽअग्ने व्विश्वरुप ꣳसंव्ययस्व व्विभावसो॥ (११.४०)

इति दक्षिणवेदीस्नपनम्॥

**मध्यमवेदीस्नपनम्**

भद्रपीठं स्थापयेत् ॰ ॐ भद्रङ्कर्णेभिः ॰॥ तत्र प्रागग्रकुशास्तरणम् ॐ स्तीर्ण्णं बर्हिः ॰। देवं तत्र निदध्यात्-ॐ इति प्रणवेन। (प्रतिमानां गुरुत्त्वाच्चालनासम्भवे स्वस्थानास्थितानामेव विधिः कार्यः) यजमानः प्रङ्मुखो वा उदङ्मुखो वा भूत्वा कुङ्कुमाक्तेन सूत्रेण लिङ्गमावेष्ट्य लिङ्गस्य मध्यभागे मुखं कल्पयित्वा तदुपरिभागे पञ्चसूत्रीविधानेन नेत्रे कनीनिकां पक्ष्मपुटद्वयञ्च कल्पयेत्। प्रतिमानां नेत्रे स्पष्टे एव सुवर्णादिपात्रे मध्वाज्यञ्च प्रक्षिप्य सुवर्णशलाकया नेत्रोन्मीलनं कुर्यात्। नेत्रपुरत आदर्शं निधाय सन्धार्य दृष्टिपथाज्जनानपसार्य सुवर्णपायसभक्ष्यभोज्यादि-पुरतः सन्धार्य प्रथमं दक्षिणनेत्रं सुवर्णशलाकया मध्वाज्याभ्यामुन्मीलयेत्-ॐ चित्रन्देवाना ॰। अर्धर्च्चेन-ततः ऊर्ध्वाधः पृथग्भूतं पक्ष्मपुटद्वयं कनीनिकाञ्च कल्पयेत्-ॐ आ कृष्णेन रजसा ॰। एवं वामनेत्रमप्यङ्क्त्वा-प्रतिप्रतिमं मन्त्रावृत्त्या नेत्रोन्मीलनं कुर्यात्। (शिल्पी लोहेन उल्लिखेत्-नेत्रयोः पूर्वमेव सम्पादितत्त्वादिदं न कार्यम्)

ततोः गुरुः प्रतिमां मधुसर्पिर्भ्यामभ्यञ्जयेत्-

ॐ घृतेन सीता मधुना समज्यतां विश्वैर्देवैरनुमता मरुद्भिः।

ऊर्जस्वती पयसा पिन्न्वमानास्मान्सीते पयसाभ्याववृत्स्व॥ (१२.७०)

ततो द्वादशमृद्भिः देव स्नपयेत् - ॐ इदं विष्णुर्विचक्रमे ॰।

ततो गोमयेन - ॐ मानस्तोके तनये ॰।

ततः प्रथमवेदीस्थकलशवद् द्वितीयवेदीस्थकलशैः क्रमेण प्रथमवेदीस्नपनोक्तमन्त्रैः स्नपयेत्।

| | |
|---|---|
| १. प्रथमं मृत्तिका | ॐ अग्निर्मूर्धा दिवः ककुत्पतिः ॰। |
| २. द्वितीयं कषायम् | ॐ यज्ञा यज्ञावोऽअग्नये गिरा गिरा च दक्षसे। प्रप्रवयममृतञ्जातवेदसम्प्रिय - म्मित्रन्नश ꣳसिषम्॥ (२७.४२) |
| ३. तृतीयं गोमूत्रम् | ॐ तत्सवितु ॰। (गायत्री त्रिष्टुप् ॰)। |
| ४. चतुर्थं गोमयम् | ॐ गन्धाद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामहोपह्वये श्रियम्॥ (ऋ परि.) |
| ५. पञ्चमं भस्म | ॐ मानस्तोके तनये ॰। |
| ६. षष्ठेन गन्धोदकम् | ॐ ता ꣳसवितुर्वरेणस्य..... महीङ्गाम्॥ (१७.७४) |

ततो द्वितीयपङ्क्तिः दन्धोदकैः पञ्चदैवत्यैः कलशैः क्रमेण-

| | |
|---|---|
| १. गन्धोदकेन | ॐ नमः शम्भवाय च ॰। |
| २. गन्धोदकेन | ॐ ह ꣳसः..... ऋतम्बृहत्॥ (१०.२४) |
| ३. गन्धोदकेन | ॐ या ते रुद्र शिवा तनूरघोरा ॰। |
| ४. गन्धोदकेन | ॐ विष्णोरराटमसि ॰। |
| ५. गन्धोदकेन | ॐ ब्रह्मजज्ञानम्प्रथम ॰। |

ततो यजमानः सुवर्णशलाकां स्नानवस्त्रं च शिल्पिने दद्यात्। गुरवे सुवर्णसहितां गां दद्यात्।

## शब्दार्थाः

**स्नपनम्** - अभिषेकः, **दोला** - दोलापन्त्रम्, **नेत्रोन्मीलनम्** - नयनोद्घाटनम्, **स्थपतिः** - शिल्पी **ब्रह्मशासनम्** -भगवदाज्ञा, **कुशास्तरणम्** - दर्भासनम्।

## स्वाध्यायः

**१. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) मृत्तिकायाः मन्त्रः ......... वर्तते। (अग्निर्मूर्धा, बृहस्पते, महीद्यौः)

(२) यजमानः ......... मुखः उपविशेत्। (उदङ्, प्राङ्, दक्षिण)

(३) कषाय मन्त्रः ......... वर्तते। (यज्ञा यज्ञावो, गन्धद्वारा, नमः शम्भवाय)

(४) ......... नेत्रोन्मीलनं कुर्यात्। (रजतेन, सुवर्णेन, सुवर्णशलाकया)

**२. अधस्तनप्रश्नानामुत्तराणि लिखत।**

(१) स्नपनविधेः कति कलशपक्षाः सन्ति ?

(२) स्नपनविधौ कानि द्रव्याणि भवन्ति ?

(३) स्नपनवेदीनां नामानि कानि ?

(४) नोत्रोन्मीलनं कदा कर्तव्यम् ?

(५) द्वितीयवेदीकलशेः स्नपने कैः पदार्थैः स्नपनं भवति ?

**३. टिप्पणीं कुरुत।**

(१) स्नपनवेदीरचना।

(२) स्नपनचक्रनिर्माणम्।

(३) प्रथमवेदीस्नपनक्रमः।

(४) नेत्रोन्मीलनम्।

**छात्रप्रवृत्तिः**

- छात्राः स्नपनौषधीनामन्वेषणं संशोधनं च कुर्वन्तु।

**अध्यापकप्रवृत्तिः**

- अध्यापकः स्नपनवेदीनां भिन्नप्रकारेण निर्माणं संशोधयित्वा ज्ञापयेत्।

# ८ स्नपनविधिः २

**प्रस्तावना**

अस्माभिः स्नपनविधेः प्रथमभागे दक्षिण-मध्यमवेद्योः चर्चा कृता। अत्र द्वितीयभागे स्नपनविधेः उत्तरवेदीविषये ज्ञानं प्राप्स्यामः।

---

**अथ उत्तरवेदीस्नपम्**

गरुरुत्तरस्यां वेद्यां ॐ भद्रङ्कर्णेभिः... ॰ इति भद्रपीठं निधाय ॐ स्तीर्णं बर्हिः... ॰ इति प्रागग्रान् कुशानास्तीर्य ॐ इति प्रणवेन देवं भद्रासने संस्थाप्य लौकिककलशेन स्नपयेत् -

ॐ समुद्राय त्त्वा वाताय स्वाहा शरीराय त्त्वा व्वाताय स्वाहा।

अनाधृष्याय त्त्वा व्वाताय स्वाहा प्रतिधृष्याय त्त्वा व्वाताय स्वाहा।

अवस्यवे त्वा व्वाताय स्वाहा शिमिदाय त्त्वा व्वाताय स्वाहा ॥ ३८.७॥

ततः सम्पूज्य देवीमूर्ध्नि दूर्वापुष्पाक्षतान् दद्यात् - ॐ शतं वोऽअम्ब... ॰॥

ततो देवं प्रार्थयेत् -

ॐ नमस्तेऽर्चे सुरेशानि प्रकृते विश्वकर्मणः।

प्रभाविताशेषजगद्धात्रि तुभ्यं नमो नमः॥

त्वयि सम्पूजयष्यामि नारायणमनामयम्।

(अथवा - **नारायणमनामयम्** स्थाने - महादेवमनामयम्, जगदम्बामनामनामयीम्)

रहिताशेषदोषैस्त्वम् ऋद्धियुक्ता सदा भव॥ इति प्रार्थ्य -

(पूर्वं न बद्धं चेदधुना देवदक्षिणहस्ते वितस्तिमात्रं हरिद्राक्तमूर्णासूत्रम् - ॐ षदा बध्नन् ॰। इति मन्त्रेण बध्नीयात्)

सर्वदेवमयं शन्तं परं ब्रह्म सनातनम्। त्वामेवालङ्करिष्यामि त्वं वन्द्यो भवते नमः॥ इति प्रणमेत्॥

ततो द्वितीयपङ्क्तिस्थैः अन्तिमैश्चतुर्भिः **समुद्रसंज्ञितैः** कलशैर्देवं स्नपयेत् -

१. ॐ इदमापः प्रवहतावद्यञ्च मामञ्च यत्।
   यच्चाभिदुद्रोहानृतं यच्च शेपेऽअभीरुणम्।
   आपो मातस्मादेनसः पवमानश्च मुञ्चतु॥ (६.१७)
   ॐ समुद्रज्येष्ठाः सलिलस्य मध्यात् पुनानायन्त्यनिविशमानाः।
   इन्द्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवन्तु॥ (ऋ ७.४९.१)
   ॐ समुद्रादूर्मि...॰॥ (१७.८९)

२. ॐ आपो देवीः प्रति गृभ्णीत भस्मै तत्स्योने कृणुध्व ँ सुरभा ऽउलोके।
   तस्मै नमन्तानयः सुपत्नीर्मातेव पुत्रम्बिभृताप्स्वेनत्॥ (१२.३४)

३. ॐ इमम्मे व्वरुण... ॰।

४. ॐ तत्त्वा यामि... ॰। समुद्रे त्वा नृमणा - अवदर्धन्। (१२.२०)

ततः प्रथमद्वितीयपङ्क्तिभ्यां पर्यायेण कलशानादय स्नपयेत् -

| | |
|---|---|
| १. मृत्तिकाकलशः | ॐ अग्निमूर्धा दिव... ० |
| १. शुद्धकलशेन | ॐ देवीरापो ऽअपान्नपाद्यो वऽ ऊर्मिर्हविष्यऽइन्द्रियावान्मदिन्तमः।<br>तन्देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषां भागस्थ स्वाहा॥ (६.२७) |
| २. दशपलगोमयकलशः | ॐ गन्धद्वारां दुराधर्षां...॥ (ऋ. परि.) |
| २. शुद्धकलशः | ॐ अप्सुमे सोमो अब्रवीदन्तर्विश्वानि भेषजा।<br>अग्निञ्च विश्वशम्भूवमापश्च विश्वभेषजीः॥ (ऋ १.२३.२०) |
| ३. द्वादशपलगोमूत्रकलशः | ॐ तत्सवितुर्व... ०॥ |
| ३. शुद्धकलशः | ॐ आपो हिष्ठामयो... ०॥ |
| ४. मुष्टिसम्मितभस्मकलशेन | ॐ प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने।<br>स ꣳ सृज्य मातृभिष्ट्वञ्ज्योतिष्मनान् पुनरासदः॥ (१२.३८) |
| ४. शुद्धकलशः | ॐ शन्नो देवी रभिष्टय... ०॥ |
| ५. त्रिपलसम्मितपञ्चगव्यकलशः | ॐ पयः पृथिव्यां... ०। |
| ५. शुद्धकलशः | ॐ यो वः शिवतमो... ०॥ |
| ६. षोडशपलक्षीरकलशः | ॐ अप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्।<br>भवा व्वाजस्य संगथे॥ (१२.११२) |
| ६. शुद्धकलशः | ॐ तस्म्माऽअरङ्ग |
| ७. पञ्चविंशतिपलदधिकलशः | ॐ दधिक्राव्णो... ०। |
| ७. शुद्धकलशः | ॐ युञ्जानः प्रथमम्मनस्तत्त्वाय सविता धियः।<br>अग्नेर्ज्योतिर्निचाय्य पृथिव्याऽअध्याभरत॥ |
| ८. पञ्चविंशतिपलदधिकलशः | ॐ घृतवती भुवनानामपि श्रियोर्वी पृथ्वी मधु दुधे सुपेशसा।<br>द्यावा पृथिवी व्वरुणस्य धर्मणा विष्कभीतेऽ अजरे भूरिरेतसा॥ (३४.४८) |
| ८. शुद्धकलशः | ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।<br>सरस्वत्यै व्वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि॥ (१८.३७) |
| ९. त्रिपलमधुकलशः | ॐ मधुव्वाताऽ ऋता... ०॥ |
| ९. शुद्धकलशः | ॐ आपोऽस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु।<br>विश्वꣳ ꣳ हरिप्प्रंवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽएमि।<br>दीक्षा तपसोस्तपूरसितान्वा शिवाꣳ ꣳ शग्मामम्परिदधे भद्रं वर्ण्णं पुष्यन्॥ (४.२) |
| १०. त्रिपलशर्कराकलशः | ॐ स्वादिष्ठया मदिष्ठया पवस्व सोमधारया।<br>इन्द्राय पातवे सुतः॥ (२६.२५) |
| १०. शुद्धकलशः | ॐ आपो ह षत् बृहतीर्विश्वमायन् गर्भन्दधाना जनयन्तीरग्निम्।<br>ततो देवाना ꣳ समनर्ततासुरेकः कस्मै देवाय हविषा विधेम॥ (२७.२५) |

ततो देवस्य वस्त्रेण सम्मार्जनम् -

ॐ यज्ञ यज्ञावो० अग्नये... ०॥

सुगन्धितैलेनाभ्यञ्जनम् -

ॐ त्र्यम्बकं... ०॥

यवशालिगोधूमबिल्वचूर्णैः उद्वर्तनम् -

ॐ द्रुपदादिव... ०॥

यक्षकर्दमेन अङ्गलेपनम् -

ॐ कस्तूरिकाया द्वौ भागौ द्वौ भागौ कुंकुमस्य च।

कर्पूरस्य त्रयो भागाः शशिनस्त्वेक एव हि॥

शशी-शिलाजित् -

ॐ या ते रुद्र शिवा... ०॥

जटामांस्यनुलेपनम् -

ॐ या ओषधिः... ०॥

ततो लौकिककलशद्वयेन स्नपनम् -

ॐ मानस्तोके तनये... ०॥

ॐ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः।

यस्योरुषुः त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा॥ (५.२०)

ततः तृतीयपङ्क्तिः पृथक् पृथक् पञ्चामृतकलशैः, पर्यायेण चतुर्थपङ्क्तिश्च शुद्धोदककलशैः स्नपम् -

१. पयःकलशः - ॐ अस्य प्रत्नामनुद्युतꣳ शुक्रन्दुहेऽअह्वयः। पयः सहस्रसामृषिम्॥ (३.१६)

१. शुद्धकलशः - ॐ आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यम्। भवा धाजस्य सङ्गथे॥ (१२.११२)

२. दधिकलशः - ॐ पयसो रूपं यद्यवा दध्नो रूपङ्कर्कन्धूनि।
सोमस्य रूपं व्वाजिनꣳ सौम्यस्य रूपमामिक्षा॥ (१९.२३)

२. शुद्धकलशः - ॐ सन्ते पयाꣳसि समु यन्तु व्वाजाः सं वृष्ण्यान्याभिमातिषाहः।
आप्यायमानोऽअमृताय सोम दिवश्रवाꣳ स्युत्तमानि धिष्व॥ (१२.११३)

३. घृतकलशः - ॐ घृतेनाञ्जन्सम्पथो देवयानान्प्रजानन्वाज्यप्येतु देवान्।
अनु त्वा सप्ते प्रदिशः सचन्ताꣳ स्वाधामस्मै यजमानाय धेहि॥ (२९.२)

३. शुद्धकलशः - ॐ आप्प्यायस्व मदिन्तम सोम विश्वेभिरꣳ शुभिः। भवानः सप्रथस्तमः सखा धृधे॥ (१२.११४)

४. मधुकलशः - ॐ स्वाहा मरुद्भिः परिश्रीयस्व दिव सꣳ स्पृशस्पाहि। मधु मधु मधु॥ (३७.१३)

४. शुद्धकलशः - ॐ आ ते व्वत्सो मनो यमत्परमाच्चित्सधस्थात्। अग्ने त्वाङ्कामया गिरा॥ (१२.११५)

५. शर्कराकलशः - ॐ स्वादिष्ठया मदिष्ठया... ०॥

५. शुद्धकलशः - ॐ तुभ्यन्ताऽअङ्गिरस्तम विश्वाः सुक्षितयः पृथक्। अग्ने कामाय येमिरे॥ (१२.११६)

ततः पञ्चमपङ्क्तिस्थैः पञ्चकषायकलशैः - ॐ यज्ञा यज्ञावो... ०॥ इति मन्त्रावृत्त्या पृथक् पृथक् स्नपनम्।

(अथवा एभिः पञ्चमन्त्रैः - )

१. ॐ अश्वत्थेवो निषदनं... ०॥

२. पर्णकषाय निष्पकवा एता आपो भवन्ति, स्थेम्ने न्वेव यद्वेव पर्णकषायेण सोमो वै पर्णश्चन्द्रमा उ वै सोम एतदु वा एकमग्निरूपमेतस्यैवाग्निरूपोस्यात्यै॥ (शतं का. ६ अ. ५ कं. १)

३. औदुम्बरं भवति तेन स्वोभिषिञ्चन्त्यन्नं वाऽऊर्गुदुम्बर ऊर्ग्वै स्वं यावत् वै पुरुषस्य स्वं भवति नैव तावदशनायति तेनोर्क स्वं तस्मादौदुम्बरेण स्वोभिषिञ्चति॥

४. नैयग्रोधपादं भवति, तेन मित्रो राजन्योभिषिञ्चति पद्भिर्वै न्यग्रोधः प्रतिष्ठितो मित्रेण वै राजन्यः प्रतिष्ठितस्तस्मान्नैयग्रोधपादेन मित्रो राजन्योऽभिषिञ्चति॥

५. आश्वत्थं भवति तेन वैश्योऽभिषिञ्चति स यदेवादोऽश्वत्थे तिष्ठतऽइन्द्रो मरुतऽउपामन्त्रयते तस्मादाश्वत्थेन वैश्योऽभिषिञ्चति॥

ततो लौकिककलशेन ओषधियुक्तेन — ॐ या ओषधीः पूर्वा... ०॥

द्वितीयेन शान्तिकलशेन लौकिकेन — ॐ द्यौः शान्ति... ०॥

ततः षष्ठपङ्क्तिस्थैर्दशभिः कलशैः क्रमेण स्नपनम् —

१. सितपुष्पोदकम् - ॐ ओषधीः प्रतिमोदध्वं... ०॥

२. अष्टफलकलशः - ॐ याः फलिनीर्या... ०॥

३. सुवर्णजलकलशः - ॐ हिरण्यगर्भः समवर्तताग्रे... ०॥

४. गोशृङ्गोदककलशः - ॐ हविष्मतीरिमाऽ आपो हविष्माँ२ऽआविवासति।

हविष्मान्देवोऽ अध्वरो हविर्ष्मा२ऽअस्तु सूर्यः॥ (६.२३)

५. धान्यकलशः - ॐ धान्यमसि धिनुहि... ०॥ (व्रीहयश्च मे... ०)॥

६. सहस्रधारकलशः - ॐ सहस्रशीर्षा... ०॥

७. सर्वोषधिकलशः - ॐ याऽ ओषधीः... ०॥

८. पञ्चपल्लवोदककलशः - ॐ उतस्मास्यद्रवतस्तुरण्यतः... ०॥

९. दूर्वोदककलशः - ॐ काण्डात्काण्डा... ०॥

१०. नवरत्नकलशः - ॐ परिवाजपतिः... ०॥

वेदीं परितः स्थापितसमुद्रसंज्ञकैरष्टाभिः कलशैः पूर्वादिक्रमेण देवं स्नपयेत् -

१. पूर्वकलशक्षारोदकम् - ॐ कयानाश्चित्रऽआभुव... ०॥

२. अग्निकलशक्षीरोदकम् - ॐ आप्यायस्व समेतु... ०॥

३. दक्षिणकलशदध्युदकम् - ॐ दधिक्राव्णो... ०॥

४. नैऋत्यकलशदघृतोदकम् - ॐ घृतवती भुवनानामभि... ०॥

५. पश्चिमकलशेक्षुरसोदकम् - ॐ पयः पृथिव्यां... ०॥

६. वायव्यकलशसुरोदकम् - ॐ सिञ्चन्ति परिषिञ्चन्ति... ०॥

७. उत्तरकलशस्वादूदकम् - ॐ स्वाद्वीन्त्वा स्वादुना तीव्रान्तीव्रेणामृताममृतेन। मधुमतीम्मधुमता सृजामि

सꣳ सोमेन॥ सोमोस्यश्विभ्याम्पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सूत्राम्णे पच्यस्व॥ (१९.१)

८. ईशानकलशगर्भोदकम् - (नारिकेलोदकम्) -

ॐ सरस्वती योन्याङ्गर्भमन्तरश्विभ्याम्पत्वमी सुकृतम्बभर्ति।

अपाꣳ रसेन व्वरुणो न साम्नेन्द्रꣳ श्रियै जनयन्नप्सु राजा॥ (१९.९४)

ततोऽन्तिमपंङ्क्तिस्थैर्लोकपालसंज्ञकैर्दशकलशैः स्नपयेत्।

१. कदम्ब ॰ ओं त्रातारमिन्द्र ॰

२. शाल्मलि ॰ ओं त्वनोऽअग्ने ॰

३. जम्बू ॰ ओं यमाय त्वांगरस्वते ॰

४. अशोक ॰ असुन्वन्तमयज ॰

५. प्लक्ष ॰ तत्त्वायामि

६. आम्र ॰ ओं आनो नियुद्भिः

७. वट ॰ ओं वयः सोम व्रते तव ॰

८. बिल्व ॰ ओं तमीशानं ॰

९. पलाश ॰ ओं ब्रह्म यज्ञानं ॰

१०. नागचम्पकं ॰ ओं नमोस्तु सर्पेभ्यो ॰

ततः सुमङ्गलघोषैः सुवासिनीभिः चतुर्भिर्लौलिकैरेकेन वा लौकिकेन कलशेन देवं स्नपयेत् - ओं द्यौः शान्तिः ॰ यतो यतः ॰ पालाशं भति ॰ औदुम्बरं भवति ॰ नैयग्रोधपादं ॰ आश्वत्थं भवति ॰ सर्वेषां वा एष ॰ एवं देवं स्नपयित्वा सम्मार्ज्य संशोध्य पूजनं कुर्यात्।

ततः सुगन्धिना सितवस्त्रेण देवं परिमृज्य संकलीकरणनम्।

प्रतिमाङ्गानि स्पृष्ट्वा - हृदयाय नमः, शिरसे स्वाहा, शिखायै वषट्, कवचाय हुम्, नेत्रत्रयाय वौषट्, अस्त्राय कट्। ओं विश्वश्चक्षु ॰ इति मन्त्रेण दक्षिणहस्ततर्जनीं प्रतिमापरितः भ्रामयेत्।

ततः पूजनम् -

आवाहनम् - एह्येहि भगवन्देव लोकानुग्रहकाम्यया। यज्ञभागं गृहाणेमं देव देव नमोऽस्तु ते॥

("विरोधेऽर्थस्तत्परत्वात्" इति न्यायेन पद्धत्युक्तक्रमेण परिवर्त्य क्रमेण पूजनम्) अत्र षोडशोपचारैः पूजनं कर्तव्यम्।

स्नानवस्त्रनैवेद्यादिकं शिल्पिने दद्यात्। ततः सामिधेनीकल्पेन देवं स्तुवीत - ओं भूः ओं भुवः ओं स्वः पुरुषसूक्तस्य मन्त्रान् सप्रणवं योजयेत्। अन्तिममृचं तारसप्तकेन ब्रूयात्।

जलमादाय - स्नपनकर्मसाङ्गतासिद्ध्यर्थं ब्राह्मणेभ्यो दक्षिणां दास्ये। प्रतिमासु अर्चाशुद्धिपूर्वकं देवदिव्यकलातेजोऽभिवृद्ध्ये कृतेन स्नपनकर्मणा स्थाप्यदेवः सपरिवारः प्रीयताम्।

इति स्नपनविधिः।

## शब्दार्थाः

**ऊर्णासूत्रम्** - कौतुकम्, **मुष्टिसम्मितः** - तवत्परिमाणयुतः, **अभ्यंजनम्** - लेपनम्, **गर्भोदकजलम्** - नारिकेलजलम्, **लोकपालाः** - (अत्र) दिक्पालाः, **मन्दस्वरः** - अल्पस्वरमुच्चारणम्।

## स्वाध्यायः

**१. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) वेदीपरितः ......... कलाशाः भवन्ति। (अष्ट, पचं, षट्)

(२) उत्तरकलशे ......... उदकं वर्तते। (स्वादु, गन्धं, क्षार)

(३) षष्ठपंक्त्यां ......... कलशाः भवन्ति। (नव, अष्ट, दश)

(४) दक्षिणदिशि ......... उदकं भवति। (दधि, पयः, जलम्)

(५) नारिकेलोदकम् ......... दिशि भवति। (ईशाने, अग्नौ, वायव्ये)

(६) पूर्वकलशे ......... उदकं भवति। (क्षारः, दधि, पयः)

**२. श्लोकान् पूरयत।**

(१) एह्येहि भगवन् देव ......... ०।

(२) ॐ नमस्तेऽर्चे सुरेशानि ......... ०।

(३) सर्वदेवमयं शान्तम् ......... ०।

**३. मन्त्रपूर्तिं कुरुत।**

(१) ॐ आप्यायस्व ......... ०।

(२) ॐ पयसो ......... ०।

(३) ॐ स्वाहा मरुद्भिः ......... ०।

(४) ॐ प्रसद्य भस्मना ......... ०।

(५) ॐ प्रतद्विष्णुस्तवते ......... ०।

(६) ॐ स्वादिष्ठया ......... ०।

**५. 'क' विभागस्य 'ख' विभागस्य योग्यं मेलनं कुरुत।**

| **'क' विभागः** | **'ख' विभागः** |
|---|---|
| (१) पूर्वकलशः | (१) सुरोदकम् |
| (२) वायव्यक | (२) क्षारोदकम् |
| (३) ईशानकलशः | (३) नारिकेलोदकम् |
| (४) दक्षिणकलशः | (४) इक्षुरसोदकम् |
| (५) पश्चिमकलशः | (५) घृतोदकम् |
| | (६) दध्युदकम् |

**५. अधस्तनप्रश्नानामेकवाक्येन उत्तरं यच्छत।**

(१) उत्तरवेद्यां स्थापितकलशानां संज्ञाः काः ?

(२) उत्तरवेदीस्नपने कानि द्रव्याणि उपयुज्यन्ते ?

(३) स्नपनसमये प्रयुक्तं वस्त्रनैवेद्यादिकं कस्मै दीयते ?

(४) सामीधेनीकल्पेन देवस्तवने कतमत् सूक्तं पठ्यते ?

**६. अद्यस्तनविधीनां वर्मनं कुरुत।**

(१) उत्तरवेदीनर्माणम्।

(२) उत्तरवेद्याः कलशानां संज्ञा।

(३) उत्तरवेदीस्नपनक्रमः।

(४) अनस्नपनकर्तव्यान।

**छात्रप्रवृत्तिः**

- छात्राः कलशनिः क्षिप्यानां पदार्थानां संग्रहं कुर्युः।
- स्नपनविधेः प्रायोगिकं कुर्युः।
- छात्राः अपठितमन्त्रान् मुखपाठान्

**अध्यापकप्रवृत्तिः**

- अध्यापकः छात्रान् उत्तरवेद्याः कलशसंज्ञाः बोधयेत्।
- अध्यापकः छात्रान् उत्तरवेद्याः निर्माणं पाठयेत्।
- अध्यापकः छात्रान् उत्तरवेदीस्नपनानन्तरं कर्तव्यानि कार्याणि सूचयेत्।

●

| ९ | अधिवासः-तत्त्वन्यासः |
|---|---|

**प्रस्तावना**

प्रतिमानां जल-शय्या-धान्येषु त्रिषु सप्त-पञ्च-त्र्येकरात्रं प्रहरमात्रं गोदोहनमात्रं वा समयं यावत् वासः सुप्तिः वा अधिवासः इति उच्यते। हयशीर्षे पञ्चरात्रादिषु आगमग्रन्थेषु अधिवासप्रकाराः प्रोक्ताः।

जलाधिवासः गन्धादिवासः पुष्पाधिवासः धान्यादिवासः फलाधिवासः औषध्यधिवासः शय्याधिवासः इत्यादि। तत्र जलाधिवासः धान्यादिवासः शय्याधिवासश्च एते त्रयः सर्वेः पद्धतिकृद्भिः प्रोक्ताः। अन्येषां विषये मतमतान्तराणि वर्तन्ते।

---

जलाधिवासः प्रप्रथममेव भवति। स्नपनान्तरं शय्याधिवासः धान्याधिवासः च सममेव भवति। अधिवासने तत्त्वन्यासानन्तरं निद्रादेव्या आवाहनं भवति। तदनु **मण्डलशय्ययोरन्तरे न गन्तव्यम्, सुखशायी भव** इति प्रैषद्वयं प्रदीयते। प्रतिष्ठासमयमनुलक्ष्य अधिवासस्य दीर्घत्वं स्वीकार्यम्। सर्वेऽधिवासाः यदि सममेव भवेश्चेद् युक्ततरम्। यतो हि देवस्य पार्थक्येन अधिवासने सति प्रत्यधिवासनं निद्रावाहनं तत्वन्यासाश्च विदध्युः इति देवस्य कष्टकरं तद्यथा न्यूनीभवेत् तथा विधेयमिति विवेकः।

**अधिवासने कर्तव्यम्** -

यावन्ति दिनान्यधिवासः क्रियते तावत् प्रतिदिनं प्रातः स्थापितदेवतापूजनं तद्नु ब्राह्मणपूजनं तदनु च शान्तिकपौष्टिहोमः स्थापितदेवताहोमः व्याहृतिहोमः तत्त्वन्यासः प्रतिमालम्भनं होमनिवेदनं च इत्येतत् करणीयम्। सायं काले च पूजननीराजनादिसायंविधानमाचरणीयम्।

अनेकदिननवर्तेऽप्यधिवासनकर्मणि।

होमानष्टौ सहस्राणि विदधीरन् पृथक् पृथक्॥ (प्रतिष्ठा-वासुदेवी)

इत्यनुसृत्य १००८ वा १०८ आहतिसङ्ख्या भवेत्। विप्रद्रव्ययोः देशकालौ सङ्कीर्त्य २८ आहुतयः वा भवेयुः।

**मण्डपे शय्यारचनम्**

ततः सर्वतोभद्रकुण्डयोरन्तराले मध्यवेद्यां प्रतिमानां गुरुत्वादन्यत्र वा पर्यङ्के वा पट्टके तूलिकोपधानास्तरणाच्छादनयुतां शय्यां विरच्य तत्र धान्यफलौषधखाद्यान्नानि निधाय शय्यायां व्रीहीन् गोधूमाँस्तण्डूलान् वा प्रक्षिप्य - **ॐ रथे तिष्ठन्...** इति देवताप्रतिमामादाय शान्तिसूक्तं भद्रसूक्तं वा पठन् मण्डपप्रादक्षिण्येन पश्चिमद्वारि आनीय - सम्पूज्य **ॐ धामन्ते...** इति अर्घं दत्वाशय्यायां प्राक्शिरस्कामानीय दक्षिणशिरस्कां वा प्रतिमा शनैः शाययेत् **ॐ आप्यायस्व समेतु...** इति मधुसर्पिर्भ्यामभ्यज्य **ॐ या ते रुद्र शिवा॰** इति तैलसर्षपफल्कैरुद्वर्त्य गन्धादिना सम्पूज्य तत्र -

**छत्रम् - ॐ बृहस्पतेच्छदिरसि पाप्मनो मामन्तर्धेहि तेजसो यशसो मान्तर्धेहि।**

**वितानम् - ॐ मर्माणि ते वर्म्मणा...**

**व्यजनम् - ॐ आनो नियुद्भिः...**

**चामरम् - ॐ वायो ये ते...**

**आदर्शः - ॐ रोचिष्णुरसि...**

**ॐ त्रीणि पदा...** - इति शान्तिकुम्भौ।

**पादुके - ॐ प्रतिष्ठेस्थो विश्वतो मा पातम्।**

शिर:प्रदेशे सजलं निद्राकलशम् - अन्यच्च भक्ष्य - भोज्यादि-खाद्यपूरितं कलशं **ॐ आजिघ्र कलशं मह्या...** इति स्थापयेत्। अग्रतः सुवर्चसं दीपं दूरे स्थापयेत्। देवम् आच्छादनतूलिकया आच्छाद्य परितो भस्मदर्भतिलैः प्राकारत्रयं कुर्यात्।

**तत्त्वान्यासा:**

शान्तिकपौष्टिकादिहोमकाले एव यजमानम्यं प्रतिनिधिं वा देवसमीपे उपवेश्य। पूर्वं मण्डपे शय्याविरचनं कृतम्। तदनन्तरं यजमानः प्राङ्मुख उपवेश्य। जलमादाय - आसु प्रतिमासु सूर्याचन्द्रमसौ यावत् सकलतत्त्वदेवकलादव्यतेजो निष्पत्तये शय्याधिवासं तत्त्वाधिन्यासाँश्च करिष्ये। **शय्या सुप्ताः प्रतिमाः परितः।**

**शैवे** -

**पूर्वदिक्रमेण** - १. भवाय नमः भवम् आवाहयामि स्थापयामि। (एवं क्रमेण). २. शर्वाय नमः ३. ईशनाय नमः ४. पशुपतये नमः ५. रुद्राय नमः ६. उग्राय नमः ७. भीमाय नमः ८. महते नमः इति आवाह्य पूजयेत्।

**वैष्णवे** - १. विष्णवे नमः २. श्रीधराय नमः ३. मधुसूदनाय नमः ४. हृषीकेशाय नमः ५. त्रिविक्रमाय नमः ६. पद्मनाभाय नमः ७. वामनाय नमः ८. दामोदराय नमः

इति अष्टदेवताः आवाह्य पूजयेत् बलिद्वयं च दद्यात्। बलिं सम्पूज्य। ॐ त्र्यम्बकं यजामहे०। ॐ नमः पूवादिक्दिग्वासिदिक्पति-गणपति-रुद्र-मातृ-क्षेत्रपालेभ्यः अमुं बलिं निवेदयामि। इति जलं त्यक्त्वा आचामेत्। प्रतिमानां तानि तानि अङ्गानि स्पृष्ट्वा न्यासाः कार्याः इति प्रथमः कल्पः, किन्तु प्रतिमानामाच्छाजित्वात् बहुप्रतिमासत्त्वे च सर्वासामेककालावच्छेदेन अक्षतैः न्यासाः कार्याः, इति याज्ञिकसम्प्रदायः।

हस्ते अक्षतान् गृहीत्वा - सर्वत्र आदौ प्रणवः। अन्ते नमः पदं योज्यम्।

**१. प्रणवन्यासः** - १. ॐ अकाराय नमः (शिरसि) २. ॐ उकाराय नमः (पादयोः) ३. ॐ मकराय नमः (ललाटे)

**२. व्याहृतिन्यासः** - १. ॐ भूर्नमः (पादयो) २. ॐ भुवर्नमः (हृदये) ३. ॐ स्वर्नमः (ललाटे)

**३. मातृकान्यासः** - १. ॐ अकाराय नमः (तालौ) २. ॐ आकाराय नमः (मुखे) ३. ॐ इकाराय नमः (दक्षिणनेत्रे) ४. ॐ ईकाराय नमः (वामनेत्रे) ५. ॐ उकाराय नमः (दक्षिणकर्णे) ६. ॐ ऊकाराय नमः (वामकर्णे) ७. ॐ ऋकाराय नमः (दक्षिणगण्डे) ८. ॐ ॠकाराय नमः (वामगण्डे) ९. लृकाराय नमः (दक्षिणनासायाम्) १०. ॡकाराय नमः (वामनासायाम्) ११. एकाराय नमः (ऊर्ध्वदन्तपंक्तौ) १२. ऐकाराय नमः (अधोदन्तपंक्तौ) १३. ओकाराय नमः (ऊर्ध्वोष्ठे) १४. औकाराय नमः (अघरोष्ठे) १५. अंकाराय नमः (ललाटे) १६. अःकाराय नमः (दिह्वायाम्) १७. यकाराय नमः (त्वचि) १८. रकाराय नमः (चक्षुषोः) १९. लकाराय नमः (नासिकयोः) २०. वकाराय नमः (दन्तेषु) २१. शकाराय नमः (नेत्रयोः) २२. षकाराय नमः (उदरे) २३. सकाराय नमः (कट्योः) २४. हकाराय नमः (हृदये) २५. लकाराय नमः (नाभौ) २६. क्षकाराय नमः (लिङ्गे) २७. पकाराय नमः (दक्षिणबाहुमूले) २८. फकाराय नमः (दक्षकूर्परे) २९. बकाराय नमः (दक्षमणिबन्धे) ३०. भकाराय नमः (दक्षांगुलिमूले) ३१. मकाराय नमः (दक्षक्षहस्तांगुल्यग्रे) ३२. तकाराय नमः (वामबाहुमूले) ३३. थकाराय नमः (वामकूपरे) ३४. दकाराय नमः (वाममणिबन्धे) ३५. धकाराय नमः (वामहस्तांगुलिमूले) ३६. नकाराय नमः (वामहस्तांगुल्यग्रे) ३७. रकाराय नमः (दक्षिणपादमूले) ३८. ठकाराय नमः (दक्षिणजानुनि) ३९. डकाराय नमः (दक्षपादगुल्फे) ४०. ढकाराय नमः (दक्षिणपादांगुलिमूले) ४१. णकाराय नमः (दक्षिणपादांगुल्यग्रे) ४२. चकाराय नमः (वामपादांगुलिमूले) ४३. छकाराय नमः (वामजानुनि) ४४. जकाराय नमः (वामगुल्फे) ४५. झकाराय नमः (वामपादांगुलिमूले) ४६. मकाराय नमः (वामपादांगुल्यग्रे) ४७. ककाराय नमः (दक्षकरतले) ४८. खकाराय नमः (वामकरतले) ४९. गकाराय नमः (दक्षकरपृष्ठे) ५०. धकाराय नमः (वामकरपृष्ठे) ५१. टकाराय नमः (हस्तपासर्वांगुलिषु)।

**४. ग्रहनक्षत्रन्यासः** - १. रविचन्द्राभ्यां नमः (नेत्रयोः) २. भौमाय नमः (हृदये) ३. बुधाय नमः (स्कन्धयोः) ४. बृहस्पतये नमः (जिह्वायाम्) ५. शुक्राय नमः (लिङ्गे) ६. शनेश्चराय नमः (ललाटे) ७. राहवे नमः (पादयोः) ८. केतवे नमः (केशेषु) ९. रोहिणीभ्यो नमः (हृदये) १०. मृगशिरसे नमः (शिरसि) ११. आर्द्रायै नमः (केशेषु) १२. पुनर्वसुभ्यां नमः (ललाटे) १३. पुष्याय नमः (मुखे) १४. आश्लेषाभ्यो नमः (नासिकायाम्) १५. मघाभ्यो नमः (दन्तेषु) १६. पूर्वाफाल्गुनीभ्यो नमः (दक्षिणश्रोत्रे) १७. उत्तराफाल्गुनीभ्यो नमः (वामश्रोत्रे) १८. हस्ताय नमः (हस्तयोः) १९. चित्रायै नमः (दक्षिणभुजे) २०. स्वात्यै नमः (वामभुजे) २१. विशाखाभ्यां नमः (हृदये) २२. अनुराधाभ्यो नमः (स्तनयोः) २३. ज्येष्ठायै नमः (दक्षिणकुक्षौ) २४. मूलाय नमः (वामकुक्षौ) २५. पूर्वाषाढाभ्यो नमः (कटिपार्श्वयोः) २६. उत्तराषाढाभ्यो नमः (लिङ्गे) २७. श्रवणधनिष्ठाभ्यो नमः (वृषणयोः) २८. शतभिषाभ्यो नमः (नेत्रयोः) २९. पूर्वाभाद्रपदाभ्यो नमः (दक्षिणोरौ) ३०. उत्तराभाद्रपदाभ्यो नमः (वामोरौ) ३१. रेवतीभ्यो नमः (दक्षिणजङ्घायाम्) ३२. अश्विनीभ्याम् नमः (वामजङ्घायाम्) ३३. भरणीभ्यो नमः (दक्षिणपादे) ३४. कृत्तिकाभ्यो नमः (वामपादे) ३५. ध्रुवाय नमः (नाभौ) ३६. सप्तर्षिभ्यो नमः (कण्ठे) ३७. मातृमण्डलाय नमः (कट्योः) ३८. विष्णुपदेभ्यो नमः (पादयोः) ३९. नागवीच्यै नमः ४०. अङ्गवीथ्यै नमः (कण्ठदेशे) ४१. ताराभ्यो नमः (रोमकूपेषु) ४२. अगस्त्याय नमः (वक्षसि)।

**५. कालन्यासः** - १. चैत्राय नमः (शिरस) २. वैशाखाय नमः (मुखे) ३. ज्येष्ठाय नमः (हृदये) ४. आषाढाय नमः (दक्षिणस्तने) ५. श्रावणाय नमः (वामस्तने) ६. भाद्रपदाय नमः (उदरे) ७. आश्विनाय नमः (कट्योः) ८. कार्तिकाय नमः (दक्षिणोरौ) ९. मार्गशीर्षाय नमः (वामोरौ) १०. पौषाय नमः (दक्षिणजङ्घ्याम्) ११. मधाय नमः (वामजङ्घायाम्) १२. फाल्गुनाय नमः (पादयो) १३. संवत्सराय नमः (दक्षिणस्कन्धे) १४. परिवत्सराय नमः (दक्षिणकोष्ठे) १५. इद्वत्सराय नमः (वामप्रकोष्ठे) १६. अनुवत्सराय नमः (वामस्कन्धे) १७. पर्वभ्यो नमः (सन्धिषु) १८. ऋतुभ्यो नमः (लिङ्गे) १९. अहोरात्रेभ्यो नमः (अस्थिषु) २०. क्षणाय नमः २१. लवाय नमः २२. काष्ठायै नमः (रोमसु) २३. कृतयुगाय नमः (मुखे) २४. त्रेतायुगाय नमः (हृदये) २५. द्वापराय नमः (नितम्बे) २६. कलियुगाय नमः (पादयोः) २७. चतुर्दशमन्वन्तरेभ्यो नमः (बाह्वोः) २८. पराय नमः २९. परार्धाय नमः (जङ्घयोः) ३०. महाकल्पाय नमः (शरीरे) ३१. उदगनाय नमः ३२. दक्षिणायनाय नमः (पादयोः) ३३. विषुवद्भ्यो नमः (सर्वांगुलिषु)।

**६. वर्णन्यासः** - १. ब्राह्मणाय नमः (मुखे) २. क्षत्रियाय नमः (बाह्वोः) ३. वैश्याय नमः (उर्वोः) ४. शूद्रायय नमः (पादयोः) ५. सङ्करजेभ्यो नमः (पादाग्रे) ६. अनुलोमजेभ्यो नमः (सर्वांगुलिषु) ७. गोभ्यो नमः (मुखे) ८. अजाभ्यो नमः ९. आविकाभ्यो नमः (हस्तयोः) १०. ग्राम्यपशुभ्यो नमः ११. आरण्यपशुभ्यो नमः (ऊर्वो)।

**७. तोयन्यासः** - १. मेघेभ्यो नमः (केशेषु) २. अभ्रेभ्यो नमः (रोमसु) ३. नदीभ्यो नमः (सर्वगात्रेषु) ४. समुद्रेभ्यो नमः (कुक्ष्योः)

**८. विद्यान्यासः** - १. ऋग्वेदाय नमः (शिरसि) २. यजुर्वेदाय नमः (दक्षिणभुजे) ३. सामवेदाय नमः (वामभुजे) ४. सर्वोपनिषद्भ्यो नमः (हृदये) ५. इतिहासपुराणेभ्यो नमः (जङ्घयोः) ६. अथर्वाङ्गिरोभ्यो नमः (नाभौ) ७. कल्पसूत्रेभ्यो नमः (पादयोः) ८. व्याकरणेभ्यो नमः (मुखे) ९. तर्केभ्यो नमः (कण्ठे) १०. मीमांसायै नमः ११. निरुत्काय नमः (हृदये) १२. छन्दः (शास्त्रेभ्यो) नमः १३. ज्योतिःशास्त्रेभ्यो नमः (नेत्रयोः) १४. गीताशास्त्रेभ्यो नमः १५. भूतशास्त्रेभ्यो नमः (श्रोत्रयोः) १६. आयुर्वेदाय नमः (दक्षिणभुजे) १७. धनुर्वेदाय नमः (वामभुजे) १८. योगशास्त्रेभ्यो नमः (हृदये) १९. नीतिशात्रेभ्यो नमः (पादयोः) २०. वश्यतन्त्राय नमः (ओष्ठयोः)।

**९. विराजन्यासः** - १. दिवे नमः (मूर्ध्नि) २. सूर्यलोकाय नमः ३. चन्द्रलोकाय नमः (नेत्रयोः) ४. वायुलोकाय नमः (नासिकायाम्) ५. समुद्रेभ्यो नमः (गुदे) ६. पृथिव्यै नमः (पादयोः)।

**१०. मूर्तिदेवतान्यासः** - १. हिरण्यगर्भाय नमः (शिरसि) २. कृष्णाय नमः (केशेषु) ३. रुद्राय नमः (ललाटे) ४. यमाय नमः (भ्रुवोः) ५. अश्विभ्यां नमः (कर्णयोः) ६. वैश्वानराय नमः (मुखे) ७. मरुद्भ्यो नमः (घ्राणे) ८. वसुभ्यो नमः (कण्ठे) ९. रुद्रेभ्यो नमः (दन्तेषु) १०. आदितेभ्यो नमः (मुखे) ११. सरस्वत्ये नमः (जिह्वायाम्) १२. इन्द्राय नमः (दक्षिणभुजे) १३. बलये नमः (वामभुजे) १४. प्रह्लादाय नमः (दक्षिणस्तने) १५. विश्वकर्मणे नमः (वामस्तने) १६. नारदाय नमः (दक्षिणकुक्षौ) १७. अनन्तादिभ्यो नमः (वामकुक्षौ) १८. वरुणाय नमः (हस्तयोः) १९. मित्राय नमः (पादयोः) २०. विश्वेभ्यो देवेभ्यो नमः (ऊर्वोः) २१. पितृभ्यो नमः (जान्वोः) २२. यक्षेभ्यो नमः (जङ्घयोः) २३. राक्षसेभ्यो नमः (गुल्फयोः) २४. पिशाचेभ्यो नमः (पादयोः) २५. असुरेभ्यो नमः (पादांगुलिषु) २६. विद्याधरेभ्यो नमः (पार्ष्ण्योः) २७. ग्रहेभ्यो नमः (पादतलयोः) २८. गृह्यकेभ्यो नमः (गुह्ये) २९. पूतनादिभ्यो नमः (नखाग्रेषु) ३०. गन्धर्वेभ्यो नमः (ओष्ठयोः) ३१. कार्तिकेयाय नमः (दक्षिणपार्श्वे) ३२. गणेशाय नमः (वामपार्श्वे) ३३. मत्स्याय नमः (मूर्ध्नि) ३४. कूर्माय नमः (पादयोः) ३५. नृसिंहाय नमः (ललाटे) ३६. वराहाय नमः (जङ्घयोः) ३७. वामनाय नमः (मुखे) ३८. परशुरामाय नमः (हृदये) ३९. रामाय नमः (बाहुषु) ४०. कृष्णाय नमः (नाभ्याम्) ४१. बुद्धाय नमः (बुद्धौ) ४२. कल्कये नमः (जानुनोः) ४३. केशवाय नमः (शिरसि) ४४. नारायणाय नमः (मुखे) ४५. माधवाय नमः (ग्रीवायाम्) ४६. गोविन्दाय (बाह्वोः) ४७. विष्णवे नमः (हृदये) ४८. मधुसूदनाय नमः (पृष्ठे) ४९. त्रिविक्रमाय नमः (कट्योः) ५०. वामनाय नमः (जठरे) ५१. श्रीधराय नमः ५२. हृषीकेशाय नमः (जङ्घयोः) ५३. पद्मनाभाय नमः (गुल्फयोः) ५४. दामोदराय नमः (पादयोः)।

**११. क्रतुन्यासः** - १. अश्वमेधाय नमः (मूर्ध्नि) २. नरमेधाय नमः (ललाटे) ३. राजसूयाय नमः (मुखे) ४. गोसवाय नमः (कण्ठे) ५. द्वादशाहाय नमः (हृदि) ६. अहीनेभ्यो नमः (नाभौ) ७. सर्वजिद्भ्यो नमः (दक्षिणकट्याम्) ८. सर्वमेधाय नमः (वामकट्याम्) ९. अग्निष्टोमाय नमः (लिङ्गे) १०. अतिरात्राय नमः (वृषणयोः) ११. आप्तोर्यामाय नमः (ऊर्वोः) १२. षोडशिने नमः (जान्वोः) १३. उक्थ्याम नमः (दक्षिणजङ्घायाम्) १४. वाजपेयाय नमः (वामजङ्घायाम्) १५. अत्यग्निष्टोमाय नमः (दक्षिणबाहौ) १६. चातुर्मासाय नमः (वामबाहौ) १७. सोत्रामणये नमः (हस्तेषु) १८. पश्विष्टिभ्यो नमः (अंगुलिषु) १९. दर्शपूर्णामासाभ्यां नमः (नेत्रयोः) २०. सर्वेष्टिभ्यो नमः (रोमकूपेषु) २१. स्वाहाकाराय नमः २२. वषट्काराय नमः (स्नतनयो) २३. पञ्चमहाज्ञेभ्यो नमः (पादांगुलिषु) २४. आहवनीयाय नमः (मुखे) २५. दक्षिणाग्नेय नमः (हृदये) २६. गार्हपत्याय नमः (नाभौ) २७. वैद्ये नमः (उदरे) २८. प्रवर्ग्याय नमः (वृषणेषु) २९. सवनेभ्यो नमः (पादयोः) ३०. इध्मभ्यो नमः (बाहुषु) ३१. दर्भेभ्यो नमः (केशेषु)॥

**१२. गुणन्यासः** - १. धर्माय नमः (मूर्ध्नि) २. ज्ञानाय नमः (हृदि) ३. वैराग्याय नमः (गुह्ये) ४. ऐश्वर्याय नमः (पादयो)।

**१३. आयुधन्यासः (वैष्णवे)** - १. खड्गाय नमः (शिरसि) २. शार्ङ्गाय नमः (मस्तके) ३. मुसलाय नमः (दक्षिणभुजे) ४. हलाय नमः (वामभुजे) ५. चक्राय नमः (नाभिजठरपृष्ठेषु) ६. शङ्खाय नमः (लिङ्गवृषणयोः) ७. गदायै नमः (जङ्घयोर्जानुनोश्च) ८. पद्माय नमः गुल्फयोः (पादयोश्च)।

**(शैवे)**

१. वज्राय नमः (शिरसि) २. शक्तये नमः (मस्तके) ३. दण्डाय नमः (दक्षिणभुजे) ४. खड्गाय नमः (वामभुजे) ५. पाशाय नाभिजठरपृष्ठेषु ६. अंकुशाय नमः (लिङ्गवृषणयोः) ७. गदायै नमः (जान्वोः) ८. त्रिशूलाय नमः (जङ्घयोः) ९. चक्राय नमः (गुल्फयोः) १०. पद्माय नमः (पादयोः) (तत्तद्देवतासु विशिष्टानि आयुधानि विन्यसेत्)।

**१४. शक्तिन्यासः** - १. लक्ष्म्यै नमः (ललाटे) २. सरस्वत्यै नमः (मुखे) ३. रत्यै नमः (गुह्ये) ४. प्रीत्यै नमः (कण्ठे) ५. कीर्त्यै नमः (दिक्षु) ६. शान्त्यै नमः (हृदि) ७. तुष्ट्यै नमः (जठरे) ८. पुष्ट्यै नमः (सर्वाङ्गेषु)।

**१५. मन्त्रन्यासः**

१. ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्॥ ऋग्वेदं (पादयोः)

२. ॐ इषेत्वोर्ज्जेत्त्वा व्वायवस्थ देवो वः सविता प्रार्प्पयतु श्रेष्ट्ठतमाय कर्म्मणऽ आप्यायध्वमग्न्याऽइन्द्राय भाग प्रजावतीरनमीवाऽअयक्ष्मामा वस्ते नऽईशत माघश ꣳ सोध्रुवाऽअस्मिन् गोपतौ स्यातवह्वीर्यजमानस्य पशून्पाहि। (गुल्फयोः)

३. अग्न आ याहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि। (जङ्घयोः)।

४. शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभिस्रवन्तु नः। (जानुनोः)।

५. एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे सप्त च मे सप्त च मे नव च मे नव च म एकादश च म एकादश च मे त्रयोदश च मे त्रयोदश च मे पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च म एकवि ꣳ शतिश्च म एकवि ꣳशतिश्च मे त्रयोवि ꣳशतिश्च मे त्रयोवि ꣳशतिश्च मे पञ्चवि ꣳशतिश्च मे पञ्चवि ꣳशतिश्च मे सप्तवि ꣳशतिश्च मे सप्तवि ꣳशतिश्च मे नववि ꣳशतिश्च मे नववि ꣳशतिश्च म एकत्रि ꣳशच्च म एकत्रि ꣳच्च मे त्रयस्त्रि ꣳशच्च मे यज्ञेन कल्पन्ताम्। (ऊर्वोः)

६. स्वस्ति नो वृद्धश्रवाः स्वस्नि नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्योऽ अरिष्टनेमिः स्वति नो बृहस्पतिर्दधातु (जठरे)।

७. दीर्घायुस्तऽओषधे खनिता यस्मै च त्वा खनाम्यहम्।
अथो त्वं दीर्घायुर्भूत्त्वा शतवल्शा विरोहतात्॥ (हृदये)

८. विश्वतश्चक्षुरुतव्वश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्।
सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन्देव एकः। (कण्ठे)

९. त्रातारमिन्द्रमवितारमिन्द्र ꣳ हवे हवे सुहव ꣳ शूरमन्द्रम्।
ह्वयामि शक्रं पुरुहूतमिन्द्रꣳस्वस्ति नो मघवा धात्विन्द्रः॥ (वक्त्रे)

१०. त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धन्म्। उर्व्वारुकमिवबन्धनान्मृत्योर्मुक्षीय मामृतात्॥ (स्तनयोर्नेत्रयोश्च)

११. मूर्धानन्दिवोऽअरतिम्पृथिव्या व्वैश्वानरमृतऽआजातमग्निम्। कवि ꣳसम्म्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः॥ (मूर्ध्नि)

**( विष्णोर्मन्त्रन्यासः )**

१. ॐ हृदयाय नमः (हृदये) २. शिरसे स्वाहा नमः (शिरसि) ३. शिखयै वषट् नमः (शिखायाम्) ४. कवचाय हुम् नमः (कवचे) ५. नेत्रत्रयाय वौषट् नमः (नेत्रत्रये) ६. अस्त्राय फट् नमः (करयोः) ७. ॐ नमः (हृदये) ८. नं नमः (शिरसि) ९. मों नमः (मुखे) १०. भगवते नमः (शिखायाम्) ११. वासुदेवाय नमः (कवचे) १२. ॐ नमो भगवते वासुदेवाय नमः (अस्त्रे) १३. श्रीवत्साय नमः (दक्षिणवामस्तनयोः) १४. कौस्तुभाय नमः (उरसि) १५. वनमालायै नमः (कण्ठे) १६. ॐ नमः (पादयोः) १७. नं नमः (जानुनोः) १८. मों नमः १९. भं नमः (नाभौ) २०. गं नमः (हृदये) २१. वं नमः (कण्ठे) २२. तें नमः (नासिकयोः) २३. वां नमः (नेत्रयो) २४. सुं नमः (भाले) २५. दें नमः (मूर्ध्नि) २६. वां नमः (दक्षिणपार्श्वे) २७. यं नमः (वामपार्श्वे)।

एवं रामे षडङ्गानि विनस्य – ॐ नमो भगवते रामभद्राय – इति प्रत्यक्षरं न्यासः।

शिवस्य षडङ्गानि विनस्य – ॐ नमो भगवते रुद्राय – इति दशाक्षरन्यासः।

देव्याः षडङ्गानि विनस्य – ॐ एं ह्रीं क्लीं चामुण्डायै विच्चे – इति नवार्णन्यासः।

**लक्ष्म्याः** - १. श्रीं ह्रीं क्लीं महालक्ष्मै नमः २. श्री ह्रीं एं लक्ष्मीः कमलधारिणी हंसः स्वाहा, ॐ अम्बेऽअम्बिकेम्बालिके नमानयति कश्चन। ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्॥ ३. एं चामुण्डायै विद्महे वरप्रदायै धीमहि। तन्नो लक्ष्मीः प्रचोदयात्। श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनो व्यात्तम्। इष्णन्निषाणामुम्मऽ इषाण सर्वलोकम्मऽ इषाण।

**गणेशस्य** - ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा २. ॐ गं गणपतये नमः ३. ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्ती प्रचोदयात्॥ ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳहवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्भधमात्त्वमजासि गर्भधम्॥

**भैरवस्य** - ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं ॐ। ॐ नमऽउग्राय च भामाय च.....

**सरस्वत्याः** - वद वद वाग्वादिनी स्वाहा। ॐ पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धया वसुः॥

**बालायाः** - एं क्लीं सौः वद वद वग्वादिनी स्वाहा।

**दत्तात्रेयस्य** - ॐ द्रां दत्तात्रेयाय नमः। (अन्यदेवतानां मन्त्राः तत्तद्ग्रन्थेभ्यः समूह्याः)

**नारायणमूर्तौ द्वादशाक्षरमन्त्रन्यासः** -

१. ॐ केशवाय नमः (शिरसि) २. ॐ नं नारायणाय नमः (मुखे) ३. मों माधवाय नमः (ग्रीवायाम्) ४. भं गोविन्दाय नमः (कण्ठे) ५. गं विष्णवे नमः (पृष्ठे) ६. वं मधुसूदनाय नमः (कुक्षौ) ७. तें त्रिविक्रमाय नमः (कटौ) ८. वां वामनाय नमः (जङ्घयोः) ९. सुं श्रीधराय नमः (वामगुल्फे) १०. दें हृषीकेशाय नमः (दक्षिणगुल्फे) ११. वां पद्मनाभाय नमः (वामपादे) १२. यं दामोदराय नमः (दक्षिणपादे)।

**अष्टाङ्गमन्त्रन्यासः** -

१. हुं रुद्राय नमः (हृदये) २. विष्णवे नमः (शिरसि) ३. ब्रह्मणे नमः (शिखायाम्) ४. ध्रुवाय नमः (कवचे) ५. चक्रिणे नमः (नेत्रत्रये) ६. अस्त्राय नमः (अस्त्रे) ७. नमः (शम्भवाय नमः) गायत्र्यै नमः (दक्षिणनेत्रे) ८. विजयाय नमः सावित्र्यै नमः (वामनेत्रे) ९. चक्राय नमः शूलाय नमः पिंगलास्त्राय नमः (दिक्षुः)।

**पुरुषसूक्तन्यासः सर्वधारणः विष्णोश्च** -

१. सहस्रशीर्षा पुरुषः ० (पादयोः) २. पुरुषऽएवेदम् ० (जङ्घयोः) ३. एतावानस्य ० (जान्वो) ४. त्रपादूर्ध्व ० (ऊर्वोः) ५. ततो व्विराट् ० (वृषणयोः) ६. तस्माद्यज्ञात् ० (कट्योः) ७. तस्माद्यज्ञात्सर्वहुतऽऋचः ० (नाभौ) ८. तस्मादश्वा ० (हृदये) ९. तं यज्ञं ० (स्तनयोः) १०. यत्पुरुषं ० (बाह्वोः) ११. ब्राह्मणोऽस्य ० (मुखे) १२. चन्द्रमा मनसः ० (चक्षुषोः) १३. नाभ्या ० (कर्णयोः) १४. यत्पुरुषेण ० (भ्रुवोः) १५. सप्तास्या ० (भाले) १६. यज्ञेन यज्ञम् ० (शिरसि)।

**सूर्यस्य गायत्रीन्यासः** -

१. तकराय नमः (पादांगुष्ठयोः) २. त्सकाराय नमः (गुल्फयोः) ३. विकराय नमः (जङ्घयोः) ४. तुर्कराय नमः (जानुनोः) ५. वकराय नमः (ऊर्वोः) ६. रेकाराय नमः (गुह्ये) ७. ण्काराय नमः (वृषणयोः) ८. य काराय नमः (कट्योः) ९. भर्काराय नमः (नाभौ) १०. गोकाराय नमः (जठरे) ११. देकाराय नमः (स्तनयोः) १२. वकाराय नमः (हृदये) १३. स्यकाराय नमः (कण्ठे) १४. धीकाराय नमः (वदने) १५. मकराय नमः (तालुनि) १६. हिकाराय नमः (नासाग्रे) १७. धिकाराय नमः (चक्षुषोः) १८. योकाराय नमः (भ्रूमध्ये) १९. योकाराय नमः (ललाटे) २०. नःकाराय नमः (पूर्वशरसि) २१. प्रकाराय नमः (दक्षिणशिरसि) २२. चोकाराय नमः (पश्चिमशिरसि) २३. दकाराय नमः (उत्तरशिरसि) २४. यात्काराय नमः (सर्वत्र) २५. तत्सवितुर् - (हृदये) २६. वेरण्यम् (शिरसि) २७. भर्गो देवस्य० (शिखायाम्) २८. धीमहि कवचे २९. धियो यो नः (नेत्रत्रये) ३०. प्रचोदयात् अस्त्रे।

**देवीमूर्तौ निवृत्तादिकलान्यासः**

१. अं निवृत्यै नमः २. आं प्रतिष्ठायै नमः ३. इं विद्यायै नमः ४. ईम् शान्त्यै नमः ५. उं धुन्धिकायै नमः ६. ऊं दीपिकायै नमः ७. ऋं रेचिकायै नमः ८. ॠं मोचिकायै नमः ९. लृं परायै नमः १०. लॄं सूक्ष्मायै नमः ११. एं सूक्ष्मामृतायै नमः १२. ऐं ज्ञानामृतायै नमः १३. ओं सावित्र्यै नमः १४. औं व्यापिन्यै नमः १५. अं सुरूपायै नमः १६. अः अनन्तायै नमः १७. कं सृष्ट्यै नमः १८. खं ऋध्यै नमः १९. गं स्मृत्यै नमः २०. घं मेधायै नमः २१. ङं कान्त्यै नमः २२. चं लक्ष्म्यै नमः २३. छं धृत्यै नमः २४. जं स्थिरायै नमः २५. झं स्थित्यै नमः २६. ञं सिद्ध्यै नमः २७. टं जरायै नमः २८. ठं पालिन्यै नमः २९. डं शान्त्यै नमः ३०. ढं ऐश्वर्यै नमः ३१. णं रत्यै नमः ३२. तं कामिन्यै नमः ३३. थं रदायै नमः ३४. डं ह्लादिन्यै नमः ३५. धं प्रीत्यै नमः ३६. नं दीर्घायै नमः ३७. पं तीक्ष्णायै नमः ३८. फं सुप्त्यै नमः ३९. बं अभयायै नमः ४०. भं निद्रायै नमः ४१. मं मात्रे नमः ४२. यं शुद्धायै नमः ४३. रं क्रोधिन्यै नमः ४४. लं कृपायै नमः ४५. वं उत्कायै नमः ४६. शं मृत्यवे नमः ४७. षं पीतायै नमः ४८. सं श्वेतायै नमः ४९. हं अरुणायै नमः ५०. लं असितायै नमः ५१. क्षं सर्वसिद्धगौर्यै नमः।

**शैवे सद्योजातादिपञ्चब्रह्मकालादिन्यास**

१. ईशानाय नमः (अंगुष्ठयो) २. तत्पुरुषाय नमः (तर्जन्योः) ३. अधोरेभ्यः नमः (मध्यमयोः) ४. वामदेवाय नमः (अनामिकयोः) ५. सद्योजाताय नमः (कनिष्ठयोः) ६. सद्योजाताय नमः (हृदयाय नमः) ७. वामदेवाय नमः (शिरसे स्वाहा) ८. अघोरेभ्यः नमः (शिखायै वषट्) ९. तत्पुरुषाय नमः (कवचाय हुम्) १०. ईशानाय नमः (अस्त्राय फट्) ११. हृदयाय नमः १२. शिरसे स्वाहा १३. शिखायै वषट् १४. कवचाय हुम् १५. अस्त्राय फट् १६. कवचेन अवगुण्ठ्येत १७. ईशानः सर्वविद्यानाम् ० लिङ्गमुद्रया मूर्धनि १८. तत्पुरुषाय विद्महे महादेवा. धीमहि। तन्नो रुद्रः (प्रचोदयात्)। तर्जन्यंगुष्ठयोगेन। १९. अघोरेभ्योऽथ ० मध्यमांगुल्यंगुष्ठयोगेन। २०. वामदेवाय नमः (अनामिकांगुष्ठयोगेन)। २१. सद्योजातं प्रपद्यामि.... कनिष्ठिकांगुष्ठयोगेन।

**कलान्यासः -**

१. ईशान्यै नमः २. अभयदायै नमः ३. इष्टदायै नमः ४. मरीच्यै नमः ५. ज्वालिन्यै नमः ६. शान्त्यै नमः ७. विद्यायै नमः ८. प्रतिष्ठायै नमः ९. धृत्यै नमः १०. तमसे नमः ११. जरायै नमः १२. सत्वायै नमः १३. निद्रायै नमः १४. व्याध्यै नमः १५. मृत्यवे नमः १६. क्षुधायै नमः १७. तृषायै नमः १८. रजसे नमः १९. रक्षायै नमः २०. रत्यै नमः २१. पालिन्यै नमः २२. कामायै नमः २३. संजीवन्यै नमः २४. धात्र्यै नमः २५. वद्ध्यै नमः २६. छायायै नमः २७. क्रियायै नमः २८. भ्रामण्यै नमः २९. शोषिण्यै नमः ३०. ज्वरायै नमः ३१. सिद्ध्यै नमः ३२. रुद्ध्यै नमः ३३. दित्ये नमः ३४. लक्ष्म्यै नमः ३५. मेधायै नमः ३६. स्वधायै नमः ३७. प्रभायै नमः।

इत्थं शिवप्रतिष्ठायां विशिष्टाः न्यासाः कार्याः।

**१६. षोडशजीवन्यासः सर्वदेवसाधारण -**

अयं जीवन्यासो देवस्थापनान्तरं कार्य इत्येकं मतम्। जीवन्यासस्य योगक्रियासाध्यात्वात् अन्येषां तदसम्भवात् प्राणप्रतिष्ठयैव निर्वाह इति द्वितीयं मतम्। वस्तुतस्तु जीवन्यासे शरीरप्राणगततत्त्वानां विन्यासात् प्राणप्रतिष्ठापदं लोके शास्त्रे च प्रतिष्ठात्वेन जीवन्यासस्य षोडशन्यासान्तर्गत्वेन सर्वसाधारणत्वात् जीवन्यासं कुर्यादित समीचीनं भवति।

१. ॐ प्रणवात्मने नमः २. मं जीवात्मने नमः ३. भं प्राणात्मने नमः ४. बुं बुद्ध्यात्मने नमः ५. फं अहंकारात्मने नमः ६. पं मन आत्मने नमः ७. नं शब्दतन्मात्रात्मने नमः ८. धं स्पर्शतन्मात्रात्मने नमः ९. दं रूपतन्मात्रात्मने नमः १०. थं रसतन्मात्रात्मने नमः ११. तं गन्धतन्मात्रात्मने नमः १२. णं श्रोत्रात्मने नमः १३. ढं त्वगात्मने नमः १४. डं चक्षुरात्मने नमः १५. ठं जिह्वात्मने नमः १६. टं घ्राणात्मने नमः १७. ञं वागात्मने नमः १८. झं वाण्यात्मने नमः १९. जं पदात्मने नमः २०. छं पाय्वात्मने नमः २१. चं उपस्थात्मने नमः २२. ङंपृथिव्यात्मने नमः २३. घं अबात्मने

नमः २४. गं तेजआत्मने नमः २५. खं प्राणात्मने नमः २६. कं आकाशात्मने नमः २७. षं सूर्यात्मने नमः २८. सं सोमात्मने नमः २९. ळं वह्न्यात्मने नमः

(ततः अर्वाबीज स्वामिमतं मूर्तौ संयोजयेत्। अथ वा तद्देवताया वैदिकमन्त्रम् आद्यक्षरं सानुस्वारं चतुर्थ्यन्तं नमः सहितं पठेत्।)

३०. सर्वात्मने नमः ३१. अनुग्रहात्मने नमः ३२. सर्वभऊतात्मने नमः ३३. सर्वसंहरात्मने नमः ३४. कोपात्मने नमः ३५. आत्मतत्त्वाय नमः ३६. आत्मतत्त्वाधिपतये (ब्रह्मणे नमः) ३७. विद्यातत्त्वाय नमः ३८. विद्यातत्त्वाधिपतये (विष्णवे नमः) ३९. शिवतत्त्वाय नमः ४०. शिवतत्त्वाधिपतये रुद्राय नमः, इति जीवन्यासाः।

## निद्रावाहनम्

देवशिरोदेशे निहिते निद्राकलशे निद्रामवाहयेत्।

ॐ परमेष्ठिनं नमस्कृत्य निद्रामावाहयाम्यहम्। मोहिनीं सर्वभूतानां मनोविभ्रमकारिणीम् ॥ १॥

विरूपाक्षे शिवे शान्ते आगच्छ त्वं तु मोहिनि। वासुदेवंहिते कृष्णे कृष्णाम्बरविभूषिते ॥ २॥

आगच्छ सहसाऽजस्रं सुप्तसंसारमोहिनि। सुषुप्तं संहरेर्देवि कुमार्येकान्तमानसे ॥ ३॥

श्रमविश्वासवाह्यम्बु आगच्छ भुवनेश्वरि। तमः सत्त्वरजोयुक्ते आगच्छ वरदायिनि ॥४॥

मनो बुद्धिमहंकारं संहरेस्त्वं सरस्वति। शब्दं स्पर्शं च रुपं च रसं गन्धं च पञ्चमम् ॥ ५॥

आगच्छ गृह्ण संक्षिप्य मोहपाशनिबन्धनि। भवस्योत्पत्तिहेतुस्त्वं यावदाभूतसम्प्लवम् ॥ ६॥

भुवः कल्पान्तसन्ध्यायां वससि त्वं चराचरे। भोगिशय्याप्रसुप्तस्य वासुदेवस्य शासने ॥ ७॥

त्वं प्रतिष्ठाऽसि वै देवि मुनियोगिसमुत्थिते। पितृदेवमनुष्याणां सयक्षोरगरक्षसाम् ॥ ८॥

पशुपक्षिमृगाणां च योगमायाविवर्धनि। वससि सर्वसत्वेषु मातेव हितकारिणि ॥ ९॥

एहि सावित्रिमूर्तिस्त्वं चक्षुर्भ्यां स्थानगोचरे। विश नासापुटे देवि कण्ठे चोत्काण्ठिता विश ॥ १०॥

प्रतिभावय मां सर्वं मातृवद्देवि सुन्दरि। इदमर्घं मया दत्तं पूजेयं प्रतिगृह्यताम् ॥ ११॥

ॐ भूभुर्वः स्वः सपरिवारायै निद्रायै नमः निद्रामावाहयामि स्थापयामि। ॐ सपरिवारायै निद्रायै नमः इति पञ्चोपचारैः सम्पूज्य। पुरतो बलिद्रव्यं निधाय बलिद्रव्याय नमः इंचि सम्पूज्य हस्ते जलमादाय -

१. ॐ प्राच्यै दिशे ॰ इन्द्रादिभ्यो नमः बलिं समर्पयामि।

२. ॐ समख्ये देव्या ॰ मातृभ्यो नमः बलिं समर्पयामि।

३. ॐ न हि स्पश ॰ क्षेत्रपालाय नमः बलिं समर्पयामि।

आचम्य ''मण्डलशय्ययोरन्तरे न गन्तव्यम्। सुखशायी भव।'' इति प्रैषद्वयं दत्त्वा - जलमादाय - आसु प्रतिमासु सूर्याचन्द्रमसौ यावत् दिव्य-देवकलातेजोऽभिवृद्धिपूर्वकं देवतासान्निध्यहेतवे कृतेन अनेन शय्याधान्य (फलपुष्पौषधि) अधिवासनपूर्वकं तत्त्वन्यासकर्मणा सपरिवारः स्थाप्यदेवः प्रीयताम्। (स्थाप्यदेवस्य स्थाने यस्य प्रतिष्ठा स्थात् तदभिधानं कर्तव्यम्)

सप्त-पञ्च-त्रि-एकरात्र-याममात्र-गोदोहनकालान्यतमपेक्षणयथासमयमधिवासनम्।

एकरात्राधिकादिनाधिवासपक्षस्वीकारे प्रतिदिनं स्थापितदेवतापूजनपूर्वकं प्रत्यहं शान्तिकपौष्टिहोम-मूर्तिमूर्तिपति-लोकपालहोम-स्थाप्यदेवताहोम-विभिन्नकुण्डहोम-व्याहृतिहोम-तत्त्वन्यासहोम-तत्त्वन्यासाश्च कार्याः।

इति अधिवासाः तत्त्वन्यासाश्च।

## शब्दार्थाः

**प्राकारः** - भवनम्, दुर्गः **व्याहृति** - भूर्भुवः स्वः, **मातृकाः** - वर्णमाला (तत्त्वानि), **अस्त्रम्** - मुखसम्मुखतः प्रदक्षिणमार्गेण शिरसः उपरि हस्तभ्रमिः, **न्यासः** - प्रतिठापनम्, **सुखशायी** - निश्चिन्ततया शयनकर्ता।

## स्वाध्यायः

**१. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) शिरः प्रदेशे ......... निद्राकलशं स्थापनीयम्। (सजलं, सदुग्धं, सतैलम्)

(२) अधिवासने तत्त्वन्यासान्तरं ......... देव्या आवाहनं भवति। (निद्रा, सन्ध्या, पूर्णिमा)

(३) दैवीमूर्तौ ......... कलान्यासः। (निवृत्तादि, प्रवृत्तादि, विवृत्तादि)

(४) द्वादशाक्षरमन्त्रन्यासः ......... मूर्तौ भवति। (नारायणः, शिवः, ब्रह्मा)

(५) निद्राकलशे ......... आवाहयेत्। (निद्रां, सूर्यम्, चन्द्रम्)

**२. श्लोकान् पूरयन्तु।**

(१) प्रतिभावय मां.....

(२) विरूपाक्षे.....

(३) आगच्छ गृहाण.....

(४) भुवः कल्पान्त.....

**३. वाक्येन उत्तरं यच्छन्तु।**

(१) गणेशगायत्रीं लिखत।

(२) देव्याः नवार्णमन्त्रं लिखत।

(३) भैरवगायत्रीं लिखत।

(४) व्याहृतिमन्त्रं लिखत।

(५) आहुतिसंख्यां (प्रतिष्ठावासुदेव्यनुसारं) लिखत।

**४. अधस्तनप्रश्नानामुत्तराणि लिखत।**

(१) तत्त्वन्यासानां नामानि लिखत।

(२) एकदिनसाध्यायां प्रतिष्ठायां तत्त्वन्यासानां कः क्रमः ?

(३) शय्यासमीपे के पदार्थाः स्थापनीयाः ?

(४) तत्त्वन्यासाः सामान्येन कति प्रकारकाः ?

(५) देवतानामधिवाससमये के होमाः कर्तव्या ?

(६) जीवनसस्य विषये किमवधेयम ?

(७) अधिवासप्रकाराः कति ? के च ते ?

**५. अधस्तनविधीनां वर्मनं कुरुत।**

(१) शय्यारचनाविधिः

(२) तत्त्वन्यासविधिः

(३) निद्रावाहनम्

**६. योग्यं मेलनं कुरुत।**

| **'क'** | **'ख'** |
|---|---|
| (१) गणेशस्य | (१) ॐ नमो भगवते रुद्राय। |
| (२) देव्याः | (२) ॐ वद वद वाग्वादिनी स्वाहा। |
| (३) लक्ष्म्याः | (३) ॐ श्रीं ह्रीं क्लीं महालक्ष्म्यै नमः। |
| (४) सरस्वत्याः | (४) ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरदसर्वजनं मे वशमानय स्वाहा। |
| (५) शिवस्य | (५) ॐ एं ह्रीं क्लीं चामुण्डायै वच्चे। |

**छात्रप्रवृत्तिः**

- छात्राः शय्याविरचनम् अवगच्छेयुः।
- छात्राः तत्त्वन्यासप्रकारान् महत्त्वं च अन्विशन्तु।

**अध्यापकप्रवृत्तिः**

- अध्यापकः छात्रान् शय्यारचनविधिं बोधयेत्।
- अध्यापकः छात्रान् विविधाधिवासानां विषये ज्ञापयेते।
- अध्यापकः छात्रान् अधिवासनसमये कर्तव्यानां होमानां विषये कथयेत्।

●

# १० मूर्तिमूर्तिपति लोकपालावाहनम्

**प्रस्तावना**

प्रतिष्ठाकर्मणि स्नपनविधिः आगच्छति। तां स्नपनविधिं सम्पाद्य मण्डपे शय्यायां स्थापनानन्तरं होमारम्भात् प्राक् कुण्डात् इशाने जलपूर्णकलशद्वयं स्थापयेत्। तत्र एकं शान्तिकलशम् अपरेऽस्मिन् पूगीफलं निधाय तत्र चतुर्विंशतीनां मूर्तिमूर्तिपतिलोकपालान् आवाहयेत्।

---

पञ्चकुण्ड्यां तु आचार्यकुण्डं विहाय पूर्व-दक्षिण-पश्चिमोत्तरकुण्डानां ऐशान्यां कलशद्वयं निधाय प्रत्येकस्मिन् कलशे क्रमेण मूर्तिद्वयं मूर्तिपतिद्वयं लोकपालद्वयं च आवाहयेत्।

नवकुण्ड्यां पुनराचार्यकुण्डं परित्यज्य पूर्वाद्यष्टकुण्डानाम् ऐशान्यां कलशद्वयम्। तत एकस्मिन् क्रमेण मूर्तिमूर्तिपति-लोकपालान् च आवाहयेत्। पञ्चकुण्डनवकुण्डपक्षयोस्तु आचार्यकुण्डस्य ऐशान्यां कलशद्वयस्थापनस्य आवश्यकत्वं स्वतः सिद्धम्।

एककुण्डपक्षे पुनः मूर्तिमूर्तिपतिलोकपालानाम् आवाहनम् ऐशान्यां कार्यमेव। तत्र -

१. पृथ्वी २. अग्निः ३. यजमानः ४. अर्क ५. जलम् ६. वायुः ७. सोमः ८. आकाशः इमाः अष्टौ मूर्तयः विश्वस्य प्रकृतिभूताः सन्ति।

पृथिव्यादि-पञ्चमहाभूतानि सूर्याचन्द्रमसौ आत्मवाचकश्च यजमानः एतेषां प्रकृतिमूलतत्त्वरूपेण न कोऽपि विवादः।

१. शर्वः २. पशुपतिः ३. उग्रः ४. रुद्रः ५. ईशानः ६. भवः ७. महादेवः ८. भीमः - इमे एकादश मूर्तिपतयः सन्ति।

शर्वाद्यधिपतीन् दृष्ट्वा केचित् सम्प्रदायग्रहिणः बिभ्यति। प्रकृत्यधिष्ठितपरमात्मनः एकत्वात्, तस्य च गुणत्रयभेदेन ब्रह्म-विष्णु-शिवरूपकल्पनाच्च सम्प्रदायानुग्रहस्य अवकाश एव नास्ति।

**शर्वः** कल्याणकारी, **पशुपतिः** जीवमात्राधिपतिः, **उग्रः** दण्डकृत्, **रुद्रः** दुःखहारी, **भवः** उत्पादकः, **ईशानः** सर्वशक्तिमान् **महादेवः** परब्रह्म, **भीमः** प्रलयकारी इति एतेषां नामार्थाः।

परमात्मकार्यवाचशब्दानां यौगिकार्थमादाय पद्धतिकृद्भिः प्रायः सर्वत्र शर्वादयः एवं मूर्तिपतयः स्वीकृताः सन्ति। अत्र शर्वशिवयोः एकार्थत्वात् वकल्पः - (मन्त्रः होमप्रकरणे द्रष्टव्याः)

कुण्डस्य ऐशान्यां सजलं शान्तिकलशं निधाय तदुत्तरे सजले सपूर्णपात्रपूगीफले कलशे मूर्तिमूर्तिपतिलोकपालान् आवाहयेत्।

१. ॐ पृथिवीमूर्तये नमः पृथिवीमूर्तिम् आवाहयामि स्थापयामि।

२. ॐ पृथिवीमूर्त्यधिपतये शर्वाय नमः शर्वम् आवाहयाम स्थापयामि।

३. ॐ इन्द्राय नमः इन्द्रम् आवाहयामि स्थापयामि।

४. ॐ अग्निमूर्तये नमः अग्निमूर्तिम् आवाहयामि स्थापयामि।

५. ॐ अग्निमूर्त्यधिपतये पशुपतये नमः पशुपतिम् आवाहयामि स्थापयामि।

६. ॐ अग्नेय नमः अग्निम् आवाहयामि स्थापयामि।

७. ॐ यजमानमूर्तये नमः यजमानमूर्तिम् आवाहयामि स्थापयामि।

८. ॐ यजमानमूर्त्यधिपतये उग्राय नमः उग्रम् आवाहयामि स्थापयामि।

९. ॐ यमाय नमः यमम् आवाहयामि स्थापयामि।

१०. ॐ सूर्यमूर्तये नमः सूर्यमूर्तिम् आवाहयामि स्थापयामि।

११. ॐ सूर्यमूर्त्यधिपतये रुद्राय नमः रुद्रम् आवाहयामि स्थापयामि।

१२. ॐ निर्ऋतये नमः निर्ऋतिम् आवाहयामि स्थापयामि।

१३. ॐ जलमूर्तये नमः जलमूर्तिम् आवाहयामि स्थापयामि।

१४. ॐ जलमूर्त्यधिपतये भवाय नमः भवम् आवाहयामि स्थापयामि।

१५. ॐ वरुणाय नमः वरुणम् आवाहयामि स्थापयामि।

१६. ॐ वायुमूर्तये नमः वायुमूर्तिम् आवाहयामि स्थापयामि।

१७. ॐ वायुमूर्त्यधिपतये ईशानाय नमः ईशानम् आवाहयामि स्थापयामि।

१८. ॐ वायवे नमः वायुम् आवाहयामि स्थापयामि।

१९. ॐ सोममूर्तये नमः सोममूर्तिम् आवाहयामि स्थापयामि।

२०. ॐ सोममूर्त्यधिपतये महादेवाय नमः महादेवम् आवाहयामि स्थापयामि।

२१. ॐ सोमाय नमः सोमम् आवाहयामि स्थापयामि।

२२. ॐ आकाशमूर्तये नमः आकाशमूर्तिम् आवाहयामि स्थापयामि।

२३. ॐ आकाशमूर्त्यधिपतये भीमाय नमः भीमम् आवाहयामि स्थापयामि।

२४. ॐ ईशानाय नमः ईशानम् आवाहयामि स्थापयामि।

**ॐ मनोजूति...** इति मन्त्रेण ॐ भऊर्भुवः स्व मूर्तिमूर्तिपतिलोकपालाः सुप्रतिष्ठिताः वरदाः भवत।

ॐ मूर्तिमूर्त्यधिपतिलोकपालेभ्यो नमः इति पञ्चोपचारैः पूजनम्।

संकल्पः - अनेन पूजनेन मूर्तिमूर्तिपतिलोकपालाः प्रीयन्ताम्।

### गणेशप्रतिमायाम्

१. सुमुखः २. एकदन्तः ३. कपिलः ४. गजकर्णः ५. लम्बोदरः ६. विकटः ७. विघ्ननाशः ८. गणाधिपः - एताः अष्टमूर्तयः उक्ताः।

### विष्णुप्रतिमायाम्

१. विष्णुः २. मधूसूदनः ३. त्रिविक्रमः ४. वामनः ५. श्रीधरः ६. ऋषिकेशः ७. पद्मनाभः ८. दामोदरः - एताः अष्टमूर्तयः उक्ताः।

### सूर्यप्रतिमायाम्

१. विकर्तनः २. विवस्वान् ३. मार्तण्डः ४. भास्करः ५. रविः ६. लोकप्रकाशकः ७. श्रीमत् ८. लोकचक्षुः - एताः अष्टमूर्तयः उक्ताः।

### देवीप्रतिमायाम्

१. आर्या २. दक्षायणी ३. गिरिजा ४. मनोकात्मजा ५. शर्वाणी ६. भवानी ७. मृडानी ८. अम्बिका - एताः अष्टमूर्तयः उक्ताः।

### शिवप्रतिमायाम्

१. शर्वः २. रुद्रः ३. पशुपतिः ४. भीमः ५. ईशान ६. भवः ७. उग्रः ८. महादेवः - एताः अष्टमूर्तयः उक्ताः।

- पञ्चमहाभूतानां नामभिः यानि पञ्चलिङ्गानि असिद्धानि, तानि सर्वाणि दक्षिणभारते स्थितानि सन्ति। तेषु -

१. **पृथिवीलिङ्गम्** - एकाग्रेश्वरस्य पृथिवीलङ्गं शिवकाञ्च्यामस्ति।

२. **जलमूर्तिलिङ्गम्** - जम्बुकेश्वरे त्रिचिनापल्ल्यां श्रीरङ्गात् एकयोजनानन्तरं जलप्रवाहोपरि लिङ्ग स्थितं वर्तते।

३. **अग्निमूर्तिलिङ्गम्** - अखाचलस्य तमिलभाषायां नाम तिरुवल्लामल्लै इत्यस्ति। अत्र भगवतः दिव्यम् अग्निरूपं तेजोलिङ्गं प्रतिष्ठितम्।

४. **वायुमूर्तिलिङ्गम्** - **कालहस्तीश्वरम्** - तिरुपतितीर्थात् नातिदूरे स्वर्णमुखीनद्याः पवित्रतटे भगवान् शिवः श्रीकालहस्तीनाम्ना वायुलङ्गरूपेण प्रतिष्ठितः।

५. **आकाशमूर्तिलिङ्गम्** - चिदम्बरं दक्षिणभारतस्य प्रमुखतीर्थं विद्यते। पञ्चतत्त्वलिङ्गेषु भगवतः आकाशतत्त्वलिङ्गस्य चिदम्बरमध्ये प्रतिष्ठा विद्यते।

६. **सूर्यमूर्तिलिङ्गम्** - भगवान् सूर्यः सर्वसाक्षी प्रत्यक्षो देवः शिवसूर्ययोर्मध्ये नास्ति कोऽपि भेदः।

७. **चन्द्रमूर्तिलिङ्गम्** - प्रभासे सोमनाथज्योतिर्लिङ्गं तथा बङ्गालप्रान्ते चटग्रामसमीपे चन्द्रनाथः एते भगवतः चन्द्रामूर्तिरूपे।

८. **यजमानमूर्तिलिङ्गम्** - नेपाले पशुपतिनाथः यजमानमूर्तेः प्रतीकमस्ति।

प्रत्येकस्य देवस्य मूर्तिप्रतिष्ठायां अष्टौ मूर्तयः अष्टौ मूर्तिपतयः अष्टौ लोकपालाश्च भवन्ति।

## शब्दार्थाः

**विहाय** - त्यक्त्वा। **मूर्तिः** - प्रतिमा, **प्रतीकम** - चिह्नम्, **सूर्यः** - सविता, **नाथः** - स्वामी।

## स्वाध्यायः

**१. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) कुण्डस्य ऐशान्यां सजले शान्तिकलशे ......... देवतानाम् आवाहनं क्रियते। (चतुर्विंशतीनां, अष्टानां, चतसृणां)

(२) शिवकाञ्च्यां ......... लिङ्गमस्ति। (वायुमूर्ति, पृथिवीमूर्ति, जलमूर्ति)

(३) भगवतः ......... मूर्तयः सन्ति। (अष्टौ, एक, दश)

(४) अग्निमूर्त्याधिपतिः ......... अस्ति। (पशुपतिः, भवः, शर्वः)

(५) पञ्चलिङ्गानि ......... स्थितानि सन्ति। (दक्षिणभारते, उत्तरभारते, पश्चिमभारते)

**२. निम्नलिखितप्रश्नानाम् एकवाक्येन उत्तरं लिखत।**

(१) शिवप्रतिष्ठां के मूर्तिपतयः ?

(२) भगवतः अष्टौ मूर्तयः लिखत।

(३) आकाशमूर्त्याधिपति कः अस्ति ?

(४) पशुपतिनाथः कुत्र अस्ति ?

(५) कस्य चन्द्रमूर्तिः प्रतीकरूपा ?

(६) जलमूर्त्याधिपतिः कः अस्ति ?

३. क-ख विभागौ सम्यक्कुरुत।

| 'क' विभाग | 'ख' विभाग |
|---|---|
| (१) यजमानमूर्तिः | (१) शिवसूर्ययोः |
| (२) सूर्यमूर्तिः | (२) पशुपतिनाथः |
| (३) चन्द्रमूर्तिः | (३) सोमनाथः/चन्द्रनाथः |
| (४) वायुमूर्ति | (४) श्रीकालहस्तीश्वरः |
| (५) जलमूर्तिः | (५) जम्बूकेश्वरः |
| (६) अग्निमूर्तिः | (६) अखाचलः |
| | (७) चिदम्बरम् |

**छात्रप्रवृत्तिः**

- छात्राः मूर्तिमूर्तिपतिलोकपालानां स्मृति धारयन्तु।

**अध्यापकप्रवृत्तिः**

- अध्यापकः सर्वेषां देवानां पौराणिकपरिचयं कारयेत्।

●

# ११ होमप्रकरणम्

**प्रस्तावना**

अस्माकं भारतीय-सनातन-वैदिक-संस्कृतिः ईश्वरपरायणा वर्तते ''सर्वं खल्विदं ब्रह्म'' संपूर्णविश्वम् ईश्वरस्य स्वरूपं वर्तते तत्रापि सगुणब्रह्मणः समुपासकाः पञ्चायतन देवानां पूजनं कुर्वन्ति।

आदित्यं गणनाथं च देवीं रुद्रं च केशवम्।
पञ्चदैवत्यमित्युक्तं सर्वकर्मषु पूजयेत्॥ **( वाचस्पतौ )**

पूजा कृतेऽपि प्रतिष्ठिता मूर्तयः एव प्रशस्ताः, उक्तं च -

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन॥
अस्मिन् प्राणप्रतिष्ठां तु प्रतिमापूजनाद् ऋते।
प्राणप्रतिष्ठां प्रथमं पूजाभागविशुद्धये॥
न कश्चिद् बुधः कुर्यात् कृत्वा मृत्युमवाप्नुयात्॥''**कालिकापुराणे**''

**तथा च**

सुरार्चां प्रतिष्ठाहीनां
यस्तु पूजयते नरः।
तस्यान्नं नाभिवाञ्छन्ति
तस्मात्तां परिवर्जयेत्॥

**प्रतिष्ठाऽपि द्विविधा-चला-अचला च**

गृहे चलार्चा विज्ञेया
प्रासादे स्थिरसंज्ञिका।
इत्येते कथिता मार्गा
मुनिभिः कर्मवादिभिः॥ ''**कालिका संग्रहे**''

समस्तभक्तजनानां कल्याणाय मन्दिरे अचला प्रतिष्ठा कर्तव्या, तत्र प्रतिष्ठा-विधौ मूर्तिषु तत्त्वन्यासान् निधाय शान्तिकलशे पूगीफले मूर्तिमूर्तिपतिलोकपालानाम् आवाहनं कृत्वा तदनंतरं देवपूजासङ्गतिकरणाय - देवानां पूजनं सत्कारभावो यज्ञेन भवति तदर्थं शान्तिकः पौष्टिकश्च होमः श्रद्धया प्रकर्तव्यः।

**शिरः स्थाने तु देवस्य स्थापको होममाचरेत्।**
**शान्तिकैः पौष्टिकैस्तद्वन्मन्त्रैर्व्याहृतिपूर्वकैः॥**

**( मात्स्ये - शिरस्थानम् नाम आचार्यकुण्डः )**

अस्मिन् प्रकरणे प्रतिष्ठाविधौ क्रियमाणं शान्तिक-पौष्टिकहोमविधानं प्रदत्तमस्ति।

---

अत्र ''यज्'' धातुः, ''नङ'' प्रत्ययेन ''यज्ञः'' शब्दः पुल्लिङ्गे सम्भवति। यज देवपूजासङ्गतिकरण-दानेषु'' -

**पाणिनीय - ''वैयाकरणसिद्धान्ते''**

अनेन होमकर्मणा देवा: तृप्तिमासाद्यन्ते भक्तेभ्य: शान्तिं - पुष्टिं च ददाति

इज्यन्ते सम्पूजिता: तृप्तिमासाद्यन्ते देवा: अत्रेति यज्ञ:॥

## होमप्रकरणम्

संस्कारयोग्यमाज्यचर्वादिकं हविरग्रावधिश्रियस्रुक्स्रुवौ प्रतप्य संमार्जनकुशै: संमार्ज्य प्रणीतोदकेनाभ्युक्ष्य पुन: प्रतप्य स्वदक्षिणदेशे स्थापयेत्। आज्यादिकमुद्वास्य पवित्राभ्यामुत्पूय अवेक्ष्य अपद्रव्यं निरस्य अन्यानि हवींषि प्रोक्ष्य होममारभेत्।

**शांन्तिपौष्टिकहोम:**

तत आचार्य: पलाशौदुम्बरास्वत्थशम्यपामार्गसमिधां प्रत्येकं षोडशाधिकशतद्वयं कुण्डसमीपे दधिमधुघृतप्लुतं निधाय **ॐ हिरण्यगर्भ: समवर्ततताग्रे भूतस्य जात: पतिरेकऽआसीत्। सदाधार पृथिपींद्यामुतेमां कस्मै देवाय हविषा विधेम।** इत्यभिमन्त्र्य शान्तिकै: पौष्टिकैश्च मन्त्रैर्यथाविभागं सत्त्वृत्विक् जुहुयात्। एवं पलाशादिका: समिध: २१६ × ५ = १०८० अशीत्युत्तरसहस्रसंख्याका भवन्ति।

शान्तिपौष्टिकमन्त्रानुद्दिश्य अनेकेषां मन्त्राणां निर्देशो विभाग: स्वाहाकारश्च शास्त्रार्थप्रकरणे बहुधा विचारित:। समिधां सर्वथाऽलाभे यवैस्तदभावे तिलैर्वा होम: कार्य:।

विभागश्चेत्थम् - अष्टादशब्राह्मणानुपवेश्य-त्रिंशद्वारं ३०, शान्तिकमन्त्रै: त्रिंशद्वारं - ३०, पौष्टिकमन्त्रैश्च होमो मन्त्र: समुदायान्ते।

द्वादशब्राह्मणोपवेशने ४५ वारं शान्तिकै: ४५ वारं पौष्टिकैश्च होम:।

नवब्रह्मणोपवेशने ६० वारं शान्तिकै: ६० वारं पौष्टिकैश्च होम:। एवं १०८० आहुतयो भवन्ति।

**शान्तिकमन्त्रा:**

१. ॐ शन्नो॒ व्वात॑: पवता॒ᳪ शन्न॑स्तपतु॒ सूर्य॑:।
शन्न॒: कनि॑क्रदद्दे॒व: प॒र्जन्यो॑ऽअ॒भिव॑र्षतु १०

२. ॐ अहा॑नि॒ शम्भ॑वन्तु न॒: शᳯ रात्री॑: प्रति॑धीयताम्।
शन्न॑ऽइन्द्रा॒ग्नी भ॑वतामवो॑भि॒: शन्न॒ऽइन्द्रावरु॑णा रा॒तह॑व्या।
शन्न॑ऽइन्द्रापूषणा॒ व्वाज॑सातौ॒ शमिन्द्रा॒सोमा॑ सुवि॒ताय॒ शँयो: ११

३. द्यौ: शान्ति॑र॒न्तरि॑क्ष॒ᳯ शान्ति॑: पृथि॒वी शान्ति॒राप॒: शान्ति॒रोष॑धय॒: शान्ति॑:।
वन॒स्पत॑य॒: शान्ति॒र्विश्वे॑ दे॒वा: शान्ति॒र्ब्रह्म॒ शान्ति॒: सर्व॒ᳯ शान्ति॒: शान्ति॑रे॒व शान्ति॒: सा मा॒ शान्ति॑रेधि १७

**पौष्टिकमन्त्रा:**

१. ॐ अयमग्नि: पुरीष्यो रयिमान् पुष्टिवर्द्धन:।
अग्ने पुरीष्याभिद्युम्नमभि सहऽआयच्छस्व॥

२. ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम्।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥

३. ॐ त्र्यम्बकं यजामहे सुगन्धिम्पतिवेदनम्।
उर्व्वारुकमिव बन्धनादितोमुक्षीय मामुत:॥

४. ॐ शि वो नामा॑सि॒ स्वधि॑तिस्ते पि॒ता नम॑स्तेऽअस्तु॒ मा मा॑ हिᳯसी:।
निव॑र्त्तया॒म्यायु॑षेन्नाद्या॑य प्र॒जन॑नाय रा॒यस्पोषा॑य सुप्रजा॒स्त्वाय॑ सुवीर्षाय -

**मूर्तिमूर्तिपतिलोकपालहोमः**

ततो मूर्तिपा ऋत्विज **एककुण्डे** पलाशसमिद्भिराज्येन तिलैर्वा प्रत्येकं १०८ वा २८ संख्यया जुहुयात्।

**पञ्चकुण्ड्याम्** आचार्यकुण्डं विहाय पूर्वदक्षिणपश्चिमोत्तरकुण्डेषु मूर्तिमूर्तिपतिलोकपालानां द्वयं द्वयं जुहुयात्।

**नवकुण्ड्यामाचार्यकुण्डं** विहाय **पूर्वाद्यष्टकुण्डेष्वेकैकान् मूर्त्तिमूर्त्तिपतिलोकपालानुद्दिश्य** जुहुयात्।

एककुण्डेऽष्टोत्तरशतपक्षेऽष्टादशब्राह्मणाः षड्वारं, द्वादशब्राह्मणा नववारं, नवब्राह्मणा द्वादशवारं, प्रत्येकां मूर्त्तिम् मूर्त्तिपतिं लोकपालञ्चोद्दिश्य जुहुयात्।

**१. पृथिवीमूर्त्तिः - ॐ स्योना पृथिवी नो भवा नृक्षरा निवेशनी।**
**यच्छा नः शर्म्म सप्रथाः। स्वाहा।**

**२. शर्वः - ॐ नमः शर्व्वाय पशुपतये च स्वाहा। (अधोरेभ्योऽथ धोरेभ्यो.........)**

**३. इन्द्रः - ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम्।**
**ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ५०**

**४. अग्निमूर्त्तिः - ॐ अग्निन्दूतम्पुरोदधे हव्यवाहमुपब्ब्रुवे। देवाँ२ऽआसादयादिह स्वाहा।**

**५. पशुपतिः - ॐ तेजः पशूनांꣳहविरिन्द्रियावत्त्यरिस्रुता पयसा सारघम्मधु।**
**अश्विभ्यान्दुग्धम्भिषजा सरस्वत्त्या सुता सुताब्भ्याममृतः सोमऽइन्दुः स्वाहा।**

**६. अग्निः - ॐ अयन्ते योनिर्ऋत्वियो यतो जातोऽअरोचथाः।**
**तञ्जानन्नग्नऽआरोहाथा नो वर्धया रयिम् ५६**

**७. यजमानमूर्त्तिः - ॐ सुवीरो व्वीरान्प्रजनयन्परीह्यभिरायस्पोषेण यजमानम्।**
**सञ्जग्मानो दिवा पृथिव्व्या शुक्रः शुक्रशोचिषा निरस्तः शण्डः शुक्रस्याधिष्ठनमसि स्वाहा**

**८. उग्रः - ॐ उग्रश्च भीमश्चध्वान्तश्च धुनिश्च।**
**सासह्वांश्च्चाभियुग्वा च विक्षपः स्वाहा।**

**९. यमः - ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा। स्वाहा घर्माय स्वाहा घर्मः पित्रे ॥**

**१०. सूर्यमूर्त्तिः - ॐ उदुत्त्यञ्जातवेदसन्देवं व्वहन्ति केतवः।**
**दृशेव्विश्श्वाय सूर्य्यम् - स्वाहा।**

**११. रुद्रः - ॐ इमा रुद्राय तवसे कपर्द्दिने क्षयद्वीरायप्प्रभरामहे मतीः।**
**यशाशमसद्दिपदे चतुष्पदे व्विश्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् स्वाहा॥**

**१२. निर्ऋतिः - ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्त्यामन्वि हितस्करस्य।**
**अन्यमस्म्मदिच्छसातऽइत्त्या नमो देवि निर्ऋते तुभ्यमस्तु स्वाहा॥**

**१३. जलमूर्त्तिः - ॐ आपो हिष्ठामयो भुवस्तानऽऊर्ज्जेदधातन। महेरणाय चक्षसे स्वाहा॥**

**१४. भवः - ॐ नमो भवाय च रुद्राय च स्वाहा।**

**१५. वरुणः - ॐ इमम्मे व्वरुणश्श्रुधीहवमद्या च मृडय। त्त्वामवस्युराचके स्वाहा॥**

**१६. वायुमूर्त्तिः - ॐ तव वायवृतस्पते त्वष्टुर्जामातरद्भुत।**
**अयाꣳस्यावृणीमहे ३४**

१७. ईशानः - ॐ तमीशानं जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमहे वयम्।
पूषानो यथावेदसामसद्वृधे रक्षितापायुरदब्धः स्वस्तये स्वाहा॥

१८. वायुः - ॐ आ नो॑ नि॒युद्भि॑÷ श॒तिनी॑भिरध्व॒रꣳ स॑ह॒स्रिणी॑भि॒रुप॑याहि य॒ज्ञम्।
वायो॑ऽअ॒स्मिन्त्सव॑ने मादयस्व यू॒यम्पा॑त स्व॒स्तिभि॒ः सदा॑ नः २८

१९. सोममूर्त्तिः - ॐ व्वयꣳसोमव्व्रते तवमनस्तनूषविभ्रतः।
प्रजावन्तः सचेमहि - स्वाहा।

२०. महादेवः - ॐ उ॒ग्रँल्लोहि॑तेन मि॒त्रꣳ सौव्र॑त्येन रु॒द्रन्दौर्व्र॑त्ये॒नेन्द्र॑म्प्रक्री॒डेन॑ म॒रुतो॒ बले॑न सा॒ध्यान्प्र॒मुदा॑।
भ॒वस्य॒ कण्ठ्य॑ꣳ रु॒द्रस्या॑न्तःपा॒र्श्वम्म॑हादे॒वस्य॒ यकृ॑च्छ॒र्वस्य॑ वनि॒ष्ठुः प॑शु॒पतेः॑ पुरी॒तत् ꣳ

२१. सोमः (कुबेरः)- ॐ अ॒भि त्यन्दे॒वꣳ स॑वि॒तार॑मो॒ण्योः॒÷ क॒विक्र॑तु॒मर्चा॑मि स॒त्यस॑वꣳ रत्न॒धाम॒भि प्रि॒यम्म॒तिङ्क॒विम्।
ऊ॒र्ध्वा यस्या॒मति॒र्भा॑ऽअदि॑द्युत॒त्सवी॑मनि॒ हिर॑ण्यपाणिरमिमीत सु॒क्रतु॒÷ कृ॒पा स्वः॑÷।
प्र॒जाभ्य॑स्त्वा प्र॒जास्त्वा॑नु॒प्राण॑न्तु प्र॒जास्त्वम॑नु॒प्राणि॑हि २५

२२. आकाशमूर्त्तिः - ॐ आ॒दि॒त्यङ्गर्भ॒म्पय॑सा॒ सम॑ङ्ग्धि स॒हस्र॑स्य प्रति॒माँवि॒श्वरू॑पम्।
परि॑वङ्ग्धि हर॑सा माभिम॑ꣳस्थाः श॒ताय॑षङ्कृणुहि चीयमा॑नः ४१

२३. भीमः - ॐ मृ॒गो न भी॒मः कु॑च॒रो गि॑रि॒ष्ठाः प॑रा॒वत॑ऽआ॒जग॑न्था॒ पर॑स्याः
सृ॒कꣳ स॒ꣳशाय॑ प॒विमि॑न्द्र ति॒ग्मँवि शत्रू॑न्ताढि॒ वि मृधो॑ नुदस्व ७१

२४. ईशान - ॐ अ॒भि त्वा॑ शूर नोनु॒मोदु॑ग्धाऽइव धे॒नव॑÷।
ईशा॑नम॒स्य जग॑तः स्व॒र्दृश॒मीशा॑नमिन्द्र त॒स्थुष॑÷ ३५

**वैष्णवे पञ्चमूर्त्तिमूर्त्तिपतयः**

**१. पृथिवी** - स्योनापृथिवि ॰ २. **विष्णुः - इदं विष्णु** ॰ **३. जलं** - आपोऽअस्मान् ॰ **४. त्रिणिपदा** ॰ **५. तेजः** - पशूनां ॰ **६. विष्णोः कर्माणि** ॰ **७. वायुः** - आनो नियुद्भिः ॰ **८. तद्विष्णोः** ॰ **९. आकाशः** - नाभ्या आसीद ॰ **१०. तद्विप्रासो** ॰।

**शैवे पञ्चमूर्त्तिपक्षे मूर्त्तिमूर्त्तिपतयः। -**

१. स्योनापृथिवि ॰ २. ब्रह्मजज्ञानं ॰ ३. आपो हिष्ठा ॰ ४. इदं विष्णु ॰ ५. तेजः पशूनां ॰ ६. नमस्तेरुद्रमन्यव ॰ ७. वायोयेते ॰ ८. यः प्राणतो ॰ ९. द्यौरासीत् ॰ १०. शिवोभव प्रजाभ्यो ॰।

**गणेशस्याष्टमूर्त्तिपतिपक्षे**

१. सुमुख - मनो मे तर्पयत ॰ २. एकदन्तः - सजोषाऽइन्द्र ॰ ३. कपिलः - प्रतूर्वन्नेहय ॰ ४. गजकर्णः - नमो गणेभ्यो ॰ ५. लंबोदर - ऋतजिच्च ॰ ६. विकटः - समुद्रोऽसि नमभस्वा ॰ ७. विघ्ननाश - इदं ꣳ हविः ॰ ८. गणाधिपः - गणपतये स्वाहा।

**देव्या अष्टमूर्त्तिपतिपक्षे**

१. आर्या - आयङ्गौः ॰ २. दाक्षायणी - यदाबध्नन् ॰ ३. गिरिजा - समख्ये देव्या ॰ ४. मेनकात्मजा -

तंपत्नीभि ॰ ५. शर्वाणी – नमः शर्वाय च पशुपतये च ॰ ६. भवानी – नमोभवाय च रुद्राय च ॰ ७. मृडानी – ययातेरूद्रशिवा तनूः शिवा ॰ ८. अम्बिका – अम्बेऽअम्बिके ॰।

**विष्णोरष्टमूर्त्तिपतिपक्षे**

१. विष्णुः – युञ्जते मनः ॰ २. मधुसूदनः – इदं विष्णुः ॰ ३. त्रिविक्रमः – इरावती धेनुमती ॰ ४. वामनः – देवश्रुतौ ॰ ५. श्रीधरः – विष्णोर्नुकं ॰ ६. हृषीकेशः – दिवो वा ॰ ७. पद्मनाभः – प्रतद्विष्णु ॰ ८. दोमोदरः – विष्णोरराटमसि ॰।

**सूर्याष्टमूर्त्तिपतिपक्षे**

१. विकर्तनः – नमोऽसिमद्धो नक्तञ्चरद्भो विकृन्तानाम्पतये नमः। ॰ २. विवस्वान् – विवस्वन्नादित्यै ॰ ३. मार्तण्डः – सूर्य्यरश्मि ॰ ४. भास्करः – श्रायन्तइवसूर्य्यं ॰ ५. रविः – आकृष्णेनरजसा ॰ ६. लोकप्रकाशकः – तरणिर्विश्वदर्शते ॰ ७. श्रीमान् – श्रीणामुदारो ॰ ८. लोकचक्षुः – तच्चुक्षुर्देवहितं ॰।

**तत्वन्यास होमः**

कुण्डसमीपे उपविश्य – जलमादाय – आसु प्रतिमासु सूर्याचन्द्रमसौ यावत् तत्त्वानामाप्यायनार्थं तत्त्वन्यासहोमं करिष्ये – इति संकल्प प्रतितत्त्वं ॐ अकाराय स्वाहा इत्यादि साधारणविशिष्टैश्च तत्त्वैः तत्तन्नाम्ना घृतेन तिलैर्वा जुहुयात्। एतावदसम्भवे – प्रधानदेवतामुद्दिश्य – (ॐ पराय विष्ण्वात्मने स्वाहा, ॐ पराय शिवात्मने स्वाहा, ॐ पराय शक्त्यात्मने स्वाह, ॐ पराय सूर्यात्मने स्वाहा, ॐ पराय गणेशात्मने स्वाहा, ॐ पराय हनुमदात्मने स्वाहा, ॐ पराय रमात्मने स्वाहा – इत्यादि देवताविशेषं होमं कृत्वा १०८ अष्टोत्तरशताहुतीर्जुहुयात् – अनेन तत्त्वानामाप्यायनार्थं कृतेन तत्त्वन्यास होमकर्मणा तत्त्वन्यासकर्मणि अधिकारसिद्धिरस्तु।

**स्थाप्यदेवता होमः –**

स्थाप्यदेवतालिङ्गकामन्त्राः वेद, पुराण, गायत्री, नामरूपाः वा स्वयमेव तत् ग्रन्थेभ्यः स्वयमूहनीयाः।

तत्र केवलदेवे पिण्डिकायाः पत्नीरूपत्वात्पत्नीमन्त्रेण पिण्डिकाहोमः। केवलं देव्याः प्राधान्ये पिण्डिकाया देवीरूपान्तरं मत्त्वा तन्मन्त्रेण होमः। ताम्रमयकाष्ठमयान्यतरध्वजदण्डे स्थाप्ये – ॐ केतुं कृण्वन् ॰ इति मन्त्रेण, शिखरस्थापने – ॐ आजिघ्रकलशं ॰ इति मन्त्रेण वाहनस्थापने च वाहनमन्त्रेण होमः कार्यः। यद्यपि पद्धतिषु द्वादशसहस्र, षट्सहस्र, त्रिसहस्र, अष्टोत्तरसहस्राष्टोत्तरशतरूपाः संख्या उक्ताः। किन्तु तादृशविद्वद्ब्राह्मणालाभे १००८ वा १०८ संख्याग्रहणमुचितम्।

देवताहोमे सपरिवारशिवदेवता मन्त्रा (१) गणानान्त्वा – गणपतेः, (२) अम्बे अम्बिके – गौर्याः, (३) नमः शम्भवाय – शिवस्य, (४) गौरीर्मिमाय ॰ (आयङ्गौः ॰) पिण्डिकायाः, (५) अस्मेरुद्रा ॰ हनुमतः, (६) आशुः शिशानो ॰ नन्दीश्वरस्य, (७) यस्य कूर्मो – कूर्मस्य, (८) केतुङ्कृण्वन् ॰ – ध्वजस्य, (९) आजिघ्र कलशं ॰ – शिखरस्य एते मन्त्रा ग्राह्याः।

द्वादशब्राह्मणोपवेशने प्रतिमन्त्रं नववारं, नवसत्त्वे-द्वादशवारं अष्टादशसत्त्वे षड्वारं प्रतिदैवतं होमः एवम् १०८ संख्या प्रतिदेवं सम्पादनीया।

**व्याहृतिहोमः –**

तिल, यव, व्रीहि, चरु, आज्य इति पञ्चद्रव्यं वा केवलेन आज्येन तिलैर्वा अष्टोत्तरसहस्र, अष्टोत्तरशतान्यतरसंख्यया समस्तमहाव्याहृतिभिः **ॐ भूर्भुवः स्वः स्वाहा**इति मन्त्रेण दशब्राह्मणान् उपवेश्याष्टोत्तरसहस्रमेकया मालया जुहुयात्। ततो हुतशेषमादाय – ॐ अग्नये स्विष्टकृते स्वाहा – इति जुहुयात्। होमे प्रतिपर्यायं प्रधानदेवस्य पादनाभिहृदयशिरांसि स्पृशेत्। देवस्य दक्षिणकर्णे 'कृतममुं होमं देवाय निवेदयामि' इति निवेदयेत्। यावन्ति दिनानि अधिवासने स्युः तत्र प्रतिदिनं (१) शान्तिकपौष्टिकहोमः,

(२) मूर्त्तिमूर्त्यधिपतिलोकपालहोमः, (३) स्थाप्यदेवताहोमः, (४) व्याहृतिहोमः, (५) तत्त्वन्यासहोमः तत्त्वन्यासाः प्रतिदिनं कार्या इति बोध्यम्।

**प्रासाददिक्षु होमः -**

नूतनप्रासादश्चेत् प्रासादस्याष्टदिक्षु स्थण्डिलानि कृत्वा तादृशहोमयोग्यस्थलाभावे प्रासादपुरत एकमेव स्थण्डिलं कृत्वा जलमादाय - प्रासादरक्षार्थं देवप्रबोधार्थञ्च प्रासादिग्होमं करिष्ये।

सर्वस्थण्डिलेशु पञ्चभूसंस्कारपूर्वकमग्निं प्रतिष्ठाप्य - ब्रह्मासनादि - पवित्रयोः प्रणीतासु निधानम् इत्यन्तं कुर्यात् ईशाने सजलं कलशं संस्थाप्य आज्यभागान्ते देवतामूलमन्त्रेण-गायत्र्या वा समिद्भिः आज्येन च ८०६८४, ८६४, २२४ वा ६४ संख्यया होमं कृत्वा कलशे संस्रवप्रक्षेपः। नवाहुतयः स्विष्टकृत्, प्रोक्षण्यां संस्रवः। संस्रवप्राशनादि प्रणीताविमोकान्तम्। अग्निविसर्जनम्। ईशानकलशे जलसंस्रवसंरक्षणम्।

इति प्रासाददिग्होमः।

**प्रतिष्ठा होमः -**

यजमानो मण्डपमागत्य आज्येन प्रतिष्ठाहोमं कुर्यात् -

(१) ॐ शिवाय स्थिरो भव स्वाहा। (२) ॐ शिवाय अप्रमेयो भव स्वाहा।

(३) ॐ शिवाय अनादिबोधो भव स्वाहा। (४) ॐ शिवाय नित्यो भव स्वाहा।

(५) ॐ शिवाय सर्वदो भव स्वाहा। (६) ॐ शिवाय अविनाशो भव स्वाहा।

(७) ॐ शिवाय अक्लमो भव स्वाहा। (८) ॐ शिवाय कृत्यो भव स्वाहा।

अन्यप्रतिष्ठासु चिकीर्षितश्चेद् ऊहेन - विष्णवे स्थिरो भव स्वाहा इत्यादिरीत्या कार्यः।

**अघोरहोमः -**

'शतेन स्थापयेत्' इति वचनात् सर्षपैः घृताक्ततिलैर्वा ॐ अघोरेभ्यो ॰ इति मन्त्रेण आचार्यकुण्डे १०८ अष्टोत्तरशतं जुहुयात्।

**स्थापितदेवताहोमः -**

प्रणवादिचतुर्थ्यन्तदेवतानामान्ते स्वाहा पदं योजयित्वा ॐ ब्रह्मणे स्वाहा इत्यादि प्रतिपादितम्। एकैकाज्याहुत्या वा दशदशतिलाहुतिभिः आचार्यकुण्डे कार्यः। तत्र क्रमः (१) मण्डलदेवताहोमः, (२) शेषादिमनुष्यान्तदेवताहोमः, (३) योगिनीहोमः, (४) क्षेत्रपाल-भैरवान्यतरहोमश्च।

## शब्दार्थाः

**उत्पूय** - सम्मार्ज्य, **अवेक्ष्य** - निरीक्ष्य, **निरस्य** - निष्कास्य, **ऊहनीयाः** - तर्कनीयाः

## स्वाध्यायः

**१. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) अस्माकं संस्कृतिः ........ परायणा वर्तते। (मानः, धनम्, ईश्वरः)

(२) संपूर्णं विश्वं ........ स्वरूपं वर्तते। (ईश्वरस्य, मानवस्य, आत्मनः)

(३) प्राणप्रतिष्ठां ........ पूजाभागविशुद्धये। (तृतीयं, द्वितीयं, प्रथमं)

(४) प्रासाद ........ संज्ञिका। (देव, स्थिर, जय)

(५) शान्तिकलशे ......... मूर्त्तिमूर्त्तिपत्तीनाम् आवाहनम्  (पूगीफले, दाडिमे, जम्बीरे)

(६) पञ्चकुण्ड्याम् ......... कुण्डं विहाय द्वयं द्वयं जुहुयात्।  (पद्मकुण्ड, आचार्यकुण्ड, त्रिकोणकुण्ड)

(७) ॐ नमः ......... पशुपतये स्वाहा।  (विष्णवे, ब्रह्मणे, शर्व्वाय)

(८) वैष्णवे ......... मूर्त्तिमूर्त्तिपतयः।  (पञ्च, सप्त, अष्ट)

(९) सर्वस्थंडिलेषु ......... भूसंस्कारपूर्वकमग्निं प्रतिष्ठापनम्।  (द्विज, अन्नप्राशनम्, पञ्चभू)

(१०) गणेशस्य ......... मूर्तिपति।  (अष्ट, नव, दश)

**२. निर्देशानुसारम् उत्तराणि लिखत।**

**(क) द्वित्रवाक्यात्मकमुत्तरं लिखत।**

(१) पञ्चायतनदेवाः।

(२) शान्तिक-पौष्टिकहोमे कः समिधः जुहुयात् ?

(३) व्याहृतिहोमः।

(४) तत्त्वन्यासहोमः किमर्थं क्रियते ?

**(ख) टिप्पणी लेख्या।**

(१) प्रतिष्ठाः।

(२) शान्तिक-पौष्टिक होमः।

(३) मूर्तिमूर्तिपतिलोकपालहोमः।

**(ग) सविस्तरं उत्तरत।**

(१) यज देवपूजासङगतिकरणदानेषु।

**(घ) मन्त्रपूर्तिकार्या।**

(१) ॐ द्यौः ......॥  (२) ॐ त्र्यम्बकं ......॥

**(ङ) श्लोकपूर्तिकार्या।**

(१) गृह चलार्चा ......॥  (२) शिरः स्थाने ......॥

**(च) विवरणम् कुरुत।**

(१) ''स्नानपरस्य दश-गुणाः''।

**छात्रप्रवृत्तिः**

- छात्राः स्थापितदेवतानां स्मृतिहेतवे चार्टनिर्माणं कुर्वन्तु।

**अध्यापकप्रवृत्तिः**

- अध्यापकः छात्रेभ्यः देवतानां होमस्य भिन्नं भिन्नमाह्निकं ज्ञापयन्तु।

# १२ प्रासादस्नपनम्-प्रासादतत्वन्यासाश्च

**प्रस्तावना**

अस्माकं भारतीय वैदिक सनातन संस्कृतिः-संस्कृति-संस्कारणां संरक्षकाणि केन्द्र-स्थानाननि मन्दिराणि सन्ति। मन्दिरे ईश्वरस्य सानिध्ये आध्यामिक - सामाजिक - उन्नत्यै जीवन विकासाय उपासनादिनि कार्याणि सम्भवन्ति। तत्र प्रभोः सान्निध्यम् अनुभवामः। यत्र पवित्रता - स्वच्छता तत्रेव देवाः संस्थिताः भवन्ति। यथा पवित्रे मानव हृदि तथैव शुद्धे प्रासादे मूर्तिषु देवसान्निध्यं जायते। यथा संसारे दन्तधावनेन मुखशुद्धिः, स्नानेन शरीरशुद्धिः, विष्णुस्मरणेन बाह्याभ्यन्तरः शुचिः जायते।

- अपवित्र पवित्रोऽवा सर्वावस्थांगतोऽपि वा।
  यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यान्तरः शुचिः॥

**( ब्रह्मवैवर्तपुराण-ब्रह्मखण्ड-अ. १७, श्लोक-१७ )**

- गुणा दश स्नानपरस्य नित्यं
  रुपं च तेजश्च बलं च शौचम्।
  आयुष्यमारोग्यमलोलुपत्वं
  दुःस्वपननाशश्च यशश्च मेधो॥ **( ब्रह्मनित्य टिकायाम् )**

तथैव प्रासाद शुद्ध्यर्थं प्रासादपुरुषसान्निध्यहेतवे प्रासाद स्नपनविदिः शान्तिक-पौष्टिक होमान्तरं विधीयते। सोऽयम् विधिः अस्मिन् प्रकरणे सर्वेषां कल्याणाय नरुपितोऽस्ति।

---

प्रतिमायाःस्नपनान्तरं शिखरस्य पूजा प्रतिष्ठां स्थिरिकरणं कृत्वा ततो प्रासादं स्नपयेत् उक्तं च **सशिखरं प्रासादं स्नपयेत्-( प्रतिष्ठा मौक्तिकम् )।** प्रासादं प्रतिमायाः शरीरं शिखरं प्रतिमायाः मस्तकं परिल्पितमस्त। अतः सशिखरं प्रासादं स्नपयेत्।

**प्रासादाधिवासनम्**

ततोऽधिवासयेदेवे प्रासादं तु विधानतः। प्रासादस्याग्रतो भूमौ मण्डलं तण्डुलैः शुभै॥
एकाशीतिपदं कृत्वा वारिपूर्णान् शुभान् ददन्। कलशाँस्तत्र संस्थाप्य सर्वौषधिसमन्वितान्॥
संक्षालयेत्तु प्रासादं पूर्वमेव शुभैर्जलैः। धूपयित्वा ततो धूपैः प्रासादे तु समन्ततः॥
प्रासादं तुस्नपयेत् सर्वं विधिना कलशोदकैः। तत्त्वन्यासं ततः कुर्यादिति प्रासादाधिवासनम्॥

**( प्रतिष्ठाकौमुदी,मत्स्यपुराणम् )**

**कर्मारम्भः -**

प्रासादाग्रे सभामण्डपे बहिर्वाऽक्षतैरेकशीति (८१) भिन्नभिन्नवकैः कृत्वा सप्तधान्यपुञ्जान् व्रीहिपुञ्जान् वा विधाय वननवकलशानां नव कोष्ठानि सम्पाद्य यजमानः। प्राङ्मुख उदङ्मुखो वोपविश्य संभृतसम्भारः: कर्मारम्भः कुर्यात्

- आचम्य प्राणानायाम्य शान्तिपाठं पठित्वा

**सङ्कल्पः -**

**हस्ते जलमादाय** अद्य पूर्वोच्चारिततिथौ सकलग्रामजन-भक्तजन-देशजन-कल्याणाय अस्मिन् नूतनप्रासादे सकलदोषनिवृत्तिपूर्वकं प्रासादशुद्ध्यर्थं, आचन्द्रतारकं प्रासादपुरुषसान्निध्यहेतवे सप्रासादप्रतिष्ठाङ्गभूतंप्रासादस्नपनं प्रासादाघिवासनञ्च करिष्ये।

**पुनः जलमादाय** - तत्रादौ गणेशस्मरणपूर्वकं कलशासादनं करिष्ये।

ॐ गणानान्त्वा ॰ इति मन्त्रेण गणपतिस्मरणं कृत्वा ॐ महीद्यौ ॰ इत्यादि-विधिना पूर्णपात्रवर्जं वरुणावाहनान्तं कृत्वा मध्यपूर्वादिप्रादक्षिण्यक्रमेण मध्यकलशेषु तानि तानि वस्तूनि निक्षिपेत्।

१. **मध्यनवकमध्यकुम्भे** - ॐ सोमाय वनस्पत्यन्तर्गताय नमः इति शमी-उदुम्बर-अश्वत्थ-आम्र-पलाश-प्लक्ष-न्यग्रोध-कदम्ब-बिल्व-अर्जुन-वृक्षसम्भवं पल्लवदशकं निक्षिपेत्।

२. **पूर्वनवकमध्यकुम्भे** - पद्म-गोरोचना-दूर्वाङ्कुर-दर्भ-पिञ्जूल-श्वेतपीत-सर्षप-श्वेत-चन्दन-जाती-बकुल-कुसुम-नद्यावर्त इति दशकं क्षिपेत्।

३. **अग्नेयनवकमध्यकुम्भे** - यव-व्रीही-तिल-सुवर्ण-रजत-समुद्रगामिनी-नदीकूलमृत्तिक-भूम्य-संस्पृष्ट गोमय इति सप्तकं क्षिपेत्।

४. **दक्षणनवक मध्यकुम्भे** - सहदेवी-विष्णुक्रान्ता-भृङ्गराज-महौषधी-शमी-शतावरी-गडूची-श्यामक-इत्याष्टकं क्षिपेत्।

५. **नैऋत्यनवकमध्यकुम्भे** - कदलीफल-नारिकेल-बिल्व-नारिङ्ग-मातुविङ्ग-बदर-आमलक-आम्रफलम् इति फलाष्टं क्षिपेत्।

६. **पश्चिमनवकमध्यकुम्भे** - मन्त्रसाधितं पञ्चगव्यं क्षिपेत्।

७. **वायव्यनवकमध्यकुम्भे** - शमी-उदुम्बर अश्वत्थ-न्यग्रोधपलाश इति वृक्षपञ्चकपल्लवकषायं क्षिपेत्।

८. **उत्तरनवकमध्यकुम्भे** - शंखपुष्पी, सहदेवी, शतावरी, गुडूची, वचा-बला-कुमारी-व्याध्री इति मूलाष्टकं क्षिपेत्।

९. **ईशाननवकमध्यकुम्भे** - वल्मीकादिसप्तमृत्तिकाः प्रक्षिपेत्।

सर्वकलशेषु गन्धोदकं प्रक्षिप्य ॐ हिरण्यनर्णाम् १५ इति श्रीसूक्तेन मध्यमकुम्भानभिमन्त्र्य देवतामूलमन्त्रेणाभिमन्त्रयेत।

प्रासादं त्रिसूत्र्याऽवेष्ट्य पञ्चगव्येन अन्तर्बहिरधसस्तादूर्ध्वञ्च प्रासादं ॐ आपोहिष्ठा ॰ इति प्रोक्ष्य। वल्मीकमृदा - ॐ मूर्धानंदिवो ॰ इति प्रासादमनुलिप्य-मध्यमपूर्वादिप्रादक्षिण्यक्रमेण मध्यमकलशैः क्रमेण प्रासादं स्नपयेत्।

१. **मध्यनवकमध्यकुम्भे** - ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये अन्तरिक्षे ये दिवितेभ्यः सर्पेब्भ्यो नमः॥

२. **पूर्वनवकमध्यकुम्भे** - ॐ व्विष्णो रराटमसिव्विष्णोः श्नप्त्रेस्थो व्विष्णोः स्यूरसि व्विष्णोर्धुवोऽसि। व्वैष्णवमसि व्विष्णवे त्त्वा॥

३. **आग्नेयनवकमध्यकुम्भे** - ॐ सोमꣳराजानमवसेऽग्निमन्वारभामहे। आदित्यां विष्णु ꣳ सूर्य्यं ब्रह्माणञ्च बृहस्पति (ꣳ) स्वाहा॥

४. **दक्षिणनवकमध्यकुम्भे** - व्विश्वतश्चक्षुरुतव्विश्वतोमुखो विश्वतोबाहुरुत व्विश्वतस्पात्। सम्बाहुभ्यां धमतिसंपतत्रैर्द्यावाभूमीजनयन्देवऽएकः॥

५. **नैऋत्यनवकमध्यकुम्भे** - याः फलिनीर्याऽअफलाऽअपुष्पायाश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुञ्चत्व (ꣳ) हसः॥

६. **पश्चिमनवकमध्यकुम्भे** - ॐ पयः पृथिव्याम्पयऽ ओषधीषु पयोदिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तुमह्यम्॥

७. **वायव्यनवकमध्यकुम्भे** - यज्ञायंज्ञा वोऽअग्नयें गिरागिरा च दत्तसे।

प्रप्रं व यममृतंञ्ज्ातवेंदसम्प्रियम्मि त्रन्न शङ्गसिषम्॥

८. **उत्तरनवकमध्यकुम्भे** - हुङ्गसः शुंचिषद्वसुरन्तरित्तसद्धोतां वेदिषदतिंथिर्दुरोणसत्।

नृषद्वंरसदृंतसद्वयोंमसदब्जा गोजाऽऋंतजाऽअद्रिजाऽऋतम्बृहत् २४

९. **ईशाननवकमध्यकुम्भे** - ॐ समुद्राय त्वा व्वाताय स्वाहा सरिराय त्वा व्वाताय स्वाहा। अनाधृष्याय त्वाव्वाताय स्वाहा - प्रतिघृष्याय त्वा व्वाताय स्वाहा। अवस्यवे त्वा व्वाताय स्वाहाऽशिमिदाय त्वा व्वाताय स्वाहा।

ततो मध्यमपूर्वादिनवकेषु पारस्करगृह्यस्नानसूत्रकण्डिकायां 'इदमापो हविष्मतीर्देवीरापो' इति द्वाभ्यामपोदेवा द्रुपदादिवशन्नोदेवी अपां रसम्। इत्यक्तत्वाद् अवशिष्टाष्टभिः पूर्वादीशानान्तकलशैः प्रतिकोष्ठं क्रमेण स्नपेत् देवता अष्टौ मन्त्राः पुनः पुनः पठनीयाः।

१. ॐ इदमापः प्प्रवहतावद्यञ्च मलञ्च यत्। यच्चभिदुद्रोहानृतंयच्चशेपेऽअभीरूणम्। आपो मा तस्मादेनसः पवमानश्चमुञ्चतु॥

२. ॐ हविष्मतीरिमाऽआपो हविष्मां २ ऽ आविवासति।

हविष्मान्देवोऽअद्ध्वरो हविष्मां २ ऽ अस्तु सूर्य्यः॥

३. ॐ देवीरापोऽ अपान्नापाद्यो वऽ ऊर्म्मिर्हविष्यऽइन्द्रियावान्मदिन्तमः। तन्देवेभ्यो देव-त्रादात्त शुक्रपेभ्यो येषाम्भागस्त्थ स्वाहा।

४. ॐ कार्षिरसि समुद्रस्यत्त्वा क्षित्याऽ उन्नयामि। समापोऽअद्भिरग्गमत समोषधीभिरोषधीः।

५. ॐ अपो देवा मधुमतीरगृष्भ्णन्नूर्ज्जस्वती राजस्वश्चितानाः। याभिर्म्मित्रा वरूणावब्भ्य षिञ्चल्या भिरिन्द्रमनयन्नत्त्यरातीः।

६. द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव।

पूतम्पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः॥

७. शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये। शंय्योरभिस्रवन्तुनः॥

८. आप ꣳ रसमुद्वयस ꣳ सूर्य्ये सन्त ꣳ समाहितम्। अपा ꣳ रसस्य यो रसस्तम्व्वो गृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्त्वा जुष्टङ्गृह्णाम्म्येषते योनिरिन्द्रायत्त्वा जुष्टतमम्॥

एवं प्रतिकोष्ठमष्टमन्त्रावृत्त्याद्वासप्ततिकलशैः सशिखरं प्रासादं स्नपयेत्। एकाशीतिकुम्भाभाव एकेन गन्धोदकपूरितेन महता कलशेन ॐ दैव्याकर्म्मणे शुन्धध्वम् इति मन्त्रेण सशिखरं प्रासादं स्नपयेत्।

प्रासादं शुद्धजलेन संस्नाप्य सूत्रेणावेष्ट्य प्रासादं देवसूक्तेन मन्त्रेण वा देवरूपं भावयित्वा पताकादिना शोभयित्वा **ॐ प्रासादपुरुषाय: नमः** इति गन्धादिना सम्पूज्य तस्याधस्ताद् देवं संचिन्त्य।

**प्रार्थयेत्** -

ॐ ह्रीं सर्वदेवमयचिन्त्यसर्वरत्नोज्वला कृते।

यावच्चान्द्रश्च सूर्यश्च तावदत्र स्थिरो भव।

**( इदं विष्णु ॰ नमः शम्भवाय॰ अम्बे अम्बिके ॰ )**

ततः प्रासादाग्रे चतस्रो गा दुग्ध्वा तासां क्षीरेण चरुं श्रपयित्वा देवाय निवेद्य तेन पायसेन द्वादशब्राह्मणान् भोजयेत्।प्रधानदेवतामन्त्रेण प्रासादमधिवासयेत्।

**ततोऽक्षतैः प्रासादे प्रासादतत्त्वान्यावाहयेत्। -**

१. ॐ पृथिव्यै नमः २. श्री काण्ठाय नमः ३. ॐ अद्भ्योनमः ४. ॐ जलेशाय नमः ५. तेजसे नमः ६. ॐ त्विषांनिधये नमः ७. वायवे नमः ८. मातरश्विने नमः ९. ॐ आकाशाय नमः १०. ॐ सूक्ष्माय नमः ११. ॐ रूपतन्मात्रात्मने नमः १२. ॐ भानुमते नमः १३. ॐ रसतन्मात्रात्मने नमः १४. ॐ जलदाय नमः १५. ॐ गन्धतन्मात्रात्मने नमः १६. ॐ गन्धाय नमः १७. ॐ स्पर्शतन्मात्रात्मने नमः १८. ॐ बलवत्तराय नमः १९. ॐ शब्दतन्मात्रात्मने नमः २०. सूक्ष्मनादाय नमः २१. ॐ वाक् तत्वाय नमः २२. ॐ दुन्दुभये नमः २३. ॐ पाणितत्त्वाय नमः २४. ॐ समानाय नमः २५. ॐ पादतत्त्वाय नमः २६. ॐ चक्राय नमः २७. ॐ वायुतत्त्वाय नमः २८. ॐ कर्णभुजे नमः २९. ॐ उपस्थतत्त्वाय नमः ३०. ॐ घनानन्दाय नमः ३१. ॐ श्रोत्रतत्त्वाय नमः ३२. ॐ व्योमाधाराय नमः ३३. ॐ त्वक्-तत्त्वाय नमः ३४. ॐ सर्वगाय नमः ३५. ॐ चक्षुस्तत्त्वाय नमः ३६. ॐ प्रकाशाय नमः ३७. ॐ रसतत्त्वाय नमः ३८. ॐ महावक्त्राय नमः ३९. ॐ घ्राणतत्त्वाय नमः ४०. ॐ विलुण्ठकाय नमः ४१. ॐ मनस्तत्त्वाय नमः ४२. ॐ संकल्पाय नमः ४३. ॐ बुद्धितत्त्वाय नमः ४४. ॐ बुद्धये नमः ४५. ॐ अहंकारतत्त्वाय नमः ४६. ॐ अहंकृतये नमः ४७. ॐ चित्ततत्त्वाय नमः ४८. ॐ मनसे नमः ४९. ॐ प्रकृतितत्त्वाय नमः ५०. ॐ पितामहाय नमः ५१. ॐ पुरुषतत्त्वाय नमः ५२. ॐ विष्णवे नमः ५३. ॐ सदाशिवतत्त्वाय नमः ५४. ॐ अजेशाय नमः ५५. ॐ कालतत्त्वाय नमः ५६. ॐ क्रतुध्वजाय नमः ५७. ॐ विद्यातत्त्वाय नमः ५८. ॐ विष्णवे नमः॥

**वैष्णवेकलशे** ५९. ॐ चक्राद्यायुधेभ्यो नमः॥

**६०. शैव** ॐ शूलाद्यायुधेभ्यो नमः **६१. गणपतौ** - अङ्कुशाद्यायुधेभ्यो नमः **६२. सूर्ये** - शङ्खचक्राधायुधेभ्यो नमः। **६३. देव्याम्** - गदाखड्गाद्यायुधेभ्यो नमः ६४. ॐ सत्त्वाय नमः ६५. ॐ रजसे नमः ६६. ॐ तमसे नमः ६७. ॐ वह्निमण्डलाय नमः ६८. ॐ सोममण्डलाय नमः इति प्रासादतत्त्वानि विनस्य सम्पूज्य पुरुषसूक्तेन प्रासादं पुरुषरूपेण स्तुवीत॥

(प्रासादतत्त्वहोमकाले समिधातिलाज्याहुतिभिः प्रतिद्रव्यमष्टाष्टसंख्यया नाममन्त्रैर्जुहुयात्।)

प्रासादाद् बहिर्निगत्य प्रासादाभिमुखो भूत्वा प्रार्थयेत् -

**प्रासादप्रार्थना** -

(१) पादौ पादशिलास्तस्य जङ्घा पादोर्ध्वमुच्यते।
गर्भश्चैवोदरं ज्ञेयं कटिश्च कटिमेखला॥

(२) स्तम्भाश्च बाहवो ज्ञेया घण्टा जिह्वा प्रकीर्तिता।
दीपः प्राणोऽस्य विज्ञेयो अपानो जलनिर्गमः॥

(३) ब्रह्मस्थानं यदेतच्च तन्नाभिः पारिकीर्तितः।
हृत्पद्मं पिम्डिका ज्ञेया प्रतिमा पुरुषः स्मृतः॥

(४) तस्य पादस्त्वहंकारो ज्योतिस्तच्चक्षुरुच्यते।
तदूर्ध्वं प्रकृतिस्तस्य प्रतिमाऽत्मा स्मृतो बुधैः॥

(५) नलकुम्भादधोघारं तस्य प्रजननं स्मृतम्।
शुकनासा भवेन्नासा गवाक्षः कर्ण उच्यते॥

(६) कपोतपाली स्कन्धोऽस्य ग्रीवा चामलसारिका।
कलशस्तु शिरो ज्ञेयं मज्जा क्षिप्तरसादिकम्॥

(७) मेदञ्चैव सुधां विद्यात् प्रलेपो मांस उच्यते।
अस्थीनी च शिलास्तस्य स्नायु: कीलादिकं स्मृतम्।

(८) चक्षूंषि शिखराणि स्नुर्ध्वजा: केशा: प्रकीर्तिता:।
एवं पुरुषरूपं तं ध्यात्वा च मनसा बुधा:॥

(९) प्रासादं पूजयेत् पश्चाद् गन्धपुष्पं ध्वाजादिभि:॥
सूत्रेण वेष्टयेद् देवं वासांसि परिकल्पयेत्॥

(१०) प्रासादमेवमभ्यर्च्य वाहनं चाग्रमण्डपे - इति ध्यात्वा नमस्कुर्यात्।

जलमादाय - अनेन प्रासादस्नपनपूर्वकं प्रासादाधिवासनकर्मणा सपरिवार: स्थाप्यदेव: प्रीयताम्।

## शब्दार्था:

**संभृत** - सङ्गृहीत, **सम्भार:** - सङ्ग्रहीकरण, **अर्जुन:** - धवल:, **पिञ्जूल:** - कूर्च:, **नधावर्त** - एकं रत्नम्, **मातुलिङ्ग:** - नीमवृक्ष:

## स्वाध्याय:

**१. कोष्ठकप्रदत्तविकल्पेभ्य: योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) संस्कृति संरक्षकाणि केन्द्र स्थानानि ......... सन्ति। (गृहाणि, धनानि, मन्दिराणि)

(२) मन्दिरे ......... सान्निध्यम् अनुभवाम:। (पितु:, प्रभो:, पुत्रस्य)

(३) गुणा ......... स्नानपरस्य नित्यम्। (दश, षट्, अष्टौ)

(४) प्रासादस्याग्रता ......... मण्डले तण्डुलै: शुभै। (जले, भवने, भूमौ)

(५) गणानात्वामन्त्रेण ......... स्मरणम्। (हनुमत:, गणेशस्य, शिवस्य)

(६) ......... सूक्तेनमध्यमकुम्भानभिमन्त्रणम्। (पुरुषसूक्तेन, रुद्रसूक्तेन, श्रीसूक्तेन)

(७) सशिखरं ......... स्नपयेतत्। (भवनम्, प्रासादं, नगरम्)

(८) प्रासादं ......... भावयित्वा। (देवरूपम्, लोकरूपम, गन्धरूपम्)

(९) कलशस्तु ......... ज्ञेयम्। (हृदयम्, पादम्, शिर:)

(१०) वृक्षस्म्भवं पल्लव ......... निक्षिपेत्। (दशकं, पञ्चकम्, अष्टकम्)

**२. निर्देशानुसारम् उत्तराणि लिखत।**

**(क) द्विवाक्यै: उत्तराणि यच्छत।**

(१) मन्दिरस्य महत्त्वम्।

(२) कलशस्थापनम्।

(३) प्रासाद प्रार्थना कुत्र कर्तव्या ?

(४) प्रासाद स्नापनेन के देवा प्रसिदन्ति ?

**( ख ) टिप्पणी लेख्या।**

(१) प्रासादस्नपनस्य महत्त्वम्।

(२) प्रासादाधिवासनम्।

**( ग ) सविस्तरं उत्तरत।**

(१) प्रासादस्नपनसङ्कल्पः।

**( घ ) मन्त्रपूर्तिकार्या।**

(१) शन्नोदेवी......।

(२) नमोस्तु सर्पेभ्यो......।

**( ङ) श्लोकपूर्तिकार्या।**

(१) अपवित्र......।

(२) चक्षूंषि शिखरणानि......।

**छात्रप्रवृत्तिः**

- छात्राः प्रासादस्नपने कलशानां पात्रासादनं कथं स्यात् ? नस्य विषये विस्तरेण ज्ञानं प्राप्नुवन्तु।

**अध्यापकप्रवृत्तिः**

- अध्यापकः प्रासादस्नपने सर्वासां वेदीनां कलशानां ओषधीः ज्ञापयतु।

●

# १३ प्रासादपिण्डिकाधिवासः

**प्रस्तावना**

यथा ईश्वरः मानवानां निर्मले हृदयकमले निवसति

'सर्वस्य चाहं हृदि संनिविष्टो... **( श्रीमद्भगवक्षीता अ. १५, श्लोक. १५ )**'

तथैव प्रासादस्न्नपनेन पवित्रे मन्दिरे मन्त्रपूर्णे पिण्डिकोपरि सगुणः ईश्वरस्य मूर्तिरुपेण स्थापना प्रतिष्ठा भवति। यत्र ईश्वरस्य स्थापना करणीयास्ति तत्र गर्ते सुवर्ण रजतादि धातु कूर्म-नाग-पञ्चरत्नादीनि यथा वैभवं स्थापयेत्, ततः तत्र कूर्मशिला-ब्रह्मशिला-पिण्डिकात्मिकां त्रिवप्रां सिंहासनपरपर्यायां शिलां निदध्यात् तस्योपरि प्रभोः स्थापना भवेत्। अतः पिण्डिकायां देवकलासान्निध्यहेतवे स्थाप्यमानां देवतानां प्रीत्यर्थं सर्वेषां जनानां क्षेममारोग्यार्थं, भूपतेः विजय-प्राप्तिः सर्वेभ्यः सुख-प्राप्तिः सम्भवेत् तदर्थं प्रासादपिण्डिकाधिवासः विधिः क्रियते।

देवमन्दिरस्य निर्माण-विषये अत्यन्त-सूक्ष्मतया भगवता वेदव्यासेन अग्निपुराणे निरूपितमस्ति शिल्पशास्त्रेऽपि मन्दिरनिर्माण - विषये सूक्ष्म - दीर्घ दृष्ट्या विवरणं प्रदत्तम्। कूर्मशिलादि स्थापनं सावधानेन कर्तव्यम्- योग्य-प्रमाणसहितं स्थापनम् अस्तु। अन्यथा देवानाम् अनादरे सति ''**प्रतिष्ठा समो नास्ति रिपुः**''। यथा वैभवं - शस्त्रीयप्रमाणयुतं पिण्डिकास्थापनम् कर्तव्यमेव।

अस्मिन् पाठे प्रासादपिण्डिकाधिवासस्य क्रमः निरूपितोऽस्ति।

---

**प्रतिमापिण्डिकोर्ध्वमानम्**

द्वारोच्छ्रयोऽष्ट भागादि त्रिघातत्रोर्ध्वभागयोः।

समर्चा तदधोभागे दहेल्युच्छ्रयसंयुतः ॥

पिण्डिकोर्ध्वप्रमाणं स्यादधःस्थप्रतिमा भवेत्॥ (''प्रतिष्ठेन्दुः'')

प्रथमदिनस्य कार्यं समाप्य द्वितीयदिने प्रासादपिण्डिकाधिवासः प्रारभ्यते।

द्वितीयेऽह्नि प्रासादस्नपनान्तरं प्रतिष्ठादिने प्रातर्वा प्रतिष्ठातः पूर्वं पिण्डिकाधिवासनं कार्यम्।

आचमनम्। प्राणायामः।

सङ्कल्पः : जलमादाय - आरब्धस्य प्रासादाचलप्रतिष्ठाङ्गभूतं पिण्डिकायां (पिण्डिकासु) सूर्याचन्द्रमसौ यावद् देवकलासान्निध्यहेतवे पिण्डिकास्थापनमधिवासनञ्च करिष्ये।

प्रासादे स्थाप्यप्रतिमासंख्यानुरोधेन पूर्वस्थापिततत्पिण्डिकागर्तसमीपे ब्राह्मणानवस्थाय - पिण्डिकागर्तान् मधुघृताभ्यामभ्यज्य शुद्धवारिणा प्रक्षाल्य पूर्वस्नपनावशिष्टकलशवारिणा पिण्डिकामन्त्रैः (श्रीश्चते० ह्रश्चते० गौरीर्मिमात०) इत्यादिभिः संस्नाप्य गन्धादिभिरभ्यचर्य वस्त्रैराच्छाद्य तत्र तत्र गर्तेषु पिण्डिकामन्त्रान् न्यसेत् ॐ यं थं भं फट् लक्ष्म्यै (गौर्यै) हृदयाय नमः।

ॐ यं थं भं फट् (लक्ष्म्यै) (गौर्यै) शिरसे स्वाहा।

ॐ यं थं भं फट् लक्ष्म्यै (गौर्यै) शिखायै वषट्।

ॐ यं थं भं फट् लक्ष्म्यै (गौर्यै) कवचाय हुम्।

ॐ यं थं भं फट् लक्ष्म्यै (गौर्यै) नेत्रत्रयाय वौषट्।

ॐ यं थं भं फट् लक्ष्म्यै (गौर्यै) अस्त्राय फट् इति पिण्डिकायां पञ्चाङ्गानि विन्यस्य मूर्त्तिमूर्त्तिप्रतिलोकपालान् प्रागाद्यष्टदिक्षु विन्यसेदक्षतैः।

**पूर्वे** - पृथिवीमूर्त्तये नमः। पृथिवीमूर्त्यधिपतये शर्वाय नमः, इन्द्राय नमः। **आग्नेयाम्** - अग्निमूर्त्तये नमः, अग्निमूर्त्यधिपतये पशुपतये नमः अग्नये नमः। **दक्षिणे** - यजमानमूर्त्तये नमः, यजमानमूर्त्यधिपतये उग्राय नमः यमाय नमः। **नैऋत्याम्** - अर्कमूर्त्तये नमः, अर्कमूर्त्यधिपतये रुद्राय नमः, निऋतये नमः। **पश्चिमे** - जलमूर्त्तये नमः जलमूर्त्यधिपतये भवाय नमः, वरुणाय नमः। **वायव्याम्** - वायुमूर्त्तये नमः, वायुमूर्त्यधिपतये ईशानाय नमः, वायवे नमः। **उत्तरे** - सोममूर्त्तये नमः, सोममूर्त्यधिपतये महादेवाय नमः, सोमाय नमः। **ईशान्याम्** - आकाशमूर्त्तये नमः, आकाशमूर्त्यधिपतये भीमाय नमः, ईशानाय नमः। इति पिण्डिकान्यासं विधाय आभ्यां मन्त्राभ्यां पिण्डिकाधिवासयेत्-

ॐ ह्रीं श्रीं ह्रीं क्षः परब्रह्मणे सर्वाधाराय नमः। ह्रीं श्रीं ह्रीं दिव्यतेजोधारिण्यै सुभगायै नमः। इतिपिण्डिकाधिवासनम्।

**➢ पिण्डिकास्थापनम्**

पिण्डिकास्थापनदेशे पञ्चरत्नोपरि सौवर्ण कूर्मं द्वारसम्मुखं निधाय तदुपरि पञ्चरत्नानि विन्यस्य तदुपरि कूर्मशिलाब्रह्मशिलापिण्डिकात्मिकां त्रिवप्रां सिंहासनापरपर्यायां शिलां निदध्यात्। प्रथमो वप्रः कूर्मशिलाख्यो मध्यमो ब्रह्मशिलास्य तदुपरि तृतीयवप्रः पिण्डिकाख्यः इति शिलानिर्णयः।

एवं त्रिवप्रां शिलां पिण्डिकाख्यां स्थास्थाने स्तापयित्वा शिलामध्यदेशं स्पृष्ट्वा प्रार्थयेत् - ॐ नमो व्यापिनि स्थिरे अचले ध्रुवे ॐ श्रीं लं स्वाहा - त्वमेव परमाशक्तिस्त्वमेवासनधारिका। शिवाज्ञया त्वया देवि स्थातव्यमिह सर्वदा॥

ॐ तत्त्वाध्वने नमः। ॐ मन्त्राध्वने नमः। ॐ कालाध्वने नमः। इति पुष्पाञ्जलित्रयं दत्त्वा ॐ ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्प्रजया पशुभिर्भूयात्। घृतेन द्यावा पृथिवी पूर्व्वेथामिन्द्रस्यच्छदिरसि व्विश्वजनस्यच्छाया। (ध्रुवाद्यौः० ध्रुवतेराजा० ध्रुवंवरुण० ऋ)

इति मन्त्रं पठित्वा -

(१) ॐ आत्मत्त्वाय नमः (२) ॐ आत्मतत्त्वाधिपतये क्रियाशक्त्यै नमः (३) ॐ शिवतत्त्वाय नमः (४) शिवतत्त्वाधिपतये इच्छाशक्त्यै नमः (५) ॐविद्यातत्त्वाय नमः (६) ॐ विद्यातत्त्वाधिपतये आधारशक्त्यै नमः (७) मूर्त्तिमूर्त्तिपतिलोकपालेभ्यो नमः- इत्यावाह्य ॐ श्रीश्चते० ह्वीश्चतेलक्ष्मीश्च (कृ. यजु.) (गौरीमिमाय० ऋ) इति सम्पूज्य प्रार्थयेत्-

सर्वदेवमयीशक्तिस्त्रैलोक्याह्लादकारिणी।
त्वां प्रतिष्ठापयाम्यत्र मन्दिरे विश्वपूजिते॥
यावच्चन्द्रश्च सूर्यश्च यावदेषा वसुन्धरा।
तावत्त्वमनया शक्त्या मन्दिरेऽस्मिन् स्थिरा भव॥
पुत्रानायुष्मतो लक्ष्मीमचलामजरामृते।
अभयं सर्व भूतेभ्यः कतुर्नित्यं हि देहि भो।
विजयं भूपतेः सर्वलोकानां सुखमेव च॥
सुभिक्षं क्षेममारोग्यं कुरु देवि नमोऽस्तु ते।

- इति सम्प्रार्थ्य पिण्डिकायां वर्णन्यासं कुर्यात्-

- श्वभ्रे ॐ इति प्रणवम्।

तद्बाह्ये - अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः -

तद्बाह्ये - कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं इति व्यञ्जनानि विन्यस्य ततः प्रागाद्यष्टदिक्षु - इन्द्राय ० अग्नये ० यमाय ० निर्ऋतये ० वरुणाय ० वायवे ० सोमाय

० ईशानाय ० इति लोकपालान् विन्यस्याष्टदिक्षु वज्र - मौक्तिक -वैडूर्य-शङ्ख - स्फटिक-पुष्पराग-इन्द्रनील-महानील शकलानि गोधूमयवाक्षततिलान्, गर्भमध्ये हिरण्ययरौप्यादिधातुजातम्, देवस्य वाहनं गरुडादिगर्तमध्ये निक्षिप्य मनःशिलहरितालाञ्जनकासीस-सौराष्ट्री-गोरोचनागैरिक-पारदान् सुवर्ण-रौप्य-ताम्र - आयसत्रपुसीसकांस्यारकूटतीक्ष्णलोहानि, श्वेतरक्त- चन्दन - अगरु - अर्जुन - उशीर- वैष्णवी-सहदेवी-लक्ष्मणेत्योषध्यष्टकं बीजाभावे यवान् रत्नाभावे वज्रम्- धात्वभावे हरितालम् ताम्राद्यभावे सुर्वर्णम् औषध्यभावे सहदेवीं न्यसेत्। मधुपायसेन गर्त्तं विलिप्य शुक्लवस्त्रेणाच्छाद्य 'सुदर्शनाय हुं फट्' इति रक्षां विधाय (पञ्च कुण्डेषु मूलमन्त्रेण पलाशसमित्तिलाज्यमष्टाविंशति-सख्यया हुत्वा) ॐ मनोजूति० (तदस्तुमित्रा ० गृहावै ० प्रतिष्ठा-ऋग्वेद) इति पठित्वा प्रासादमभिषिच्य पुष्पांञ्जलिं दत्त्वा आचम्य प्रासादं पञ्चगव्येनाभ्युक्ष्य दर्भपिञ्जूलैः सम्मार्ज्यगुग्गुलादिरसैर्गर्तान् पूरयेत्।

**जलमादाय** - अनेन पिण्डिकाधिवासनकर्मणा सपरिवारः स्थाप्यदेवः प्रीयताम्।

## शब्दार्थाः

**वप्रः** - मृद भित्ति, **आयसः** - लोहप्रकारः, **त्रपु** - ताम्रम्, **उशीरः** - वीरणमूलम्, **अञ्जनः** - लेपः, **सौराष्ट्री** पीत्तलः धातुः, **गैरिक** गेरु ।

## स्वाध्यायः

**१. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) अस्माकं निर्मले हृदये ......... वसति। (ईश्वरः, अन्धकारः, प्रज्ञानम्)

(२) मन्त्रपूते ......... सगुणस्य ईश्वरस्य प्रतिष्ठा भवति। (भवने, पिण्डकायां, मन्दिरे)

(३) पञ्चरत्नादि यथा ......... स्थापयेत्। (वैभवम्, कालम्, बुद्धिः)

(४) सिंहासनोपरि ......... स्थापना भवेत्। (मृगस्य, रामस्य, प्रभोः)

(५) शास्त्रीयप्रमाणयुतम् ......... स्थापनम् कर्त्यव्यम्। (पिण्डिकायाः, जलस्य, ध्वजस्य)

(६) सवेभ्यः ......... प्राप्तिः सम्भवेत्। (सुखस्य, वैराग्यस्य, दुःखस्य)

(७) प्रथमो वप्रः ......... शिलाख्यः। (अनन्तः, कूर्मः, नागः)

(८) सुभिक्षम् ......... कुरु। (आरोग्यं, निर्विघ्नम्, सुखदम्)

(९) वायुमूर्त्यधिपतिः ......... वर्तते। (मारुतः, ईशानः, अम्बिका)

(१०) कूर्म द्वार ......... निधाय। (वामतः, दक्षिणतः, सम्मुखम्)

**२. निर्देशानुसारम् उत्तराणि लिखत।**

**(क) द्वित्रिवाक्यैः उत्तराणि लिखत।**

(१) पिण्डिकोर्ध्वप्रमाणम्

(२) अष्टमूर्तयः

**(ब ) टिप्पणी लेख्या**

(१) पिण्डिकास्थापनम्

(२) प्रतिष्ठा समो नास्ति रिपुः

**( ग ) मन्त्रपूर्तिं कार्या।**

(१) श्रीश्चते ..........

(२) ध्रुवासि ध्रुवोऽयं ..........

**( घ ) श्लोकपूर्तिं कार्या।**

(१) सर्वदेवमयी ..........

(२) यावच्चन्द्र ..........

**छात्रप्रवृत्तिः**

- छात्राः वास्तुशास्त्रानुसारं देवस्य पिण्डकास्थापनं ज्ञात्वा तस्य विशेषपत्रकनिर्माणं कुर्युः।

**अध्यापकप्रवृत्तिः**

- अध्यापकः पिण्डकाधिवासनमूहूर्तं ज्ञापयतु।

•

# १४ देवप्रबोधनम्-प्राणप्रतिष्ठा

**प्रस्तावना**

(प्रतिष्ठाकर्मणि-अयं विधिः महत्त्वपूर्णः वर्तते। मूर्तिषु प्राणप्रतिष्ठार्थं बीजमन्त्राणामुच्चारणं कृत्वा देवप्रबोधनं अर्थात् प्राणप्रतिष्ठा भवति। प्राणानां प्रतिष्ठा इति प्राणप्रतिष्ठा। प्रतिष्ठाकर्मणि भावः प्रधानम्। यथा देहे तथा देवे इति सूक्त्यनुसारं यथा अस्मत्सु प्राणाः सन्ति तथैव मूर्तिषु प्राणः भवेयुः। कथितमपि **न देवो विद्यते काष्ठे न पाषाणे न मृण्मये। भावेन विद्यते देवः तस्मादः भावो हि कारणम्॥** यजमानस्य भावेन पुनश्च मन्त्र-शक्त्या जडमूर्तिषु चेतनासंचारो भवति।)

---

नूतनः प्रासादश्चेत् संपातकलशजलमेकीकृत्य, जीर्णप्रासादसंस्कारे तु कलशे जलं प्रपूर्य। मूलमन्त्रेण शतमष्टवारं वाऽभिमन्त्र्य ॐ यतीर्थानि प्प्रचरन्ति सृका हस्ता निषङ्गिणः। तेषां ँ सहस्रयो जने वधन्वनित न्नमसि॥

**गङ्गासिन्धुसरस्वती च यमुना गोदावरी नर्मदा कावेरी सरयु महेन्द्रतनया चर्मण्वती वेदिका।**

**क्षिप्रा वेत्रवती महासुरनदी ख्याता गया गण्डकी पूर्णाः पूर्णजलैः समुद्रसहिताः कुर्यात्सदा मङ्गलम्॥**

इति मन्त्रेण सर्वतीर्थानि ध्यात्वा देव-आच्छादनं अपसार्य,

हस्ते जलमादाय तेन **प्रतिदैवतं ॐ नृसिंहाय हुं फट्** - इति मन्त्रेण देवशिरोऽभिषिञ्चेत्। तत् सर्षपानादाय।

**ॐ रक्षोहणंव्वलगहनं व्वैष्णावीमिदमहं तं व्वलगमुत्करामि यम्मे निष्ट्यो यममत्यो निचखानेदमहन्तं व्वलगमुत्किरामि यम्मे समानो यमसमानो निचखानेदमहन्तंव्वलगमुत्किरामि यम्मे सबन्धुर्यमसबन्धुर्निचखानेदमहन्तं वलगमुत्किरामि यम्मेसजातो यमसजातो निचखानोत्कृत्याङ्किरामि॥ इति मन्त्रेण** दिग्बन्धं कृत्वा शङ्खतूर्यादिनिनादेन देवं प्रबोधयेत्।

**पुष्पाण्यक्षतानादाय** -

**ॐ प्रबृध्यस्व महाभाग देवदेव जगत्पते। मेघश्याम गदापाणे प्रबुद्ध कमलेक्षण॥**

**ॐ उद्बुद्ध्यस्वाग्गनेप्प्रतिजागृहित्वमिष्टापूर्ते, सꣳसृजेथामयञ्च। अस्मिन्त्सधत्स्थेऽअद्ध्युत्तरस्मिन्न्विश्वेदेवायजमानश्चसीदत॥ (ॐ उत्तिष्ठ ब्ब्रह्मणस्प्पते देवयन्तस्त्वेमहे। उपप्रयन्तुमरूतः सुदानवऽइन्द्रप्प्राशूर्ब्भवासचा॥)** इति मन्त्रेण देवं प्रबोधयेत्। पात्रे पञ्चरत्नानि अङ्कुरितबीजानि पुष्पफलानि मधुघृतशर्करादि दुग्धपायसखाद्यादि देवाय निवेद्य **ॐ सहस्त्रशीर्षापुरुषः सहस्त्राक्षः सहस्रपात्। सभूमिꣳसर्व्वतस्प्पृत्त्वात्त्यतिष्ट्ठदशाङ्गुलम्॥** इति पुरुषसूक्तेन तत्तदेवतासूक्तेन मन्त्रेण वा देवं स्तुवीत। ततः शायितां प्रतिमां उत्थाप्य संशोध्य जलेन संस्थाप्य-अहतवासांसि परिध्याप्य गन्धाक्षतैः सम्पूजयेत्। ततः पात्रे तोयक्षीरकुशाग्रतिलतण्डुलयवसर्षपगन्धपुष्पपूगीफलादिकं निधाय देवाय उत्तरार्धं निवेदयेत्।

**ॐ धामन्तेव्विश्श्वमम्भुवनमधिश्श्रितमन्तः समुद्रेह्द्यन्तरायुषि। अपमामनीकेसमिथेयऽआभृतस्तमश्श्याममधुमन्तन्तऽऊर्म्मिम्॥**

ततः **ॐ रथेतिष्ट्ठन्नयतिव्वाजनः पुरोयत्रयत्रकामयतेसुषारथिः। अभीशुनाम्महिमानम्पनायतमनः पश्चादनुयच्छन्ति रश्म्मयः॥** इति मन्त्रेण रथे याने वा निवेश्य तूर्यधोषेण मङ्गलसूक्तैः पश्चिमद्वारेण बहिर्निर्गत्य प्रासादप्रादक्षिण्येन देवं प्रतिमां वा द्वारसम्मुखमानीय काष्ठपीठे देवं संस्थाप्य **ॐ धामन्ते** इत्युत्तरार्धं दत्वा द्वारदेवमध्येऽन्तःपटं धृत्वा मङ्गलपद्यानि पठेयुः। अन्तःपटं निःसार्य देवमुखे **ॐ मधुव्वाता**, इति मन्त्रेण मधुपर्कं दत्वा -

**' द्यौः शान्तिरन्त रिक्षꣳशान्तिः पृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः।**

**व्वनस्पतयःशान्तिर्व्विश्श्वेदेवाःशान्तिर्ब्रह्मशान्तिःसर्व्वꣳशान्तिःशान्तिरेवशान्तिःसामासान्तिरेधि॥**

इत्यादिमन्त्रैः देवं प्रतिमां च प्रासादं गर्भगृहं वा प्रवेश्य तत्तत्-स्थानसन्निधौ निवेश्य यावत् स्थिरीकरणं संरक्षेत्। पूर्वमात्मनि न्यासान् कुर्यात् -

१. ॐ ब्रह्मविष्णुरुद्रेभ्य ऋषिभ्यो नमः शिरसि।

२. ॐ ऋग्यजुःसामभ्यश्छन्दोभ्यो नमः मुखे।

३. ॐ क्रियामयवपुः प्राणाख्यायै देवतायै नमः हृदये।

४. ॐ आंबीजाय नमः गुह्ये। हस्तं प्रक्षाल्य।

५. ॐ ह्रीं शक्तये नमः पादयोः।

६. ॐ क्रों कीलकाय नमः सर्वाङ्गे। हस्तं प्रक्षाल्य। एवं देवे न्यासान् कुर्यात्।

विनियोगः अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्राऋषयः ऋग्यजुः सामानिच्छन्दांसि क्रियामयं वपुः प्राणाख्यादेवता आं बीजम् ह्रीं शक्तिः क्रों कीलकं प्रतिमायाः (प्रतिमासु) प्राणप्रतिष्ठायां विनियोगः। पूर्वमात्मनि न्यासान् कुर्यात्।

आत्मनि ततः परं देवे षडङ्गन्यासः

१. ॐ अं कं खं गं घं ङं आं पृथिव्यप्तेजोवाय्वाकाशात्मने अङ्गुष्ठाभ्यां नमः हृदयाय नमः।

२. ॐ इं चं छं जं झं ञं ईं शब्दस्पर्शरूपरसगन्धात्मने तर्जनीभ्यां नमः, शिरसे स्वाहा।

३. ॐ उं टं ठं डं ढं णं ऊं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने मध्यमाभ्यां नमः शिखायै वषट्।

४. ॐ एं तं थं दं धं नं एं वाक्पाणिपादपायूपस्थात्मने अनामिकाभ्यां नमः कवचाय हुम्।

५. ॐ ओं पं फं बं भं मं औं वचनादानगमनविसर्गानन्दात्मने कनिष्ठिकाभ्यां नमः, नेत्रत्रयाय वौषट्।

६. ॐ अं यं रं लं वं शं षं सं हं लं क्षं अः मनोबुद्ध्यहंकारात्मने करतलकरपृष्ठाभ्यां नमः, अस्त्राय फट्।

एवम् आत्मनि न्यासं कृत्वा हस्तं प्रक्षाल्य, एवमेव देवे न्यासान् कुर्यात्॥

एवम् आत्मनि देवे च षडङ्गन्यासान् कृत्वा देवस्य कपोलौ स्पृष्ट्वा वा हृदये आङ्गुष्ठं दत्वा प्राणप्रतिष्ठां कुर्यात्।

निश्चित-इष्टघटीलग्नशुद्धिमुहूर्तात् अर्धघण्टासमयात्पूर्वं शिल्पिभिः तासु तासु प्रतिमासु लेपादिना दृष्टिसाधनसमसूत्रत्वसमत्वस्थिरत्वादिना चलनयोग्यासु सम्यक् स्थिरीकृतासु आचार्य-यजमानश्चतुर्वेदज्ञैर्ब्राह्मणैः सह पूज्यसम्भारादिकं गृहीत्वा मन्दिरं प्रविशेत्।

प्रतिप्रतिमं समीपे ससम्भारमेकैकं ब्राह्मणमुपावेश्य प्राणप्रतिष्ठाविधिमारभेत। प्रतिमापिण्डिकान्तरे सुवर्णशलाकां दर्भशलाकां वा रक्षेत्। प्राणप्रतिष्ठासम्पन्नायां शलाकां निष्कासयेत्।

यजमानः प्राङ्मुख उदङ्मुखो वोपविश्य - आचमनं प्राणायामः। देवतानमस्कारादि।

**देवप्रबोधनम् - प्राणप्रतिष्ठा -**

**जलमादय** - विष्णु ॰ तिथौ समस्तग्रामजन-भक्तजन-देशजन-प्रतिनिधिभूतः अमुकशर्मा यजमानोऽहं मम सकुटुम्बस्य अस्मिन् ग्रामे नगरे देशे च वसतां भक्तजनानां द्विपदाञ्चतुष्पदाञ्च कर्मविपाकजन्यदुःखदारिद्र्यदौर्भाग्यग्रहपीडा-इति-भयादिसकलारिष्टनिवृत्तिपूर्वकं सकलसुखसौभाग्यक्षेमसुभिक्षधनधान्यैश्वर्यपुत्रपौत्रादिवंशाभिवृद्धि-ऐहिकपारलौकिक-अभ्युदय-निःश्रेयससंसिद्धये धर्मार्थकाममोक्षपुरूषार्थचतुष्टयप्राप्तये प्रासाद-प्रतिमा-सम्पादनकर्मणि साहाय्यकर्तॄणां समस्त-भक्तानां पूर्वजानां प्रासाद-प्रतिमाणुसंख्याकवर्षाणि यावद् उद्धारपूर्वकम् अमुकलोकप्राप्त्यर्थं सूर्याचन्द्रमसौ यावत् प्रतिमासु दिव्यदेवकलातेजोऽभिवृद्धये अमुकदेवताप्रीत्यर्थं-अमुकामुकदेवतानाम् अचलप्राणप्रतिष्ठां करिष्ये।

जलमादाय - तत्रादौ गणेशस्मरणं करिष्ये।

**ॐ गणानान्त्वा गणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधिनान्त्वानधिपतꣳहवामहेव्वसोमम॥**

**आहमजानि गर्ब्भधमात्त्वमजासिमर्ब्भधम्॥ नमस्कारोमि।**

**पुनर्जलमादाय** - अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ऋग्यजुः सामानि च्छन्दांसि, क्रियामयं वपुः प्राणख्या देवता, आं बीजं ह्रीं शक्तिः क्रों कीलकम्, प्रतिमायां (प्रतिमासु) प्राणप्रतिष्ठायां विनियोगः।

ॐ आं ह्रीं क्रों यं रं वं लं वं शं षं सं हं लं क्षं हं सः ॐ आं ह्रीं क्रों अमुकदेवस्य अमुकदेव्याः प्राणा इह प्राणाः।

ॐ आं ह्रीं क्रों यं रं वं लं वं शं षं सं हं लं क्षं हं सः ॐ आं ह्रीं क्रों अमुकदेवस्य अमुकदेव्याः जीव इह स्थित।

ॐ आं ह्रीं क्रों यं रं वं लं वं शं षं सं हं लं क्षं हं सः ॐ आं ह्रीं क्रों अमुकदेवस्य अमुकदेव्याः सर्वेन्द्रियाणि।

ॐ आं ह्रीं क्रों यं रं वं लं वं शं षं सं हं लं क्षं हं सः ॐ आं ह्रीं क्रों अमुकदेवस्य अमुकदेव्याः वाङ्मनश्चक्षुः श्रोत्रत्वग्जिह्वाघ्राणवाक्पाणिपादपायूपस्थप्राणाः - इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा॥

ॐ अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।

अस्यै देवत्वमर्चायै मामहेति च कश्चन॥

ॐ इति प्रणवेन संरूध्य एवं सजीवं ध्यात्वा प्रतिष्ठामन्त्रान् पठेत्।

ऋग्वेद - ॐ तदम्तु मित्रावरूणा तदग्ने शंयोरस्मभ्यमिदमस्तुशस्तम्।

अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय। (५/४७/७)

कृष्णयजुः - ॐ गृहा वै प्रतिष्ठासूक्तं तत्प्रतिष्ठिततमया वाचाशंस्तव्यं तस्माद्यद्यपि दूर इव पशूँल्लभते गृहानेवैनानाजिग मिषतिग्रहाहि पशूनां प्रतिष्ठा प्रतिष्ठा॥

शुक्लयजुर्वेदे - ॐ मनोजूतिर्ज्जुषतामाज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टँय्यज्ञꣳसमिमन्दधातु।

व्विश्वेदेवासऽइहमादयन्तामोꣳम्प्रतष्ठ॥ ब्राह्मणम् - मनोजूतिर्जुषतामाज्यस्येति मनसा वाऽइद ꣳ सर्व्वमाप्तन्तन्मनसैवैतत् संदधाति बृहस्पतिर्य्यज्ञमिमन्तनो त्वरिष्टँ य्यज्ञ ꣳ समिमन्दधात्विति यद्विवृढं तत्सन्दधाति विश्वेदेवासऽइह मादयन्तामिति सर्वं वै विश्वे देवाः सर्वेणैवैतत्सन्दधाति स यदि कामयेत ब्रूयात् प्रतिष्ठेति॥

एष वै प्रभुर्नाभ यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रभूतं भवति।

एष वै विभुर्नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव व्विभूतं भवति।

एष वै व्यष्टिर्नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव व्यष्टं भवति।

एष वै विधृतिर्नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव विधृतं भवति।

एष वै व्यावृतिर्नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव व्यावृतं भवति।

एष वाऽऊर्जस्वान्नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेवोर्जस्वद् भवति।

एष वै पयस्वान्नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव पयस्वद्धवति।

एष वै ब्रह्मवर्चसी नाम यज्ञो यत्रैतेन यज्ञेन यजन्तऽआब्राह्मणो ब्रह्मवर्चसी जीयते।

एष वा ऽ अतिव्याधी नाम यज्ञो यत्रैतेन यज्ञेन यजन्तऽआराजन्योऽतिव्याधी जायते॥

एष वै दीर्घो नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते यजन्तऽआदीर्घारण्यञ्जायते।

एष वै क्लृप्तिर्नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव क्लृप्तं भवति।

एष वै प्रतिष्ठानाम नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेवप्रतिष्ठितं भवति।

**ॐ ध्रुवाऽसि। ध्रुवोऽयँय्यजमानोऽस्मिन्नायतनेप्प्रजया पशुभिर्ब्भूयात्।**

**घृतेनद्यावापृथिवीपूर्य्येथामिन्द्रस्यच्छदिरसिव्विश्वजनस्यच्छाया॥**

**सुप्रतिष्ठो भव। सुखदो भव। वरदो भव। शाश्वतो भव।**

इति जप्त्वा देवस्य दक्षिणकर्णे तन्मूलमन्त्रं गायत्रीञ्च पठित्वा पुरुषसूक्तेन तत्तद्देवतासूक्तेन वा देवं ध्यात्वा पादनाभिशिरांसि स्पृष्टवा।

**ॐ आत्त्वा। हार्षमन्तरभूर्ध्रुवस्तिष्ठा विचाचलिः।**

**व्विशस्त्वासर्व्वाव्वाञ्छन्तुमात्त्वद्राष्ट्रमधिब्भ्रशत्॥**

इति मन्त्रं त्रिर्जप्त्वा जलमादाय आसां देवतानां गर्भाधानादिषोडशसंस्कारसिद्धये (प्रतिसंस्कारमष्टाष्टसंख्या समस्तव्याहृतिहोमपूर्वकं) प्रणवावृत्तिं करिष्ये ॐ इति प्रणवं षोडशवारम् उच्चरेत्। ततो देवं प्रार्थयेत्।

**ॐ नमस्तेऽअस्त्वसङ्गाय सन्तोषपरमात्मने। गुणातिक्रान्तरूपाय पुरुषाय महात्मने॥**

**सरलार्थः** - सन्तोषस्वरूप गुणान् अनिक्रन्तरूपाय रूपाय परमषुरूषाय महात्मने ते नमः।

अव्यक्ताव्यक्तरूपाय देवसन्निहितो भव। भगवन् देवदेवेश त्वं माता सर्वदेहिनाम्॥

**सरलार्थः** - यः भगवान् अव्यवतस्वरूपः साक्षाद्देवस्वरूपः देवैः सन्निधौ स्थितः, तादृशाय परमात्मने मातृस्वरूपाय ते नमः।

**त्वया व्याप्तमिदं सर्वं जगत् स्थावरजङ्गमम्। त्वमिन्द्रः पावकश्चैव यमो निर्ऋतिरेव च॥**

**सरलार्थः** हे ईश्वर ! इदं विद्गं त्वया व्यापतं अस्ति इंद जगत् च्च स्थावपजङ्गमं सर्वमपि निर्ऋतिरूपं अस्ति त्वमेव वैश्वानरः।

**वरूणोमारुतः सोम ईशानः प्रभुरव्यः। येन रूपेण भगवँस्त्वया व्याप्तं चराचरम्॥**

सरलार्थः प्रामुख्येन वरुण, मरूत् सोम-ईशानदि प्रमुखाः देवाः येन माध्यमेन कल्याणं भवति।

तेन रूपेण देवेश अर्चायां संहितो भव॥

**सर्वमन्त्रादिसंयुक्तं लोकानुग्रहकाम्यया। त्वमर्चायां महादेव भव सन्निधिमान् सदा॥**

**सूर्याचन्द्रामसौ यावत् यावत्तिष्ठति मेदिनी। तावत् त्वयाऽत्र देवेश स्थातव्यं स्वेच्छया प्रभो॥**

ततः सम्भृतसकल सम्भारो यजमानो ब्राह्मणाश्च प्रतिदैवतसमीपमुपविश्य देवतानां महापूजनं कुर्युः। अभिषेककाले शान्तिकलशैः सम्पातोदककलशैश्चाभिषेकं प्रोक्षणं वा कुर्युः।

## शब्दार्थाः

**अन्तःपटम्** - वस्त्रम्, **सम्भारः** - आवश्यकवस्तूनि, **शलाका** - अतिलघुदण्डः, **ईतिः** - अतिवृष्टयादिषट्दुःषानि, **मेदिनी** - पृथिवी, **प्रोक्षणं** - मार्जनम्, **देवप्रबोधनम्** - प्राणप्रतिष्ठा, **प्राङ्मुखः** - पूर्वाभिमुखः, **शलाका** - अञ्जनसहायिका।

## स्वाध्यायः

**१. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) 'देवप्रबोधनम्' अस्यार्थः ......... भवति। (प्राणप्रतिभा, प्राणप्रतिष्ठा, प्राणप्रसाद)

(२) दिग्बन्धनार्थं ......... मन्त्रस्योच्चारणं भवति। (त्र्यम्बकंयजा, रक्षोहणं, स्वस्ति न इन्द्रो)

(३) ॐ ऋग्युजुः सामभ्यश्छन्दोभ्यो नमः इति ..........। (मुखे, गुह्ये, सर्वाङ्गे)

(४) यजुर्वेदे प्रतिष्ठार्थं ......... मन्त्रस्योपयोगो भवति। (अग्निन्नदूतं, मनोजूर्तिर्जुषता, गुहा वै प्रतिष्ठा)

(५) मूर्तिषु ......... संस्काराः भवन्ति। (१४, १५, १६)

**२. निम्नलिखितप्रश्नानाम् एकवाक्येन उत्तरं लिखत।**

(१) तर्जन्योः न्यासमन्त्रः कः ?

(२) नेत्रत्रयाणां न्यासमन्त्रं लिखत।

(३) प्राणप्रतिष्ठा शब्दस्य कोऽर्थः ?

(४) देवाय मधुपर्कः केन मन्त्रेण दीयते ?

(५) ' अं कं खं गं धं ङं आं इति ......... कस्मिन् अङ्गे न्यासो भवति ?

(६) प्राणप्रतिष्ठार्थं कस्य पदार्थस्य शलाकायाः उपयोगो भवति ?

**३. निम्नलिखितप्रश्नानां सविस्तरम् उत्तरं लिखत।**

(१) विनियोगसहिता प्राणप्रतिष्ठाविधिः।

(२) प्रतिष्ठान्ते के प्रार्थनार्थं श्लोकाः ? तान् लिखत।

**४. निम्नलिखितश्लोकानां पूर्तिं कुरुत।**

(१) ॐ अस्यै प्राणा.........।

(२) नमस्तेऽस्त्वसङ्गाय.........।

(३) सूर्याचन्द्रमसौ यावत्.........।

**५. निम्नलिखितमन्त्राणां पूर्तिं कुरुत।**

(१) ॐ एष वै प्रभुर्नाम.........।

(२) ॐ एष वै दीर्घो नाम.........।

(३) ॐ उद्बुद्ध्यस्वाग्ने.........।

**छात्रप्रवृत्तिः**

- छात्राः बीजमन्त्रस्य संपूर्णप्रतिष्ठाविधेः कण्ठस्थी कुर्युः॥

**अध्यापकप्रवृत्तिः**

- अध्यापकः छात्रान् प्रतिष्ठा कर्मणि नयेत्।

•

# १५ समावर्तनसंस्कारप्रयोगः

**प्रस्तावना**

समावर्तते गुरुकुलाद् अनेन इति समावर्तनम्। बहुवर्षं यावत् शिष्यः गुरोः आश्रमे अध्ययनं समाप्य पुनः स्वगृहं आगच्छति तस्मिन् समये जायमानः संस्कारः समावर्तनसंस्कारः। समावर्तनम् इति प्रत्यागमनम् अर्थात् स्वगृहे प्रत्यावर्तनम्।

**आहरिष्यामि किं तेऽर्थं स्नायीत तदनुज्ञया।**
**वेदं व्रतानि वा पारं नीत्वा ह्युभय मेव वा॥** (याज्ञयल्क्यः)

अनेन संस्कारेण शिष्यः दीक्षितो भवति। गुरुः स्व शिष्याय जीवन शिक्षणं अपि प्रददाति। यथा मातृदेवो भव। पितृदेवो भव। आचार्य देवो भव। अतिथिदेवो भव। इति।

---

आचम्य प्राणानायम्य सुमुखश्चैकेत्यादि पठित्वा। संकल्पः अद्येत्यादि० अस्य ब्रह्मचारिणः पश्चाद् गृहस्थाश्रमप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं समावर्तनाख्यं कर्म करिष्ये। तदङ्गत्वेन गणपतेः पंचोपचारैः पूजनमहं

करिष्ये। इति संकल्प्य ''श्रीमन्महागणाधिपतये नमः'' इति गणपतिं पूजयेत्।

ततः ''भो आचार्य अहं स्नास्यामि?'' इति ब्रह्मचारिणः प्रश्नः॥ ''स्नाहीति'' गुरुः।



पूर्ववदुपसंगृह्य गुरुम्। ततः परिश्रिते पञ्चभूसंस्कारपूर्वकं सूर्यनामानमग्निं प्रतिष्ठाप्य ततो दक्षिणतो ब्रह्मासनमास्तीर्येत्यादि चरुवर्जं पात्रासादनान्तं कुर्यात्। तत्र विशेषः -पात्रासादनानन्तरम् उपकल्पनीयानि संधुक्षणानि। पर्युक्षणार्थमुदकम्। तिस्रः समिधः। हरिताः कुशाः। अष्टौ वारिकुम्भाः। दधि तिला वा। धौतवस्त्रम्। नापितः। स्नानार्थमुदकम्। औदुम्बरं कनिष्ठिकाग्रवत्स्थूलं द्वादशाङ्गुलदीर्धं सरलं सत्वचं दन्तधावनकाष्ठं

ब्राह्मणस्य। (दशाङ्गुलं राजन्यस्य। अष्टाङ्गुलं वैश्यस्य) उद्वर्तनद्रव्यम्। स्नानार्थमुष्णोदकम्। चंदनम्। अहते वाससी। यज्ञोपवीते द्वे त्रीणि वा। पुष्पाणि। उष्णिग्। कर्णालंकारौ। अञ्जनम्। आदर्शः। छत्रम्। उपानहौ। वैणवदंडः। ततः पवित्रच्छेदनादिपर्युक्षणान्तं कृत्वा आघारावाज्यभागौ च जुहुयात्। ब्रह्मान्वारब्धः स्रुवेण होमः।

(मनसा) (ॐ प्रजापतये) स्वाहा इदं प्रजापतये न मम। ॐ इन्द्राय स्वाहा इदमिन्द्राय न मम।

ॐ अग्नये स्वाहा इदमग्नये न मम। ॐ सोमाय स्वाहा इदं सोमाय न मम। हस्ते गन्धाक्षतपुष्पाण्यादाय व्रतविसर्गे सूर्याग्ने वैश्वानराय नमः गन्धाक्षतपुष्पाणि समर्पयामि इति सम्पूज्य होमं कुर्यात्॥

**अथ वेदाहुतिः** (ऋ०)

ॐ अंतरिक्षाय स्वाहा इदम् अंतरिक्षाय न मम। ॐ वायवे स्वाहा इदं वायवे न मम।

ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम। ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम।

**(यजुर्वेदः)** ॐ पृथिव्यै स्वाहा इदं पृथिव्यै न मम। ॐ अग्नये स्वाहा इदग्नये न मम। ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम। ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम।

**(सामवेदः)** ॐ दिवे स्वाहा इदं दिवे न मम। ॐ सूर्याय स्वाहा इदं सूर्याय न मम। ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम। ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम।

**( अथर्वेद: )** ॐ दिग्भय: स्वाहा इदं दिग्भ्यो न मम। ॐ चन्द्रमसे स्वाहा इदं चन्द्रमसे न मम। ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम। ॐ छन्दोभ्य: स्वाहा इदं छन्दोभ्यो न मम। ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम। ॐ देवेभ्य स्वाहा इदं देवेभ्यो न मम। ॐ ऋषिभ्य: स्वाहा इदम् ऋषिभ्यो न मम। ॐ श्रद्धायै स्वाहा इदं श्रद्धायै न मम। ॐ मेधायै स्वाहा इदं मेधायै न मम। ॐ सदसस्पतये स्वाहा इदं सदसस्पतये न मम। ॐ अनुमतये स्वाहा इदमनुमतये न मम॥ २३॥

**( ततो नवाहुतय: )**

(१) ॐ भू:स्वाहा इदमग्नये न मम। (२) ॐ भुव: स्वाहा इदं वायवे न मम। (३) ॐ स्व: स्वाहा इदं सूर्याय न मम। ॐत्वं नो अग्न वरुणस्य विद्वान् देवस्य हेडो अव यासिसीष्ठा: वजिष्ठो वह्नितम: शोशुचानो विश्वा द्वेषा ँ सि प्र मुमुग्ध्यस्मत् स्वाहा इदमग्नीवरुणाभ्यां न मम।

(४) ॐ स त्वं नो अग्नेऽवमो भवोतीनेजिष्ठो अस्या उषसो व्युष्टौ। अव यक्ष्व नो वरुण ँ रराणो वीहि मृडीक ङ्सुहवो न एधि स्वाहा इदमग्नीवरुणाभ्यां न मम।

(५) ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमया ऽ असि। अयानो यज्ञं वहास्ययानो धेहि भेषज स्वाहा इदमग्नये अयसे न मम।

(६) ॐ ये ते शतं वरुण ये सहस्रं यज्ञिया: पाशावितता महान्त:। तेभिर्नों अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुत: स्वर्का: स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य: स्वर्केभ्यश्च न मम।

(७) **ॐ उदुत्तमं वरुण पाशमस्मदवा धमं विमध्यम ँ श्रथाय। अथोवयमादित्यव्रते तवानागसो ऽ अदितये स्याम॥** स्वाहा इदं वरुणायादित्यायादितये च न मम।

(८) ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम

(९) **ॐ अग्नये स्विष्टकृते स्वाहा** इदमग्नये स्विष्टकृते न मम।

संस्रवप्राशनम्। पवित्राभ्यां मार्जनम्। अग्नौ पवित्रप्रतिपत्ति:। ब्रह्मणे पूर्णपात्रदानम् **संकल्प:** -कृतस्य समावर्तनाख्यस्य कर्मण: साङ्गतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं संप्रददे। एवमाचार्याय। पश्चिमे प्रणीताविमोक:। ॐ आप:शिवा:० भेषजम्। अत्र पूर्ववदग्ने: सन्धुक्षणं पञ्चभिर्मन्त्रैरिन्धनप्रक्षेपेण। तद्यथा पाणिनाऽग्निं परिसमूहति। **संकल्प:** -(अग्ने सुश्रवादीनां ब्रह्मा ऋषि: यजुश्छन्द: अग्निर्देवता समिन्धने विनियोग:)। ॐ अग्नेसुश्रव:सुश्रवसंमाकुरु।

**ॐ यथात्वमग्नेसुश्रव:सुश्रवाऽअसि। ॐ एवंमा ँ सुश्रव:सौश्रवसंकुरु।**

**ॐ यथात्वमग्नेदेवानां यज्ञस्यनिधियाऽअसि। ॐ एवमहं मनुष्याणां वेदस्यनिधिपोभूयासम्।**

प्रदक्षिणमग्निमुदकेन पर्युक्ष्योत्थाय समिधमादधाति। **संकल्प:** -(अग्ने समिधमिति प्रजापतिर्ऋषि: आकृतिश्छन्द: सविता देवता समिदाधाने विनियोग:)।

**ॐ अग्ने समिधमाहार्षंबृहतेजातवेदसे। यथात्वमग्नेसमिधा**

**समिध्यसऽएवमहमायुषामेधयावर्च्चसाप्रजयापशुभिर्ब्रह्मवर्चसेन**

**समिन्धेजीवपुत्रो-ममाचार्योमेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी**

**तेजस्वीब्रह्मवर्चस्यन्नादोभूयास ँ स्वाहा।** एवं द्वितीयां तृतीयां च। (मन्त्रसमुच्चयो वा) पूर्ववत्परिसमूहनम्। तत उपविश्य पुन: पंचभिर्मन्त्रैरग्ने: संधुक्षणं पूर्ववत्।

ॐ अग्नेसुश्रव:सुश्रवसंमाकुरु। ॐ यथात्वमग्नेसुश्रव:सुश्रवाऽअसि।

ॐ एवंमा꣡ सुश्रव:सौश्रवसंकुरु। ॐ यथात्वमग्नेदेवानां यज्ञस्य निधिपाऽअसि। ॐ एवमहंमनुष्याणां वेदस्यनिधिपोभूयासम्। अग्ने: पर्युक्षणम्। पाणी प्रतप्य मुखं विमृष्टयेत्। यथा- ॐतनूपाऽअग्ग्नेसितन्व म्मेपाहि। ॐ आयुर्दाऽअग्ग्नेसि आयुर्म्मेदेहि। ॐ वर्च्चोदा अग्ग्नेसिवर्च्चोमेदेहि। ॐ अग्ग्नेजन्मेतन्वाऽउनन्तन्मऽआपृण। ॐ मेधाम्मेदेव:सविताऽआदधातु। ॐ मेधाम्मेदेवीसरस्वतीऽआदधातु। ॐ मेधामश्विनौदेवावाधत्तांपुष्करस्त्रजौ। (शिष्टाचारात् अङ्गन्यालभ्य जपति।) ॐ अङ्गानि च आप्यायतामिति शिर:प्रभृति पादान्त सर्वाङ्गान्यालभते। ॐ वाक्चमऽआप्यायताम् (मुखस्यालंभनम्)। ॐ प्राणश्चमऽआप्यायताम् (नासिकयोरालंभनम्)। ॐ चक्षुश्चमऽआप्यायताम् (नेत्रयोरालंभनंयुगपत्)। ॐ श्रोत्रंचमऽआप्यायताम्। (दक्षिणश्रोत्रस्यालंभनम् अनेनैव मंत्रेण वामश्रोत्रस्य)। ॐ यशो बलं चमऽआप्यायताम् (इति ब्रह्मोरुपस्पर्शनम्)। ततस्त्र्यायुषकरणम्। अनामिकया अग्नेर्भस्म गृहीत्वा। **संकल्प:** -(त्र्यायुषमिति नारायण ऋषि: उष्णिक् छन्द: अग्निर्देवता भस्मना तिलकधारणे विनियोग:) ॐ त्र्यायुषञ्जमदग्नेरिति ललाटे। ॐ कश्यपल्यत्र्यायुषमिति ग्रीवायाम्। ॐ यद्देवेषु त्र्यायुषम् इति दक्षिणांसे वामांसे च। ॐ तन्नोऽअस्तुत्र्यायुषम् इति हृदि। ततो ब्रह्मचारी दक्षिणश्रोत्रे समौ करौ कृत्वा गोत्रनामपूर्वकंवैश्वानरादीनामभिवादनं कुर्यात्। अमुकगोत्र: अमुकप्रवरान्वित: अमुकशर्माऽहं भोवैश्वानर त्वामभिवादयामि। आयुष्मान्भव सौम्य। भो गुरो त्वामभिवादयामि। आयुष्मान्भव: सौम्य। भो आचार्य त्वामभिवादयामि। आयुष्मान्भव सौम्य। भो मातापितरौ युवामभिवादयामि। आयुष्मान्भव सौम्य। भो सूर्याचन्द्रमसौ युवामभिवादयामि। आयुष्मान्भव सौम्य। सर्वान्ब्राह्मणान् अभिवादयामि। आयुष्मान्भव सौम्य। (सर्वान्ब्राह्मणान् अभिवादयामि) तत: आचार्य:।

परिश्रितस्योत्तरत: भूरसी त्यादिना क्रमेण अष्टानामुदकुम्भानां दक्षिणोत्तरागतानां स्थापनं कुर्यात्॥

**ॐ भूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री।**

**पृथिवींय्यच्छप्पृथिवीन्द्र꣡हपृथिवीम्माहि꣡सी:॥ इति भूमिं स्पृष्टा॥१॥**

**ॐ धान्यमसिधिनुहि देवान्प्राणायत्वोदानायत्वाव्यानायत्वा। दीर्ग्घामनुप्प्रसितिमायुषे धन्देवोव: सविताहिरण्यपाणि: प्रतिगृब्भ्णात्वच्छिद्रेणपाणिनाचक्षुषेत्वामहीनाम्पयोसि॥ इति यवन्निक्षिप्य॥२॥**

**ॐ आजिग्घ्रकलशम्मह्यात्त्वाविशन्त्विन्दव:। पुनरुर्ज्जानिवर्त्तस्वसान: सहस्त्रन्धुक्ष्वोरुधारापयस्वीतपुनर्म्माविशताद्रयि:॥ इति कुभं संस्थाप्य॥३॥**

**ॐव्वरुणस्योत्तम्भनमसिव्वरुणस्यस्कम्भसर्ज्जनीस्थोव्वरुणस्यऽऋतसदन्यसिव्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमासीद॥ इति जलं प्रयूर्य॥४॥**

**ॐ त्वाङ्गन्धर्वाऽअखनंस्त्वामिन्द्रस्त्वाम्बृहस्पति:। त्वामोषधेसोमोराजाविद्वान्यक्ष्माद मुच्यत॥ इति गन्धम्॥५॥**

**ॐ बाडओषधी: पूर्व्वाजातादेवेब्भ्यस्त्रियुगम्पुरा। मनैनुबब्भ्रूणामह꣡ शतन्धामानिसप्तच॥ इति सर्वोषधी:॥६॥**

**ॐ काण्डात्काण्डात्प्ररोहन्तीपरुष:परुषस्परि। एवानोदूर्व्वेप्प्रतनुसहस्रेणशतेन च॥ इति दूर्वा:॥७॥**

**ॐ अश्वत्थेवोनिषदनंपर्ण्णेवोव्वसतिष्कृता। गोभाजऽइत्किलासथयत्सनवथपूरुषम्॥ इति पंचपल्लवान्॥८॥**

**ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी। यच्छान: शर्म्मासप्प्रथा:॥ इति सप्त मृद:॥९॥**

**ॐ या फलिनीर्य्याऽअफलाऽअपुष्पायाश्चपुष्पिणी:। बृहस्प्पतिप्प्रसूतास्तानोमुञ्चन्त्व꣡हस:॥ इति मृगीफलम्॥१०॥**

**ॐ परिवाजपतिः कविरग्ग्निर्हव्व्यान्यक्रमीत्। दधद्रत्नांनिदाशुषे॥ इति पतरत्नानि॥११॥**

**ॐ हिरण्यगर्ब्भः समवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआसीत्। सदाधारप्पृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाव्विधेम॥ इति हिरण्यं च क्षिप्त्वा॥१२॥**

**ॐ व्वसोःपवित्रमसिशतधारंव्वसोःपवित्रमसिसहस्त्रेधारम्।**

**देवस्त्वासवितापुनातुव्वसोःपवित्रेणसतधारेणासुप्वाकामधुक्षः॥ इति सक्तवस्त्रेणावेष्टय॥१३॥**

**ॐ पूर्ण्णादेव्विपरापतसुपूर्ण्णापुनरापत। व्वस्नेव्विक्क्रीणांवहाऽइषमूर्ज्जꣳशतक्क्रतो॥ इति तण्डुलपूर्णपात्रं निधाय॥ १४॥**

**ॐ तत्त्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्ते यजमानोहविर्ब्भिः।**

**अहेडमानोव्वरुणेहबोद्ध्युरुशꣳसमानऽआयुःप्प्रमोषीः॥ इति वरुणमावाह्य संपूज्य॥१५॥**

**कलशस्य मुखे विष्णुरित्यभिमंत्र्य। देवदानवसंवादे मथ्यमाने महोदधौ। उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम्॥१६॥**

**ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्प्पतिर्य्यज्ञमिमन्तनोत्त्वरष्ट्टंप्यज्ञꣳसमिमन्दधातु।**

**व्विश्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठा॥१७॥**

उदकुम्माधिष्ठातृदेवताः सुप्रतिष्ठिता वरदा भवेयुः॥ उदकुम्भाधिष्ठातृदेवताभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि॥

इति गन्धादिपञ्चोपचापैः पूजनं कर्यात्। तत उदकुम्भानां पुरस्तात्प्रागग्रकुशास्तरणम्। तेषु स्नानकर्ता उदङ्मुखः स्थित्वा स्वयं च दक्षिणकलशादारभ्य प्रथमकलशात्।

**ॐ येऽअप्स्वन्तरग्नयः प्रविष्टागोह्यऽउपगोह्योमयूषोमनोहास्खलोविरुजस्तनृदूषुरिंद्रियहातान्विजहामि यो रोचनस्तमि गृह्णामि।** इति मंत्रेण प्रथमकलशादुदकं गृहीत्वा तेनोदकेन।

ॐ तेनमामभिषिञ्चामिश्रियैयशसेब्रह्मणेब्रम्मवर्चसाय। इति मन्त्रेण स्वस्य मस्तकेऽभिषिञ्चेत्॥

**ॐ येऽअप्स्वन्तरग्नयः प्रविष्टागोह्यऽउपगोह्योमयूषोमनोहास्खलोविरुजस्तनृदूषुरिंद्रियहातान्विजहामि यो रोचनस्तमिह गृह्णामि।** इति मंत्रेण द्वितियदकुंभादुदकं गृहीत्वा।

**ॐ येनश्रियमकृणुतांयेनावमृशतामꣳसुराम्। येनाक्ष्यावभ्यषिंतांयद्वातदश्विनायशः॥** इति मन्त्रेणाभिषिंचेत्॥

**ॐ येऽअप्स्वन्तरग्नयः प्रविष्टागोह्यऽउपगोह्योमयूषोमनोहास्खलोविरुजस्तनृदूषुरिंद्रियहातान्विजहामि यो रोचनस्तमिह गृह्णामि।** इत्यनेन तृतीयोदकुंभादुदकमादाय।

**ॐ आपो हिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन। महेरणायचक्षसे॥** इति मंत्रेणाभिषिंचेत्।

**ॐ येऽअप्स्वन्तरग्नयः प्रविष्टागोह्यऽउपगोह्योमयूषोमनोहास्खलोविरुजस्तनृदूषुरिंद्रियहातान्विजहामि यो रोचनस्तमिह गृह्णामि।** इत्यनेन चर्तुथोदकुंभादुदकमादाय।

**ॐ योवः शिवतमोरसस्तस्यभाजयतेहनः। उशतीरिवमातरः॥** इति मंत्रेणाभिषिंचेत्।

**ॐ येऽअप्स्वन्तरग्नयः प्रविष्टागोह्यऽउपगोह्योमयूषोमनोहास्खलोविरुजस्तनृदूषुरिंद्रियहातान्विजहामि यो रोचनस्तमिह गृह्णामि।** इत्यनेन पञ्चमोदकुंभादुदकमादाय।

**ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ। आपोजनयथाचनः॥** इति मंत्रेणाभिषिंचेत्

**ॐ येऽअप्स्वन्तरग्नयः प्रविष्टागोह्यऽउपगोह्योमयूषोमनोहास्खलोविरुजस्तनृदूषुरिंद्रियहातान्विजहामि यो रोचनस्तमिह गृह्णामि।** इत्यनेन मंत्रेण षष्ठसप्तमाष्टमोदकुंभेभ्यः उदकमादाय तूर्ष्णी वारत्रयाभिषिञ्चेत्

स्नानकर्ताऽऽत्मानम्।

तत उदुत्तममिति शिरोमार्गेण मेखलान्मुमुच्य। (उदुत्तममिति शुनःशेप ऋषिः त्रिष्टुप्छन्दः वरुणो देवता मेखलोन्मोचने विनियोगः)।

**ॐ उदुत्तमंव्वरुणपाशमस्मदवाधमंव्विमद्ध्यम**ँ**श्रथाय। अथाव्व**

**यमादित्त्यव्व्रतेतवानागसोऽअदितये स्याम॥** तूष्णीं दंडं निधाय अजिनं च तुष्णीं निधाय स्नानकर्ता आदित्यमुपतिष्ठते ऊर्ध्वबाहू कृत्वा॥

**ॐउद्यन्भ्राजभृष्णुरिन्द्रोमरुद्भिरस्थात्प्रातर्यावभिरस्थाद्दशसनिरसिदशसनिमाकुर्वाविदन्मागमयोद्यन्भ्राजभृष्णुरिन्द्रोमरु-द्भिरस्थाद्दिवायावभिरस्थाच्छतसनिरसिशतसनिंमाकुर्वाविदन्मागमयोद्यन्भ्राजभृष्णुरिन्द्रो-मरुद्भिरस्थात्सायंयावभिरस्थात्सहस्रसनिरसिसहस्रसनिंमाकुवाविदन्मागमयेति॥** तत स्तूष्णीं दधि तिलान्वा प्राश्य॥ आचम्य॥ औदुम्बरेण काष्ठेन दन्तान् धावयेत्॥ (अन्नाद्येति मन्त्रस्य अथर्वण ऋषिः अनुष्टुप्छन्दः सोमो देवता दन्तधावने विनियोगः)॥ **ॐ अन्नाद्यायव्यूहध्वꣳसोमोराजायमागमत्॥ समेमुखंप्रमाक्ष्यते यशसा च भगेन च॥** इति॥ तत उदकेन मुखशोधनम्॥ ततः पुनः उष्णोदकेन स्नानम्॥ गन्धेन अनुलेपनं भाले॥ चन्दनाद्यनुलेपनं हस्ते गृहीत्वा॥ नासिकयोर्मुखे चोपगृह्णीयात्॥ (प्राणापानौ मेति मंत्रस्य प्रजापतिर्ऋषिः यजुश्छंदः प्राणापानौ देवते चन्दनोपग्रहणे विनियोगः)॥ ॐ प्राणापानौ मे तर्पय॥ ॐ चक्षुर्म्मे तर्पय॥ ॐ श्रोत्रम्मे तर्पय॥ ततः पाण्योरवनेजनं कृत्वा तदुदकमादाय॥ अपसव्यं कृत्वा॥ दक्षिणाभिमुखो भूत्वा तदुदकं दक्षिणस्यां दिशि निनयेत् यथा-(ॐ पितरः शुन्धध्वमिति प्रजापतिर्ऋषिः यजुश्छन्दः अश्वीन्द्रासरस्वतीदेवताः पाण्यावनेजनस्य दक्षिणस्यां दिशि निषेके विनियोगः) ॐ पितरः शुन्धध्वमिति पितरःशुन्धध्वम्॥ सव्यम्॥ उदकस्पर्शः॥ ततश्चन्दनादिना आत्मानमनुलिप्य जपेत्॥ (सुचक्षा इति मंत्रस्य प्रजापतिर्ऋषिः यजुश्छन्दः आशीर्देवता जपे विनियोगः)॥ **ॐ सुचक्षा अहमक्षीभ्यांमूयासꣳसुवर्चामुखेन॥ सुश्रुत्कर्णाभ्यां भूयासम्॥** ततः अहतं वासो घौतंवा ''परिधास्यै'' इति मन्त्रेण परिधायात्॥ (परिधास्य इति मन्त्रस्य आलम्बायन ऋषिः पंक्तिश्छन्दः वासौ देवता वस्त्रपरिधाने विनियोगः॥) **ॐ परिधास्यैयशोधास्यै दीर्धायुत्वाजरदष्टिरस्मि॥ शतं च जीवामिशरदःपुरूचीरायस्पोषमभि संख्ययिष्ये॥** इति वासः परिधाय॥ आचमनं कृत्वा॥ ततः पूर्ववत् यज्ञोपवीतधारणं कुर्यात्॥ यथा - (यज्ञोपवीतमितिमन्त्रस्य प्रजापतिर्ऋषिः यजुश्छन्दः लिङ्गोक्ता देवता यज्ञोपवीतधारणे विनियोगः॥)

**यज्ञोपवीतंपरमंपवित्रप्रजापतेर्यत्सहजं पुरस्तात्।**

**आयुष्यमग्यंप्रतिमुञ्चशुभ्रंयज्ञोपवीतंबलमस्तुतेजः॥**

**ॐ यज्ञोपवीतमसियज्ञस्यत्वायज्ञोपवीतेनोपनह्यामि॥** इति यज्ञोपवीतधारणम्॥ **आचम्य।** अथोत्तरीयधारणम्॥ (यशसामेति मन्त्रस्य अवर्थण ऋषिः पङ्क्तिश्छन्दः लिङ्गोक्ता देवता उत्तरीयवस्त्रधारणे विनियोगः॥)

**ॐ यशसामाद्यावापृथिवीयशसेन्द्राबृहस्पती॥ यशोभगश्चमाविन्दद्यशोमाप्रतिपद्यताम्॥** इत्येनेन उत्तरीयं धारयेत्। यदि एकं चेद्वासो भवति तदा तस्यैव परिधानं कृत्वा तस्यैव वासस उत्तरार्द्धमुत्तरीयं कुर्यात्॥ ततो ''याऽआहरज्जमदग्निरि'' ति सुमनोमालाग्रहणम्॥ (याऽआहरज्जमदग्निरिति मन्त्रस्य भरद्वाज ऋषिः अनुष्टुप्छन्दः सुमनसो देवताः पुष्पमालापरिग्रहणे विनियोगः)॥

**ॐ याऽआहरज्जमदग्निःश्रद्धायैकामायेन्द्रियाय॥ ताऽअहंगृह्णामि यशसाचभगेनच॥** (इत्यनेन पुष्पमालाग्रहणम्)॥ ततस्तां पुष्णमालां 'यद्यशोप्सरसमिति' शिरसि बध्नीयात्॥ (यद्यशोप्सरसेति मन्त्रस्य भरद्वाज ऋषिः अनुष्टुप्छन्दः सुमनसो देवताः पुष्पमालाबन्धने विनियोगः॥)

**ॐ यद्यशोप्सरसामिन्द्रश्चकारविपुलंपृथु॥ तेन संग्रथिताः सुमनसऽआबध्नामि यशो मयि॥ तत ''युवासुवासा'' इति संग्रथिताः शिरो वेष्टयेत्॥** (युवासुवासा इति मन्त्रस्य विश्वामित्र ऋषिः त्रिष्टुप् छन्दः सूर्यो देवता उष्णीषेण शिरेवेष्टने विनियोगः)

**ॐ युवासुवासाः परिवीतऽआगात्सऽउश्रेयान्भवतिजायमानः॥**

**तन्धीरासःकवयऽउन्नयन्तिस्वाध्योमनसादेवयन्तः॥** तत दक्षिणकर्णे अलङ्करणमिति सुवर्णकुण्डलधारणं करोति॥ (अलंकरणमितिमन्त्रस्य भारद्वाज ऋषिः उष्णिक्छन्दः अलङ्करणदेवता अलङ्करणधारणे विनियोगः)

**ॐ अलङ्करणमसिभूयोलङ्करणभ्भूयात्॥ पुनर्वामकर्णे च ॥** ततो वृत्रस्येत्यक्षिणी उञ्जेत् (प्रथमं दक्षिणं ततो वाममनेनैव मन्त्रेण) (वृत्रस्येति मंत्रस्य प्रजापतिर्ऋषिः गायत्री छन्दः अञ्जनो देवता चक्षुरञ्जने विनियोगः)

**ॐ वृत्रस्यासिकनीनकश्चक्षुर्दाऽअसिचक्षुर्मेदेहि॥** ततो ''रोचिष्णुरसति'' आदर्शे आत्मानं दर्शयेत्॥ (रोचिष्णुरिति मंत्रस्य सूर्य ऋषिः यजुश्छन्दः आशीर्देवता आदर्शे आत्मदर्शने विनियोगः)॥ ॐ रोचिष्णुरसि॥ (ततः छत्रं प्रतिगृह्णाति बृहस्पतेरिति॥) (बृहस्पते इतिमन्त्रस्य गौतम ऋषिः निचृद्गायत्री छन्दः छत्रं देवता छत्रग्रहणे विनियोगः॥)

**ॐ बृहस्पेश्छदिरसिपाप्मनोमामन्तर्धेहि तेजसोयशसोमामन्तर्धेहि॥** इत्यनेन छत्रग्रहणम्॥ (प्रतिष्ठेस्थ इत्युपानहौ प्रमुञ्चते पादयोर्युगपत्॥) (प्रतिष्ठेति मंत्रस्य विश्वामित्र ऋषिः यजुश्छन्दः लिङ्गोक्ता देवता उपानह्परिधाने विनियोगः॥) ॐ प्रतिष्ठेस्थो विश्वतोमापातम्॥ (ततो विश्वाभ्य इति दण्डदानम्॥) (विश्वाभ्य इति मंत्रस्य याज्ञवल्क्य ऋषिः त्रिष्टुप्छन्दः दण्डो दण्डग्रहणे विनियोगः)॥

**ॐ विश्वाभ्यो मानाष्ट्राभ्यस्परिपाहिसर्वतः॥** इति मंत्रेण वैणवदंडमादत्ते॥ दन्तप्रक्षालनादीनि नित्यमपि वासश्छत्रोपानहश्चापूर्वाणि) चेन्मन्त्रः॥) तत आचार्यः स्नातकस्य नियमाञ्छ्रावयेत्॥ यथा-शूद्रादिस्पर्शनं न कर्तव्यम्॥ नृत्यगीतवादित्राणि न कुर्यान्न च गच्छेत्॥ क्षेमे सति रात्रौ ग्रामान्तरं न गच्छेत्। अक्षेमे तु कामं गच्छेत्॥ क्षेमे सति न धावेत्॥ कूपमध्ये अवलोकनं न कर्तव्यम्॥ वृक्षारोहणं न कर्तव्यम्॥ फलत्रोटनं न कर्तव्यम्॥ संध्यासमये गमनं न कर्तव्यम्॥ नग्नस्नानं न कर्तव्यम्॥ पर्वतगर्तादेर्लङ्घनं न कर्तव्यम्॥ लज्जाकरं दुःखकरममङ्गलभाषणं न कर्तव्यम्॥ संध्यासमये उपरक्तसूर्यबिंबावलोकनं न कर्तव्यम्॥ सवर्णं विना सिद्धमिक्षाचर्या न कर्तव्या॥ जलमध्ये स्वमुखं न पश्येत्॥ अनुत्पन्नलोम्नीं स्त्रीं पुरुषाकृतीं स्त्रीं नपुंसकं च एतान्नोपहसेत्॥ अभिगमनं च न कारयेत्॥ गर्भिणीं विजन्या इति ब्रूयात्॥ सकुलमिति नकुलं ब्रूयात्॥ कपालं भगालमिति ब्रूयात्॥ इन्द्रधनुः मणिधनुरिति ब्रूयात्॥ परस्य गां वत्सं पाययन्तीं परस्मै स्वामिने वा न कथयेत्॥ सस्यवत्यां भूमौ केवलायां तृणैरनंतर्हितायां मूत्रपुरीषोत्सर्गं न कुर्यात्॥ धावमानः सन् उत्तिष्ठान् सन् मूत्रपुरीषोत्सर्गं न कुर्यात्॥ स्वयं प्रशीर्णेनायज्ञियकाष्ठेन गुदं प्रमृजीत॥ तृणाद्यन्तरभूमौ शिरः प्रावरणैरावेष्टय यज्ञोपवीतं निवीतं कृत्वा आलंबितं कर्णे कुत्वा दिवोदङ्मुखो रात्रौ दक्षिणमुख उपविश्य मौनी भूत्वा पुरीषोत्सर्गं कुर्यात्॥ नील्यादिरंजितवस्त्रं न परिदधीत॥ तिस्रो रात्रीर्व्रतं चरेत्। अमांसाशी भवेत्॥ मृन्मयेन पात्रेण

उदकादिकं न पिबेत्॥ स्त्रीशूद्रशवकाकशुनां चादर्शनमसंभाषा च तैः॥ शवशूद्रसूतकान्नानि नाद्यात्॥ मूत्रपुरीषे ष्ठीवनं चातपे न कुर्यात्॥ सूर्यात्स्वमात्मानं छत्रादिना अंतर्हितं न कुर्यात्॥ तप्तेन जलेन शौचाचमनादिकाः क्रिया न कुर्वीत॥ रात्रौ दीपं प्रज्वाल्य भोजनं कुर्वीत॥ सत्यवाक्योच्चारणम् कुर्यात्॥ इत्यादयो यमानियमाः कर्तव्याः॥ **संकल्पः** -तत कृतस्य समावर्तनाख्यस्य कर्मणः साङ्गतासिद्धयर्थं यथासंख्याकान् ब्राह्मणान् कुमारिकाः सुवासिनीश्च यथाकाले यथासंपन्नेनान्नेनाहं भोजयिष्ये तेन श्रीकर्माङ्गदेवता प्रीयतां नमम॥ **संकल्पः** -कृतस्य समावर्तनाख्यस्य कर्मणः सांगतासिद्धयर्थं नानागोत्रेभ्यो ब्राह्मणेभ्यो यथोत्साहं भूयसीं दक्षिणां दातुमहमुत्सृजे तेन श्रीकर्मांगदेदवता प्रीयतां न मम॥ तत आचार्यादीन् गंधवस्त्रादिना संपूज्य तेभ्यश्च दक्षिणां दत्वा तेषामाशिषो गृह्णीयात्॥ आशीर्वादः॥

**ॐ शतञ्जीवशरदोवर्द्धमानःशतंहेमन्ताच्छतमुवसन्तान्॥ शतमिन्द्रग्निसविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः॥ ॐ शतञ्जीवशरदो वर्धमानऽइत्यापिनिगमोभवति शतमिति शतंदीर्धमायुर्मरुते मां वर्धयन्ति॥ शतमेवशतमात्मानं भवति॥ शतमितिशतं दीर्घमायुः॥ शतमिन्नुशरदोऽअन्तिदेवायत्रानश्चक्राजरसन्तनूनाम्॥ पुत्रासोयत्रपितरोभवन्तिमानो मद्ध्यारीरिषतायुर्गन्तोः॥ ॐ विश्वानिदेवसवितद्दुरितानि परासुव॥ यद्भद्रन्तन्नऽआसुव॥** इत्याशिषो गृहीत्वा देवताग्निविसर्जनं मातृणां विसर्जनं च कृत्वा कर्मेश्वरार्पणं कुर्यात्॥

## शब्दार्थाः

**समावर्तनम्** - प्रत्यागमनम्, **धौतम्** - श्वेतम्, **धावनम्** - शुद्धीकरणम्, **पुष्पाणि** - कुसुमानि, **उपानह** - पादत्राणम्

## स्वाध्यायः

**१. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) समावर्तनशब्दस्यार्थः ......... भवति। (गुरूकुले गमनम्, गुरूकुले निवासः, गुरूकुलाद् पुनरागमनम्, वने गमनम्)

(२) मनसाध्यात्वा ......... आहुबि-दानं भवति। (इन्द्राय, प्रजापतये, वरुणाय, अग्नये)

(३) भो आचार्य ! अहं स्नास्यामि ? .......... पृच्छति। (आचार्यः, शिष्यः, उपाचार्यः, होता)

(४) ॐ पृथिव्यै स्वाहा इदं पृथिव्यै न मम इति ......... वेदस्याहुतिः। (ऋक्, यजुः, साम, अथर्व)

**२. निम्नलिखितप्रश्नानाम् एकवाक्येन उत्तरं लिखत।**

(१) समावर्तनशब्दस्य कोऽर्थः ?

(२) कति वारि कुम्भाः प्रयोजिताः अस्यां पूजायाम् ?

(३) पृथिव्यै स्वाहा इति कस्य वेदस्याहुतिः ?

(४) स्नातकस्य नियमेषु पर्वतोल्लाङ्घनं कर्तव्यम् ?

(५) कस्मिन् पात्रे उदकं न पिबेत् ?

(६) जलमध्ये स्वमुखं न पश्येत् इत्यस्य कोऽर्थः ?

**३. निम्नलिखितप्रश्नानां सविस्तरम् उत्तरं लिखत।**

(१) नवाहुतयः

(२) वेदाहुतयः

(३) स्नातकनियमेषु दशनियमान् लिखत

**४. निम्नलिखितमन्त्राणां पूर्तिं कृत्वा भावार्थं लिखत।**

(१) त्वन्नोऽअग्ने.........

(२) सत्वं नो.........

(३) उदुत्तमं वरुण.........

(४) त्र्यायुषञ्जम.........

(५) विश्वानि देव.........

**छात्रप्रवृत्तिः**

- छात्राःसमावर्तनसंस्कारमन्त्राणां मुखपाठं कुर्युः॥

**शिक्षकप्रवृत्तिः**

- शिक्षकः छात्रैः वर्गे प्रायोगिकं समावर्तनसंस्कारप्रयोगं शिक्षयेत्।

●

# १६ विवाहसंस्कारः १

**प्रस्तावना**

मानवजीवने षोडशसंस्काराणां बहुमहत्त्वं विद्यते। तत्र विवाहसंस्कारः अन्यतमसंस्कारः वर्तते। वि-उपसर्गपूर्वकंवह्-धातोः घञि प्रत्यये कृते सति विवाहशब्दः निष्पद्यते। भार्यात्वसम्पादकज्ञानं विवाहः। विवाहस्य अष्टौ प्रकाराः धर्मशास्त्रे निर्दिष्टाः सन्ति। यथा -

**ब्राह्मो देवस्तथैवार्षः प्राजापत्यस्तथासुरः।**

**गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमो मतः॥ (मनु. स्मृ. - ३/२१)**

विवाहो नाम गृहस्थाश्रमनिवेशः। गृहस्थाश्रमविषये तु एकः श्लोकः प्रसिद्ध एव।

**सानन्दं सदनं सुताश्च सुधियः कान्ता मनोहारिणी।**

**सन्मित्रं सधनं स्वयोषिति रतिः चाज्ञापरा सेवकाः॥**

**आतिथ्यं शिवपूजनं प्रतिदिनं मिष्टान्नपानं गृहे।**

**साधोः संगमुपासते हि सततं धन्यो गृहस्थाश्रमः॥**

अनेनैव ज्ञायते यत् गृहस्थाश्रमः श्रेष्ठतमः एव। कारणं गृहस्थाश्रमकारणेनैव सर्वेऽपि आश्रमाः सन्ति। अन्यथा तेषां सत्त्वमकल्पनीयं स्यात्। विवाहे तु द्वयोः जीवात्मनोः एकीकरणं तथा सृष्टिवर्धनं जायते, तस्मादेव अस्य संस्कारस्य महत्त्वं वर्तते।

एनं विवाहसंस्कारं वयं विभागत्रयेण पठिष्यामः। अत्र प्रथमे विभागे वयं विवाहसंस्कारस्य प्रारम्भिकं विधिं पठिष्यामः।

---

विवाहस्य प्राग्दिने वा शुभेऽह्नि ग्रहशान्तिः सपरिवारं कार्या। अस्य पूजनं वरस्य वध्वोः वा पितृभ्यां कर्तव्यम्। तथा विवाहस्य दिनेऽपि कन्यापितृभ्यां गणपतिपूजनं पुण्याहवाचनं च विवाहमण्डपे एव विधातव्यम्।

पश्चात् तत्र तावत् कन्यापिता अर्हणवेलायां मण्डपे उदङ्मुख उपविश्य स्वदक्षिणतः पत्नीमुपवेश्य मण्डपं समागताय वराय उपवेशनार्थं शुद्धमासनं दत्त्वा तत्र प्राङ्मुखं वरमूर्ध्वजानुं तिष्ठन्तं मधुपर्केण अर्चयेत्।

आचम्य प्राणानायम्य। सुमुखश्चेत्यादि पठित्वा कन्यापिता हस्ते जलमादाय।

**संकल्पः** - अद्येत्यादिशुभपुण्यतिथौ कन्यार्थिनं मण्डपमागतं वरं मधुपर्केण अर्चयिष्ये। तदङ्गत्वेन दिग्रक्षणं कलशाराधनं गणपतिपूजनं च करिष्ये॥

पश्चात् तथैव गणपतिपूजनादिकं कृत्वा -

वक्तव्यम् -

**ॐ षडर्घ्या भवन्त्याचार्य ऋत्विग्वैवाह्यौ राजा प्रियः स्नातक इति प्रतिसंवत्सरान् अर्हयेयुर्यक्ष्यमाणास्त्वृत्विजः।**

(अत्र निर्दिष्टं यत् इमे षट् अर्घ्ययोग्याः भवन्ति। १. आचार्यः २. विप्रः ३. जामाता ४. राजा ५. प्रियः जनः ६. स्नातकः)

**आसनदानम्** -

**कन्यापिता** - (आसनमाहार्य) साधु भवान् आस्ताम् ! अर्चयिष्यामो भवन्तम् !

**वरः** - अहं साधु भवामि। माम् अर्चय।

**मन्त्रः - ॐ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः।**

**इमं तमभितिष्ठामि यो मा कश्चाभिदासति॥**

**कन्यापिता** - विष्टरो, विष्टरो, विष्टरः - प्रतिगृह्यताम्, प्रतिगृह्यताम्, प्रतिगृह्यताम्

**वरः** - प्रतिगृह्णामि

विष्टरमासने निधाय तस्योपरि उपविशति।

**पाद्यदानम् -**

ततः कन्यापिता पाद्यपात्रं गृहीत्वा -

**कन्यापिता** - पादार्थमुदकम्, पादार्थमुदकम्, पादार्थमुदकम्।

प्रतिगृह्यताम्, प्रतिगृह्यताम्, प्रतिगृह्यताम्।

**वरः** - प्रतिगृह्णामि

ततः पाद्यपात्रं निधाय वामपादप्रक्षालनं प्रथमं कृत्वा दक्षिणपादं प्रक्षालयेत्। किन्तु ब्राह्मणः वरः यदि स्यात्तर्हि दक्षिणपादः प्रथमो भवेदिति अवधेयम्।

**मन्त्रः - ॐ व्विराजो देहोऽसि व्विराजो दोहमशीय मयि पाद्यायै व्विराजो दोहः।**

**पुनः आसनदानम् -**

ततः कन्यापिता पञ्चविंशतिकुशात्मकं विष्टरं गृहीत्वा। अन्येन (द्वितीयः) -

**कन्यापिता** - विष्टरो, विष्टरो, विष्टरः - प्रतिगृह्यताम्, प्रतिगृह्यताम्, प्रतिगृह्यताम्

**वरः** - प्रतिगृह्णामि

एवं कन्यापिता द्वितीयविष्टरं वर हस्ते दद्यात्। ततो वरः ॐ वर्ष्मोऽस्मि समानानाम्... इति द्वितीयविष्टरं भूमौ निधाय तस्योपरि पादौ करोति।

**अर्घप्रदानम् -**

कन्यापिता अर्घ्यपात्रं गन्धपुष्पाक्षतफलोदकसहितं गृहीत्वा अन्येन -

**कन्यापिता** - अर्घोः, अर्घोः अर्घः - प्रतिगृह्यताम्, प्रतिगृह्यताम्, प्रतिगृह्यताम्

**वरः** - प्रतिगृह्णामि

एवं वरहस्ते पिता अर्घं दद्यात्। पश्चात् वरः अर्घ गृहीत्वा **ॐ आपः स्थ, युष्माभिः सर्वान् कामान् अवाप्नवानि** इति नमेत्।

**मन्त्रः - ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत।**

**अरिष्टा अस्माकं वीरा मा परासेचि मत्पयः॥**

(ततः अर्घजलं उदीचि प्राचि वा दिशि निःक्षिपेत्।)

**आचमनीयप्रदानम् -**

कन्यापिता आचमनीयपात्रं गृहीत्वा -

**कन्यापिता** - आचमनीयमुदकम्, आचमनीयमुदकम्, आचमनीयमुदकम्। प्रतिगृह्यताम्, प्रतिगृह्यताम्, प्रतिगृह्यताम्

**वरः** - प्रतिगृह्णामि

**मन्त्रः - ॐ आमागन्यशसा संसृज वर्चसा। तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम्।**

इति मन्त्रेण एकवारमाचमनं करणीयम्। द्विस्तूष्णीम् (आचमनद्वयं पुनः मौनं धृत्वा करणीयम्)।

**मधुपर्कप्रदानम् -**

ततः कन्यापिता कांस्यपात्रे दधिमधुघृतमेकीकृत्य वराय दद्यात्।

**कन्यापिता** - मधुपर्कः, मधुपर्कः, मधुपर्कः - प्रतिगृह्यताम्, प्रतिगृह्यताम्, प्रतिगृह्यताम्।

**वरः** - प्रतिगृह्णामि

**ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे।** इति मन्त्रेण वरः मधुपर्कं पश्येत्।

**मन्त्रः - ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। प्रतिगृह्णाम्यग्नेष्ट्वास्येन प्रश्नामि॥** इति मन्त्रेण वरः मधुपर्कं गृहीत्वा सव्ये पाणौ कृत्वा। दक्षिणस्य अनामिकया त्रिः प्रयौति। (मधुपर्कं त्रिः प्रदक्षिणमालोडयति।)

**मन्त्रः - ॐ नमः श्यावास्यायान्नशने यत्तऽआविद्धं तत्ते निष्कृन्तामि॥**

पश्चात् वरः अनामिकांगुष्ठेन वारत्रयं किञ्चित् मधुपर्कं क्षिपेत्। (प्राचि वा उदीचि वा) ततः वारत्रयं प्राश्नुयात्। प्रतिप्राशनं मन्त्रमेनं पठेत्।

**मन्त्रः - ॐ यन्मधुनो मधव्यं परमं रूपमन्नाद्यम्।**
**तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योन्नादोऽसानि॥**

इति मन्त्रेण मधुपर्कभक्षणं कर्तव्यम् तदानीं मधुव्वाता ॰ मन्त्राः वक्तव्याः। मधुपर्कः सम्पूर्णः भोक्तव्यः वा कस्याऽपि पादे न आगच्छेत् तथा स्थापनीयः वा स्वपुरतः स्थिताय अन्तेवासिने दातव्यः। ततः आचम्य न्यासाः कर्तव्याः।

**अङ्गन्यासाः -**

**१. ॐ वाङ् म आस्येऽस्तु।**
**२. ॐ नसोर्मे प्राणोऽस्तु।**
**३. ॐ अक्ष्णोर्मे चक्षुरस्तु।**
**४. ॐ कर्णयोर्मे श्रोत्रमस्तु।**
**५. ॐ बाह्वोर्मे बलमस्तु।**
**६. ॐ ऊर्वोर्मे ओजोऽस्तु।**
**७. ॐ अरिष्टानि मेऽङ्गानि तनूस्त्वा मे सह सन्तु।**

**गोप्रदानम् -**

पुनः पूर्ववत् गौः, गौः, गौः एवं त्रिः उच्चरितव्यम्। दातव्यम् च।

**मन्त्रः - ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः।**
**प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधष्ट॥**

पश्चात् वरपुरः उदङ्मुखाः दर्भाः आस्तीर्य एवं वक्तव्यम् -

**मम च अमुष्य पाप्मानं हनोमि इति यद्यालभेत। अथ यद्युत्सिसृक्षेन्मम अमुशर्मणो यजमानस्य उभयोः पाप्मा हतः।** इति उपांशुः, तत उच्चैः। **ॐ उत्सृजत तृणान्यत्तु** इति ब्रूयात्। **नत्वेन अमासोऽर्घः स्यात्** इति वक्तव्यम्। वरः दर्भैः गां स्पृशेत्।

ततः वरस्य यथाशक्ति चन्दनपुष्पयज्ञोपवीतालंकारैः पूजनं कर्तव्यम्।

**कंकुमतिलकमन्त्रः - ॐ सुचक्षाऽअहमक्षिभ्यां भूयासः सुवर्चामुखेन। सुश्रुत् कर्णाभ्यां भूयासम्॥**

**यज्ञोपवीतदानम् -**

**मन्त्रः - ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्।**
**आयुष्यमग्रयं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥**

**वस्त्रदानम् –**

**मन्त्रः – ॐ परिधास्यै यशो धास्यै दीर्घायुत्वाय जरदष्टिरस्मि।**

**शतं जीवामि शरदः पुरूची रायस्पोषमभि संव्ययिष्ये॥**

**संकल्पः** – अनेन मधुपर्कार्चनेन लक्ष्मीनारायणौ प्रीयेताम्।

**इति मधुपर्कार्चनम्**

ततो वरो विवाहवेद्यां गत्वा शुभासने उपविश्य आचम्य प्राणानायम्य –

**संकल्पः** – अद्येत्यादि ० तिथौ धर्मार्थकामप्रजासिद्ध्यर्थं दारपरिग्रहणं करिष्ये।

ततः वरासनपुरस्तात् अक्षतस्वस्तिकयुतमासनं कन्यायै स्थापयितव्यम्। वरस्य पुरः अन्तःपटं भूयात्। कन्यां मातुलाः विवाहवेद्यामानयेत्। तावद्विप्राः मङ्गलाष्टकं पठेयुः।

**मङ्गलाष्टकम्**

**श्रीमत्पङ्कजविष्टरो हरिहरो वायुर्महेन्द्रोऽनलः।**
**चन्द्रोभास्करवित्तपालवरुणाः प्रेताधिपादिग्रहाः॥**
**प्रद्युम्नो नलकूबरौ सुरगुरुश्चिन्तामणिः कौस्तुभः,**
**स्वामी शक्तिधरश्च लाङ्गलधरः कुर्यात्सदा मङ्गलम् ॥ १॥**

**गौरी श्रीरदितिर्दितिश्च सुभगाः कद्रुः सुपर्णा शिवा,**
**सावित्री च सरस्वती च सुरभिः सत्यव्रतारुन्धती।**
**स्वाहा जाम्बवती च रुक्मभगिनी दुःस्वप्नविध्वंसिनी,**
**वेलाचाम्बुनिधेः समीनमकराः कुर्यात्सदा मङ्गलम् ॥ २॥**

**नेत्राणां त्रितयं महत्पशुपतेरग्नेस्तु पादत्रयं,**
**तद्वद्विष्णुपदत्रयं त्रिभुवने ख्यातं च रामत्रयम्॥**
**गङ्गौघस्य गतित्रयं सुविमलं तद्वद् ऋषीणां त्रयम्,**
**सन्ध्यायास्त्रितयं द्विजैरभिमतं कुर्वन्तु वो मङ्गलम् ॥ ३॥**

**गङ्गागोमतिगोपतिर्गणपतिर्गोविन्दगोवर्धनौ**
**गीता गोमयगोरजौ गिरिसुता गङ्गाधरो गौतमः।**
**गायत्री गरुडो गदाधरगयौ गम्भीरगोदावरी,**
**गन्धर्वा गृहगोपगोकुलगणाः कुर्वन्तु वो मङ्गलम् ॥ ४॥**

**गङ्गा सिन्धुसरस्वती च यमुना गोदावरी नर्मदा,**
**कावेरी सरयुर्महेन्द्रतनया चर्मण्वती वेदिका।**
**क्षिप्रा वेत्रवती महासुरनदी ख्याता जया गण्डकी,**
**पूर्णाः पूर्णजलैः समुद्रसहिताः कुर्वन्तु वो मङ्गलम् ॥ ५॥**

**अश्वत्थो वटवृक्षचन्दनतरू मन्दारकल्पद्रुमौ,**
**जाम्बूनिम्बकदम्बकाम्रसरला वृक्षाश्च ये क्षीरिणः।**
**सर्वैस्तैः फलपुष्पपल्लवखगैर्युक्तेः सदा मण्डितं,**
**रम्यं चैत्ररथं सनन्दनवनं कुर्यात्सदा मङ्गलम् ॥ ६॥**

**लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वन्तरिश्चन्द्रमाः,**
**गावः कामदुघा सुरेश्वरगजौ रम्भादिदेवाङ्गनाः।**
**अश्वः सप्तमुखः सुधा हरिधनुः शंखो विषं चाम्बुधे,**
**रत्नानीति चतुर्दश प्रतिदिनं कुर्युः सदा मङ्गलम् ॥ ७॥**
**वाल्मिकिः सनकः सनन्दनमुनिर्व्यासो वसिष्ठो भृगु -**
**र्जाबालिर्जमदग्निजह्नुजनका गर्गोऽङ्गिरा गौतमः।**
**मान्धता ऋतुपर्णवैन्यसगरा धन्यो दिलीपो नलः,**
**पुण्यो धर्मसुतो ययातिनहुषौ कुर्वन्तु वो मङ्गलम् ॥ ८॥**

| | | | |
|---|---|---|---|
| **१.** | **शुभमहूर्तं सावधान** | **६.** | **काली कण्ठी सावधान** |
| **२.** | **शुभलग्नं सावधान** | **७.** | **वस्त्र ग्रन्थी सावधान** |
| **३.** | **आचार्य सावधान** | **८.** | **रत्नदीपक सावधान** |
| **४.** | **मदनफलबद्ध सावधान** | **९.** | **कन्यादाता सावधान** |
| **५.** | **ग्रीवासूत्र सावधान** | **१०.** | **कन्याप्रतिगृहीता सावधान...** |

प्रत्येकश्लोकान्ते समयस्य उच्चारणं कर्तव्यम्, यत् कियान् कालः कन्यागमने अवशिष्ट इति। कन्यागमने तदेवलग्नमिति उच्चार्य मङ्गलनादेन कन्यायाः स्वागतं कर्तव्यम्।

अन्तः पटं उदीचि नीत्वा वरकन्यके परस्परं पुष्पमालां समर्पयेताम्। तदानीं ताभ्यां **दम्पत्योरविच्छिन्ना प्रीतिरस्तु** इत्याशीर्दानं कर्तव्यम्।

## शब्दार्थाः

**कन्यादाता** - कन्यादानकर्ता, **विष्टरः** - आसनम्, **अन्तः पटम्** - वरकन्यावरोधकवस्त्रम्, **अविच्छिन्ना** - अखण्डा, **प्रतिगृहता** - ग्रहणकर्ता, **दाराः** - पत्नी।

## स्वाध्यायः

**१. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) आसनार्थे पाठे ......... शब्दः प्रयुक्तः। (पीठः, विष्टरः, स्थानम्)

(२) मधुपर्कः ......... देयः। (वराय, कन्यायै, कुमार्यै)

(३) गृहस्थाश्रमः .........। (धन्यः, दिव्यः, भव्यः)

(४) अस्माकं समाजे ......... संस्काराः भवन्ति। (१४, १५, १६)

(५) मंगलाष्टक ......... गानं भवति। (कन्यास्थिते, कन्यायाआगमने, वरपूजने)

(६) अन्तःपटवस्त्रं ......... मध्ये भवति। (वरश्वसुरयोः, अग्निवरयोः, वरकन्ययोः)

**२. निम्नलिखितश्लोकानां पूर्तिं कुरुत।**

(१) यज्ञोपवीतं परमं.........।

(२) श्रीमत्पंकजविष्टरो.........।

(३) लक्ष्मीः कौस्तुभ.........।

(४) गंगा सिन्धु.........।

(५) गौरी श्रीरदितिः.........।

**३. निम्नलिखितमन्त्राणां पूर्तिं कुरुत।**

(१) परिधास्यै.........।

(२) सुचक्षा अहमक्षीभ्यां.........।

(३) माता रुद्राणां.........।

(४) यन्मधुनो.........।

(५) देवस्यत्वा सवितुः.........।

(६) आमागन्यशसा.........

(७) समुद्रं वः प्रहिणोमि.........

**४. अधस्तनप्रश्नानामुत्तराणि लिखत।**

(१) विष्टरे कति कुशाः भवन्ति ?

(२) अक्ष्णोर्मे किमस्तु ?

(३) कर्णयोः किमस्तु ?

(४) मधुपर्कग्रहणं कया रीत्या भवति ?

(५) मधुपर्कः कस्यां दिशि क्षेप्तव्यः ?

(६) वरपूजने कति उपचाराः भवन्ति ?

(७) सर्वेषामाश्रमाणां मूलं किमस्ति ?

(८) मंगलाष्टकं कदा गीयते ?

(९) मंगलाष्टकस्य अन्तिमः श्लोकः लिख्यताम् ?

**५. टिप्पणीं कुरुत।**

(१) मानवजीवने विवाहसंस्कारः।

(२) आश्रमाणां मूलं गृहस्थाश्रमः।

**छात्रप्रवृत्तिः**

- छात्राः मंगलाष्टकं कण्ठस्थीकुर्युः।

**अध्यापकप्रवृत्तिः**

- अध्यापकः विवाहप्रशंसात्मिका वार्ता प्रकर्तव्या।

•

# १७ विवाहसंस्कारः - २

**प्रस्तावना**

गतपाठे अस्माभिः वरस्य पूजनादिकं कन्यागमनं च पठितम्। अस्मिन् पाठे वयं कन्यापूजनं पाणिग्रहणादिकं होमादिकं च पठामः।

---

**कन्यायाः पादप्रक्षालनम् :-**

**मन्त्रः :- श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।**

**इष्णन्निषाणामुमऽइषाण सर्वलोकम्मऽ इषाण।**

**कन्यायै वस्त्रदानम् :-**

**मन्त्रः :- ॐ जरा गच्छ परिधत्स्य व्वासो भवाकृष्टीनामभिशस्ति पावा।**

**शतञ्च जीवः शरदः सुवर्चा रयिं च पुत्रा ननु संव्ययस्वायुष्मतीदं परिधत्स्व व्वासः॥**

**कन्यायै मङ्गलवस्त्रदानम् :-**

**मन्त्रः :- ॐ याऽअकृतन्न व्वयं या अतन्वत। याश्च देवीस्तन्तूनभितो ततन्थ तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व व्वासः॥**

**समञ्जनम् :-**

**मन्त्रः :- समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ।**

**सम्मातरिश्वा सं धाता समु देष्ट्री दधातु नौ।**

**कन्यादानसङ्कल्पः :-**

ततो दाता स्वदक्षिणस्थितपत्न्या सह वरपार्श्वभागे शुभासन उदङ्मुख उपविश्य आचम्य प्राणानायम्य - हस्ते जलमादाय -

**ॐ विष्णुर्विष्णुर्विष्णुः एवं ग्रहगुणगणविशेषेणविशिष्टायां शुभपुण्यतिथौ अस्मिन् पुण्याहे अस्याः कन्यायाः अनेन वरेण धर्मप्रजया उभयोर्वंशवृद्ध्यर्थं तथा च मम समस्तपितृणां निरतिशयानन्दब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्तये अनेन वरेण अस्यां कन्यायां उत्पादयिष्यमाण-सन्तत्या दशपूर्वान् दशापरान् मां च एकविंशतिपुरुषान् उद्धर्त्तुं ब्राह्मविवाहविधिना श्रीलक्ष्मीनारायणप्रीतये गोत्रोच्चारपूर्वकं कन्यादानमहं करिष्ये।**

ततः कन्यापितरौ वरस्य हस्ते अधोलिखितानुसारं दद्याताम् -

जलम् - ॐ शिवा आपः सन्तु। सन्तु शिवा आपः। सौमनस्यमस्तु। अस्तु सौमनस्यम्। अक्षतं चारिष्टं चास्तु। अस्त्वक्षतमरिष्टं च। गन्धाः पान्तु सौमङ्गल्यं चास्तु। अक्षताः पान्तु आयुष्यमस्तु। पुष्पाणि पान्तु सौश्रियमस्तु। यत्पापं रोगमकल्याणं तद्दूरे प्रतिहतमस्तु।

**गोत्रोच्चारः :-**

**वरस्य गोत्रोच्चारः :-**

**१. अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणः प्रपौत्राय**

**२. अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणः पौत्राय**

३. अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मण: पुत्राय

४. अमुकगोत्राय अमुकप्रवराय अमुकवेदान्तर्गताय अमुकशाखाध्यायिने अमुकनाम्ने श्रीधररूपिणे वराय।

**कन्याया: गोत्रोच्चार**

१. अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मण: प्रपौत्रीम्

२. अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मण: पौत्रीम्

३. अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मण: पुत्रीम्

४. अमुकगोत्रां अमुकप्रवरां अमुकनाम्नीं श्रीरूपिणीं कन्याम्

उभयो: पाणिग्रहणं शुभं भवतु।

**वरमातुलपक्षगोत्रोच्चार: :-**

१. अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मण: प्रदौहित्राय

२. अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मण: दौहित्राय

३. अमुकशर्मणे श्रीधररूपिणे वराय...

गोत्रोच्चारानन्तरं कन्यापितृभ्यां दक्षिणपाणौ संकल्प: कर्तव्य:। तत: कन्याहस्तं साक्षतं सजलं वरहस्ते दद्याताम्। तत: वरकन्याहस्तयो: एव पितरौ संकल्पं कुर्याताम्। हस्ते जलमादाय - विष्णुर्विष्णुर्विष्णु: अथ मण्डपाधस्तात् कुलशीलसौभाग्यसामुद्रिकलक्षणलावण्ययुक्तां सावयवां च अरोगां कांचनकुण्डलकंकणवलय-नूपुरकटिमेखलाभुजचूडीके-यूरांगदभूषितां नारिकेल हस्तां भ्रमरध्वनिसुगन्धिमालालंकृतां कर्पूरागरुधूपितां गन्धयक्षकर्दमद्रव्यादिसहितां मुकुटमालादिविविधालंकृताम् आसनच्छत्रोपानद्वास:कमण्ड-लुकांस्यपात्रसौवर्णरौप्यमुद्रिकोपेतां गजदन्तकंकणान्वितां कुंकुमकज्जलमुक्ताफलमालालंकृतां व्रीह्यञ्जलिपूरिताम् आदर्शहस्तां मदनफलबद्धां त्रिमातुलशुद्धां दशपुरुषविख्यातां सर्वलक्षणभूषितां श्रीरूपिणीमिमां कन्यां भार्यात्वेन तुभ्यमहं सम्प्रददे।

एतेन भगवन्तौ श्रीलक्ष्मीनारायणौ प्रीयेताम् न मम।

**पाणिग्रहणम् :-**

संकल्पानन्तरं पिता कन्याहस्तं वरहस्तमास्थाय ॐ **स्वस्ति** इत्युच्चरेत्। तत: श्लोका: उच्चरणीया:।

कन्यां लक्षणसम्पन्नां कनकाभरणैर्युताम्। दास्यामि ब्रह्मणे तुभ्यं ब्रह्मलोकजिगीषया॥

पृथिव्यादिमहाभूता: साक्षिण्य: सर्वदेवता:। इमां कन्यां प्रदास्यामि पितॄणां तारणाय च॥

मम वंशे कुले जाता यावद्वर्षाणि षोपिता। तुभ्यं वर! मया दत्ता पुत्रपौत्रविवर्धिनी॥

गौरीं कन्यामिमां विप्र! यथाशक्ति विभूषिताम्। गोत्राय शर्मणे तुभ्यं दत्तां विप्र! समाश्रय॥

कन्यामाता - मया दत्ता।

वर: - मया प्रतिगृहीता।

**कामस्तुति: :-**

**मन्त्र: :- कोऽदात् कस्मा ऽ अदात् कामोऽदात् कामायादात्।**
**कामो दाता काम: प्रतिगृहीता कामैतत्ते॥**

**वरप्रार्थनम् :-**

कन्यापिता वरं वदेत्

**यस्त्वया धर्मश्चरितव्य: सोऽनया सह धर्मेऽर्थे कामे च त्वयेयं नातिचरितव्या।**

वरः वदेत् - **नातिचरामि**

ततः वरमालाग्रहणं कर्तव्यम् एवं वस्त्रग्रन्थिबन्धनं कर्तव्यम्।

**गोदानसंकल्पः :-**

कन्यादानसांगतासिद्ध्यर्थम् इमां गां रुद्रदैवत्यां वा गोनिष्क्रयीभूतमिदं द्रव्यं प्रजापतिरूपिणे वराय तुभ्यमहं सम्प्रददे।

ततः पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामति। एवं वरकन्यके उत्त्थाय वरः अग्रे स्यात्तथा बहिरागत्य कन्यां स्वदक्षिणतः स्थापयित्वा वरः तिष्ठेत्।

**मन्त्रः :- यदेषि मनसा दूरं दिशोऽनु पवमानो वा। हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोत्वसौ।**

**परस्परसमीक्षणम् :-**

**मन्त्राः :- ॐ अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः। वीरसूर्देवकामा स्योना शन्नो भव द्विपदे शं चतुष्पदे॥ १॥**

**ॐ सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः। तृतीयोऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः॥ २॥**

**ॐ सोमोऽदद् गन्धर्वाय गन्धर्वोऽवरदग्नये। रयिं च पुत्राँश्चादादग्निर्म्मह्यमथोऽङ्माम्॥ ३॥**

**ॐ सानः पूषा शिवतमामैरय सा न ऊरू उशती व्विहर। यस्यमुशन्तः प्रहराम शेपं यस्यामु कामा बहवो निविष्टवै॥ ४॥**

**पुण्याहवाचनम् :-**

ततः आचारप्राप्तं स्वरितपुण्याहवाचनं कुर्यात्।

**अभिषेकः :-**

**मन्त्रः :- ॐ आपो हिष्ठा.. यो वः ... तस्माऽ...**

एवं पुरोहितः जलप्रोक्षणं कुर्यात्।

**मन्त्रः :- आशीर्वादाः -**

**ॐ शतमिन्नु शरदोऽ ...**

**कृष्णारुक्मिण्योः सौभाग्यं स्यात्** इत्याशीः।

**मङ्गलं भगवान् विष्णुर्मङ्गलं गरुडध्वजः। मङ्गलं पुण्डरीकाक्षो मंगलायतनो हरिः॥**

संकल्पः :- कृतस्य कन्यादानकर्मणः सांगतासिद्ध्यर्थं यथासंख्याकान् ब्राह्मणान् कुमारिकाबटून् सुवासिन्यादीन् अद्याऽहं भोजयिष्ये।

कृतस्य कन्यादानकर्मणः सांगतासिद्ध्यर्थं नानागोत्रेभ्यो ब्राह्मणेभ्यो यथोत्साहं दक्षिणां दास्ये।

लम्बोदर नमस्तुभ्यं सततं मोदकप्रियम्। निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥

**॥ इति कन्यादानप्रयोगः॥**

## ॥ अथ विवाहहोमः॥

वरो हस्ते जलमादाय-अद्येत्यादि० प्रारीप्सितकर्मणः सांगतासिद्ध्यर्थं भार्यात्वसिद्ध्यर्थं विवाहहोममहं करिष्ये। तदङ्गत्वेन गणपतिपूजनमहं करिष्ये।

इति संकल्प्य गणपतिं षोडशोपचारैः सम्पूजयेत्।

ततः आचार्यः पंचभूसंस्कारपूर्वकमग्निं संस्थापयेत्। अग्नेः उत्तरतः **मही द्यौः०** इत्यादिक्रमेण

उदककुम्भस्थापनम्। ततो दक्षिणतो ब्रह्मासनमास्तीर्य इत्यादि चरुवर्जं पात्रासादनादि-प्रोक्षण्याः प्रत्युत्पवनान्तं कृत्वा तिष्ठेत्। तत्र उपकल्पनीयानि यथा - उत्तरे शमीपलाशनिश्राः लाजाः। अश्मा। अखण्डं लोहितम्। आनडुहं चर्म। तदभावे बर्हिषः। कुमारीभ्राता। शूर्पम्। दृढपुरुषः पूर्णपात्रमाचार्याय वरद्रव्यम्। प्रोक्षणकाले उपकल्पनीयानां प्रोक्षणम्। ततः उपयमनकुशान् आदाय तिष्ठन् समिधोऽभ्यादाय। प्रोक्षणीयोदकेन अग्निं प्रदक्षिणीकृत्य इतरथावृत्तिः। पवित्रयोः प्रणीतासु निधानम्।

(वरणान्वारब्धः आचार्यो वा) ब्रह्मणा दक्षिणहस्तेन अन्वारब्धः वरः दक्षिणजान्वाच्य स्रुवेण जुहुयात्।

१. (मनसा) ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम।

२. ॐइन्द्राय स्वाहा। इदमिन्द्राय न मम।

३. ॐ अग्नये स्वाहा। इदमग्नये न मम।

४. ॐ सोमाय स्वाहा। इदं सोमाय न मम। हस्ते अक्षतान् गृहीत्वा।

**मन्त्रः :- ॐ अग्ने नय सुपथा राये ऽ अस्मान् विश्वानि देव व्वयुनानि विद्वान्।**

**युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥**

विवाहे योजकनाम्ने वैश्वानराय नमः। सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

इत्यग्निं सम्पूज्य अष्ट प्रायश्चित्ताहुतीः जुहुयात्।

१. ॐ **भूः स्वाहा।** इदमग्नये न मम।

२. ॐ **भुवः स्वाहा।** इदं वायवे न मम।

३. ॐ **स्वः स्वाहा।** इदं सूर्याय न मम।

४. **ॐ त्वं नोऽ अग्ने व्वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः। यजिष्ठो वह्नितम शोशुचानो विश्वा द्वेषाᳬसि प्रमुमुग्ध्यस्यत् स्वाहा।** इदमग्निवरुणाभ्यां न मम।

५. **ॐ स त्वं नो ऽअग्ने वमो भवोती नेदिष्ठो नेदिष्ठा उषसो व्युष्टौ। अवयक्ष्वनो वरुणꣳ रराणो वीहि मृडीकꣳसुहवो न एधि।** स्वाहा। इदं पुनः अग्निवरुणाभ्यां न मम।

६. **ॐ अयाश्चाग्नेऽस्य नभिशस्तिपाश्च सत्यमित्वमया असि। अया नो यज्ञं वहास्यया नो धेहि भेषजꣳ स्वाहा।** इदमग्नये अयसे न मम।

७. **ॐ ये ते शतं वरुण ये सहस्त्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नोऽद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः।** स्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम।

८. **ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यꣳश्रथाय। अथा व्वयमादित्यव्रते तवानागसोऽअदितये स्याम।** स्वाहा। इदं वरुणायादित्यायादितये च न मम।

९. **ॐ ( मनसा ) प्रजायतये स्वाहा।** इदं प्रजापतये न मम।

**राष्ट्रभृद्धोमः**

विनियोगः : - (वरः हस्ते जलं गृहीत्वा) ऋताषाडित्यादि-द्वादशानां प्रजापतिर्ऋषिः त्तन्मात्रोक्ता देवता यजुश्छन्दः राष्ट्रभृद्धोमे विनियोगः।

वरः आज्येन जुहुयात्।

**मन्त्रः :-**

१. ॐ **ऋताषाड् ऋतधामाग्निर्गन्धर्वः। स नऽ इदं ब्रह्मक्षत्रंपातु तस्मै स्वाहा व्वाट्॥**

इदमृताषाहे ऋतधाम्नेऽग्नये गन्धर्वाय न मम।

२. ॐ **ऋताषाड् ऋतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहा।** इदमोषधिभ्योऽप्सरोभ्यो मुद्भ्यो न मम।

३. **ॐ संहितो विश्वसामा सूर्यो गन्धर्वः स नऽइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट्॥** इदं संहिताय विश्वसाम्ने सूर्याय गन्धर्वाय न मम।

४. **ॐ संहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरसऽआयुवो नाम ताभ्यः स्वाहा॥** इदं मरीचिभ्योऽप्सरोभ्य आयुभ्यो न मम।

५. **सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्व स नऽइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट्॥** इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय न मम।

६. **ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा॥** इदं नक्षत्रेभ्योऽप्सरोभ्यो भेकुरिभ्यो न मम।

७. **ॐ इषिरो विश्वव्यचा वातो गन्धर्वः स नऽइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट्॥** इदनिषिराय विश्वव्यचसे वाताय गन्धर्वाय न मम।

८. **ॐ इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽप्सरसऽऊर्जो नाम ताभ्यः स्वाहा॥** इदमद्भ्योऽप्सरोभ्य ऊर्ग्भ्यो न मम।

९. **ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वः स नऽइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट्॥** इदं भुज्यवे सुपर्णाय यज्ञाय गन्धर्वाय न मम।

१०. **ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसस्तावा नाम ताभ्यः स्वाहा॥** इदं दक्षिणाभ्योऽप्सरोभ्यस्तावाभ्यो न मम।

११. **ॐ प्रजापतिर्विश्वकर्म्मा मनो गन्धर्वः स नऽइदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा व्वाट्॥** इदं प्रजापतये विश्वकर्मणे मनसे गन्धर्वाय न मम।

१२. **ॐ प्रजापतिर्विश्वकर्म्मा नमो गन्धर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा॥** इदमृग्सामभ्योऽप्सरोभ्य एष्टिभ्यो न मम।

जलमादाय - अनेन राष्ट्रभृद्धोमेन श्रीलक्ष्मीनारायणौ प्रीयेताम् न मम।

**जयाहोमः**

विनियोगः :- चित्तं चेत्यादित्रयोदशमन्त्राणां परमेष्ठी ऋषिः सर्वाणि यजूंषि च्छन्दांसि लिङ्गोक्ता देवता विवाहकर्मणि जयाहोमे विनियोगः।

१. **ॐ चितं च स्वाहा।** इदं चित्ताय न मम।

२. **ॐ चित्तिश्च स्वाहा।** इदं चित्त्यै न मम।

३. **ॐ आकूतं च स्वाहा ॥** इदम् आकूताय न मम।

४. **ॐ आकूतिश्च स्वाहा॥** इदमाकूतये न मम।

५. **ॐ विज्ञातं च स्वाहा॥** इदं विज्ञाताय न मम।

६. **ॐ विज्ञातिश्च स्वाहा।** इदं विज्ञातये न मम।

७. **ॐ मनश्च स्वाहा।** इदं मनसे न मम।

८. **ॐ शक्वर्यश्च स्वाहा।** इदं शक्वरीभ्यो न मम।

९. **ॐ दर्शश्च स्वाहा।** इदं दर्शाय न मम।

१०. **ॐ पौर्णमासं च स्वाहा।** इदं पौर्णमासाय न मम।

११. **ॐ बृहच्च स्वाहा।** इदं बृहते न मम।

१२. **ॐ रथन्तरं च स्वाहा।** इदं रथन्तराय न मम।

१३. **ॐ प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु। तस्मै विशः समनमन्तः सर्वाः स उग्रः स इहव्यो बभूव स्वाहा॥** इदं प्रजापतये जयानिन्द्राय न मम।

जलमादाय – अनेन जयाहोमेन श्रीलक्ष्मीनारायणौ प्रयेताम् न मम।

**अथ अभ्यातानहोमः**

विनियोगः – अग्निर्भूतानाम् इत्याद्यष्टदशानां मन्त्राणां प्रजापतिर्ऋषि। त्रिष्टुप्छन्दः तत्तन्मन्त्रोक्तदेवता अभ्यातानहोमे विनियोगः।

१. **ॐ अग्निर्भूतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यास्यां देवहूत्याᳬस्वाहा॥** इदमग्नये भूतानामधिपतये न मम।

२. **ॐ इन्द्रो ज्येष्ठानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा।** इदमिन्द्राय ज्येष्ठानामधिपतये न मम।

अन्तःपटं कृत्वा (वरकन्ययोः अग्नेश्च मध्ये)

३. **ॐ यमः पृथिव्या अधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यास्यां देवहूत्याᳬस्वाहा॥** इदं यमाय पृथिव्या अधिपतये न मम।

अधुना अन्तःपटं निःसार्य। दक्षिणस्यामन्यस्मिन् पात्रे त्यागः प्रणीताजलस्पर्शश्च।

४. **ॐ वायुरन्तरिक्षाणामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा॥** इदं वायवे अन्तरिक्षाणामधिपतये न मम।

५. **ॐ सूर्यो दिवोऽधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा।** इदं सूर्याय दिवोऽधिपतये न मम।

६. **ॐ चन्द्रमा नक्षत्राणामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा॥** इदं चन्द्रमसे नक्षत्राणामधिपतये न मम।

७. **ॐ बृहस्पतिर्ब्रह्मणोऽधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा॥** इदं बृहस्पतये ब्रह्मणोऽधिपतये न मम।

८. **ॐ मित्रः सत्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा॥** इदं मित्राय सत्यानामधिपतये न मम।

९. **ॐ व्वरुणोऽपामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा॥** इदं वरुणायापामधिपतये न मम।

१०. **ॐ समुद्रः स्त्रोत्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा॥** इदं समुद्राय स्त्रोत्यानामधिपतये न मम।

११. **ॐ अन्नं साम्राज्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा॥** इदमन्नाय साम्राज्यानामधिपतये न मम।

१२. **ॐ सोम ओषधीनामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा॥** इदं सोमाय ओषधीनामधिपतये न मम।

१३. **ॐ सविता प्रसवानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा॥** इदं सवित्रे प्रसवानामधिपतये न मम।

अन्तः पटं कुर्यात्।

१४. **ॐ रुद्रः पशूनामधितिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा॥** इदं रुद्राय पशूनामधिपतये न मम।

अन्तःपटं निःसार्य ऐशान्यामन्यपात्रे त्यागः। प्रणीताजलस्पर्शश्च॥

१५. **ॐ त्वष्टा रूपाणामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा॥** इदं त्वष्ट्रे रूपाणामधिपतये न मम।

१६. **ॐ विष्णु पर्वतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा॥** इदं विष्णवे पर्वतानामधिपतये न मम।

१७. **ॐ मरुतो गणानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा॥** इदं मरुताय गणानामधिपतये न मम।

अन्तः पटं कुर्यात्।

१८. **ॐ पितरः पितामहाः परेऽवरे ततास्ततामहास्ते स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा॥** इदं पितृभ्यः पितामहेभ्यः परेभ्योऽवरेभ्यः तेभ्यस्ततामहेभ्यश्च न मम **स मावत्वस्मिन् ब्रह्मणयस्मिन् क्षत्रेऽस्यामाशिष्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याᳬस्वाहा॥**

**इत्यभ्यातानहोमः**

**अथ अग्न्यादिपञ्चकहोमः**

वरः हस्ते जलमादाय-

विनियोगः - अग्निरेत्वित्यादीनां पञ्चानां प्रजापतिर्ऋषिरन्तिमस्य सङ्कर्षणर्षिरग्निर्देवता चतुर्थस्य वैवस्वतो देवता पञ्चमस्य मृत्युर्देवता त्रिष्टुप् छन्दः सर्वेषां होमे विनियोगः।

१. **ॐ अग्निरेतु प्रथमो देवतानाᳬ सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात्।**

**तदयः राजा वरुणोऽनुमन्यताम् यथेयं स्त्री पौत्रमघन्न रोदात्स्वाहा।** इदमग्नये न मम।

२. **ॐ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः। अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुद्ध्यतामियᳬ स्वाहा।** इदमग्नये न मम।

३. **ॐ स्वस्तिनो अग्ने दिव आ पृथिव्या विश्वानि धेह्ययथा यजत्र। यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रᳬ स्वाहा॥** इदमग्न्ये न मम।

४. **ॐ सुगं नु पन्थां प्रदिशन्नऽएहि ज्योतिष्मध्ये ह्यजरन्न आयुः। अपैतु मृत्युरमृतं न आगाद् वैवस्वतो नो अभयं कृणोतु स्वाहा॥** इदं वैवस्वताय न मम। दक्षिणस्यामन्यपात्रे त्यागः।

अन्तःपटं कुर्यात्

५. **ॐ परं मृत्यो अनुपरेहि पन्थां यस्तेऽन्य इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरान् स्वाहा॥** इदं मृत्यवे न मम। इत्यग्नौ भूमौ वा त्यागः। अन्तःपटं निःसार्य प्रणीताजलस्पर्शः। ततः संस्रवप्राशनम्।

**इति अग्न्यादिपञ्चकहोमः**

**अथ लाजाहोमः**

कन्यायाः भ्राता चतुर्वारं शमीपलाशमिश्रान् लाजान् शूर्पादादाय वराञ्जलौ स्थिते कन्याञ्जलौ ददाति। ततः प्राङ्मुखी कन्या तान् लाजान् जुहोति। पश्चात् प्रदक्षिणा कर्तव्या। प्रदक्षिणा प्रस्तरस्पर्शेन एव भवति।

प्रदक्षिणात्रयं कन्या अग्रतः अन्तिमायां वरः भवति।

विनियोगः - ॐ अर्यमणमित्यादि-त्रयाणामाथर्वण-ऋषिः त्रिष्टुप् छन्दः तृतीयस्य अनुष्टुप्छन्दः अग्निर्देवता लाजाहोमे विनियोगः।

**प्रथमं मङ्गलम्**

१. **ॐ अर्यमणं देवं कन्याऽअग्निमयक्षत। स नो अर्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा॥** इदमर्यम्णे न मम। ततो वधूमग्रे कृत्वा अग्नेरुत्तरतो गत्वा। तत्र वरो वध्वा दक्षिणपादं सव्यहस्तेन गृहीत्वा दक्षिणेन वा गृहीत्वा। पूर्वोपकल्पितदृषदुपरि करोति।

**द्वितीयं मङ्गलम्**

२. **इयं नार्युपब्रूते लाजानावपन्तिका। आयुष्मानस्तु मे पतिरेन्धन्तां ज्ञातयो मम स्वाहा॥** इदमग्न्ये न मम। एनां प्रदक्षिणामि द्वितीयामपि पूर्ववदेव अवगन्तव्यम्।

**तृतीयं मङ्गलम्**

३. **ॐ इमान् लाजानावपाम्यग्नौ समृद्धिकरणं तव। मम तुभ्यं व संवननं तदग्निरनुमन्यतामियꣳ स्वाहा॥** इदमग्नये न मम।

४. **ॐ तुभ्यमग्ने पर्यवहन्त्सूर्यां वहतुना सह। पुनः पतिभ्यो जायां दाऽग्ने प्रजया सह।** ॐ भगाय स्वाहा। इदं भगाय न मम। अधुना चतुर्था प्रदक्षिणा - तत्र मन्त्राः

**चतुर्थं मङ्गलम्**

१. **ॐ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः। भगो अर्यमा सविता पुरन्धिर्मह्यंत्वादुर्गार्हपत्याय देवाः॥**

२. **ॐ अमोऽहमस्मि सा त्वꣳ सा त्वमस्यमोऽहम्। सामाहमस्मि ऋक् त्वं द्यौरहं पृथिवे त्वम्॥**

३. **ॐ तावेहि विवहावहै सह रेतो दधावहै। प्रजां जनयावहै पुत्रान् विन्द्यावहै बहून्॥**

४. **ॐ ते सन्तु जरदष्टयः। संप्रियो रोचिष्णू सुमनस्यमानौ। पश्येम शरदः शतं, जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्॥**

**अश्मारोहणम्**

**मन्त्रः :- ॐ आरोहेममश्मानमश्मेव त्वं स्थिरा भव। अभितिष्ठ पृतन्यतोऽव बाधस्व पृतनान्यतः॥** इत्यस्यश्मारोहणे वरस्य मन्त्रपाठः॥

**गाथागानम्**

अथ वरः गाथां गायति -

**ॐ सरस्वति प्रेदमव सुभगे वाजिनीवती। यान्त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः॥**

**ॐ यस्यां भूतꣳ समभवद्यस्यां विश्वमिदं जगत्। तामद्य गाथां गास्यामि षा स्त्रीणामुत्तमं यशः॥**

**अधुना चतुर्थी अग्निपरिक्रमा -**

अत्र प्रस्तरस्पर्शे कन्याभ्राता वरपादांगुष्ठं गृह्यात्। वित्तमवाप्य एव मुञ्चेत्।

परिक्रमान्ते वरः कन्यायाः आसने स्वयं स्थित्वा कन्यां च स्वस्य आसने उपवेशयेत्। ततश्च पुनः उभौ पश्चादग्नेः प्राग्वत् स्वासने उपविशेताम्।

वरो ब्रह्मान्वारब्धः प्राजापत्यं होमं कुर्यात्।

**ॐ प्रजापतये स्वाहा।** इदं प्रजापतये न मम। इति प्रोक्षण्यां त्यागः। इति लाजाहोमः॥

## शब्दार्थाः

**सौमनस्यम्** - पुष्पम्, **ताम्बूलानि** - नागवल्लिदलानि, **मधुपर्कः** - मधुदधिघृतमिश्रणम्, **गोत्रोच्चारः** - गोत्रजनोल्लेखः, **वंशः** - कुलम्, **अश्मा** - प्रस्तरः, पाषाणशिला।

## स्वाध्यायः

**१. कोष्टकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) ताम्बूलानि पान्तु ......... अस्तु। (बहुफलम्, सौश्रियम्, ऐश्वर्यम्)

(२) गन्धाः पान्तु ......... अस्तु। (बहुफलम्, सौमंगल्यम्, स्वर्चितम्)

(३) मम कन्या प्रदत्ता इति वचने ......... प्रतिवचनम्। (प्रतिगृहीता, अनुगृहीता, विगृहीता)

(४) ॐ चितं च स्वाहा इति ......... होमः। (जया, लाजा, अभ्यातन)

(५) राष्ट्रभृद्धोमे ......... मन्त्राः। (१०, ११, १२)

**२. श्लोकपूर्तिः करणीया।**

(१) कन्यां लक्षणसम्पन्नाम्.........

(२) गौरीकन्यामिमां.........

(३) पृथिव्यादिमहाभूताः.........

**३. मन्त्रपूर्तिः विधेया।**

(१) कोऽदात् कस्मा.........

(२) समंजन्तु विश्वे देवा.........

(३) जरां गच्छ.........

(४) सोमः प्रथमो विविदे.........

(५) अघोरचक्षुपति.........

(६) सा नः पूषा.........

**४. अधस्तनप्रश्नानामेकैकवाक्येन उत्तरं यच्छत।**

(१) आघारहोमे कति आहुतयो भवन्ति ?

(२) लाजाहोमे कति आहुतयो भवन्ति ?

(३) लाजाहोमे कस्या: देवताया: आहूति: होमो भवति ?

(४) राष्ट्रभृद्धोमे प्रथमा आहुति: कस्मै भवति ?

(५) अभ्यातानहोमस्य प्रथम: मन्त्र: क: ?

(६) प्रदक्षिणायां क: कदा अग्रतो भवति ?

(७) प्रदक्षिणा कस्मिन् होमे आगच्छति ?

(८) अश्मारोहणं कुत्र भवति ?

(९) कन्यादानेन के के पुनन्ति ?

(१०) कस्य मातुलपक्षस्य गोत्रोच्चार: भवति ?

(११) नवाहुतिषु अष्टमा आहुति: कस्मै भवति ?

**५. अधस्तनप्रश्नानां विस्तारपूर्वकमुत्तराणि यच्छत।**

(१) कन्यादानसंकल्पे किं फलं दृश्यते ?

(२) कन्यापूजने किं किं भवति?

(३) लाजाहोमं स्पष्टयत।

(४) अभ्यातानहोमे केषां केषां हवनं भवति?

(५) अग्ने: प्रदक्षिणा कया रीत्या भवति?

**छात्रप्रवृत्ति:**

- छात्रा: अन्यान्यज्ञाति-अनुसारं विवाहप्रथां जानीयु:।

**अध्यापकप्रवृत्ति:**

- अध्यापक: विवाहस्य विधिं भिन्नशाखानुसारं श्रुत्यनुसारं च ज्ञापयतु।

•

# १८ विवाहसंस्कारः - ३

**प्रस्तावना**

पूर्वस्मिन् पाठे अस्माभिः प्रदक्षिणापर्यन्तमधीतम्। अस्मिन् पाठे वयं विवाहसंस्कास्य अवशिष्टभागं पठिष्यामः।

**अथ सप्तपदी - ( सप्तपदाक्रमणम् )**

तत्रादौ शिष्टाचारात् अग्नेरुत्तरतः उदक्संस्थानात् सप्ततण्डुलपुञ्जान् कृत्वा वरः तत्र सप्ताचलपूजनं कुर्यात्। यथा - वरो हस्ते जलमादाय देशकालौ संकीर्त्य मम गृहीतकन्यापतित्वसिद्धये सप्ताचलपूजनमहं करिष्ये। क्रमशः वरः कन्याः पादांगुष्ठं प्रत्येकं पुंजं स्पर्शयेत्।

**१. ॐ एकमिषे विष्णुस्त्वा नयतु।**

**२. ॐ द्वे ऊर्जे विष्णुस्त्वा नयतु।**

३. **ॐ त्रीणि रायस्पोषाय विष्णुस्त्वा नयतु।**

४. **ॐ चत्वारि मायोभवाय विष्णुस्त्वा नयतु।**

५. **ॐ पंच पशुभ्यो विष्णुस्त्वा नयतु।**

६. **ॐ षड् ऋतुभ्यो विष्णुस्त्वा नयतु।**

७. **ॐ सखे सप्तपदा भव सा मामनुव्रता भव।**

**कन्याप्रतिज्ञा -**

**कन्या - त्वत्तो मेऽखिलसौभाग्यं पुण्यैस्त्वं विविधैः कृतैः।**
**देवैः संपादितो मह्यं वधूराद्ये पदेऽब्रवीत्॥**

**वरः - त्वत्तो मेऽखिलसौभाग्यं पुण्यैस्त्वं विविधैः कृतैः।**
**देवैः संपादितो मह्यं वर आद्ये पदेऽब्रवीत्॥**

**कन्याः - कुटुम्बं पालयिष्यामि ह्यावृद्धबालकादिकम्।**
**यथा लब्धेन संतुष्टा ब्रूते कन्या द्वितीयके॥**

**वरः - कुटुम्बं पालयिष्यामि ह्यावृद्धबालकादिकम्।**
**यथा लब्धेन संतुष्टा वरो ब्रूते द्वितीयके॥**

**कन्याः - मिष्टान्नव्यञ्जनादीनि काले सम्पादये तव।**
**आज्ञासंपादिनी नित्यं तृतीये साऽब्रवीत् वरम्॥**

**वरः - मिष्टान्नव्यञ्जनादीनि काले सम्पादये तव।**
**आज्ञासंपादिनी नित्यं तृतीये सोऽब्रवीत् वधूम्॥**

**कन्याः - शुचिः शृंगारभूषाऽहं वाङ्मनःकायकर्मभिः।**
**क्रीडिष्यामि त्वया सार्धं तुरीये साऽब्रवीदिदम्॥**

**वरः - शुचिः शृंगारभूषाऽहं वाङ्मनःकायकर्मभिः।**
**क्रीडिष्यामि त्वया सार्धं तुरीये सोऽब्रवीद् वधूम्॥**

**कन्याः - दुःखे धीरा सुखे हृष्टा सुखदुःखविभागीनी।**

**नाहं परतरं यायाम् पंचमे साऽब्रवीत् पतिम्॥**

**वरः - दुःखे धीरा सुखे हृष्टा सुखदुःखविभागीनी।**

**नाहं परतरं यायाम् पंचमे साऽब्रवीद् वधूम्॥**

**कन्याः - यत्र त्वं वा ह्यहं तत्र नाहं वञ्चे प्रियं क्वचित्।**

**नाहं प्रियेण वञ्च्याऽस्मि कन्या षष्ठे पदेऽब्रवीत्॥**

**वरः - यत्र त्वं वा ह्यहं तत्र नाहं वञ्चे प्रियं क्वचित्।**

**प्रियया नात्र वञ्च्योऽस्मि वरः षष्ठे पदेऽब्रवीत्॥**

**कन्याः - सर्वे च साक्षिणस्त्वं मे पतिर्भूतोऽसि साम्प्रतम्।**

**देहो मयाऽर्पितस्तुभ्यं सप्तमे साऽब्रवीत् वरम्॥**

**वरः - सर्वे च साक्षिणस्त्वं मे पत्नि भूताऽसि साम्प्रतम्।**

**देहो मयाऽर्पितस्तुभ्यं सप्तमे सोऽब्रवीदिदम्॥**

इति सप्तपदाक्रमणम्

### अभिषेकः

निष्क्रमणमारभ्य वरः अग्नेर्दक्षिणतः स्थितस्य वाग्यतस्य दृढपुरुषस्य वा स्वस्य स्कन्धधृतोदकुम्भात् हस्तेन जलमादाय एनां वधूं शिरसि आपः शिवाः आपोहिष्ठेति त्रिभिर्मन्त्रैरभिषिञ्चति।

वरस्य मार्जनम् -

**ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्ते कृण्वन्तु भेषजम्।**

### सूर्यदर्शनम्

विवाहदिवसे वरः कन्या कथयेत् - सूर्यमुदीक्षस्व

तत्र मन्त्रः -

**ॐ तच्चक्षुर्देव हितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः॑ शतꣳशृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्।**

### हृदयाभिलम्बनम्

ततो वरो वध्वा दक्षिणस्कन्धोपरि हस्तं नीत्वा मम व्रतेति स्वपठितमन्त्रेण तस्या हृदयमालभते।

**मन्त्रः - ॐ मम व्रते ते हृदयं दधामि मम चित्तमनु चित्तं ते अस्तु। मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम्।**

### वध्वभिमन्त्रणम्

ततो वरः अनामिकाग्रे वधूशिरसि धृत्वा एनामभिमन्त्रयते।

**मन्त्रः - सुमङ्गलीरियं वधूरिमां समेत पश्यत। सौभाग्यमस्यै दत्वा याथाऽस्तं विपरेतन।**

### लौकिकशिष्टाचारः

### सौभाग्यकथनम्

सौभाग्यवत्यः सुवासिन्यः वधूभाले तिलकं कृत्वा तत्पृष्ठतः अक्षतान् हस्तयोः निःक्षिप्य दक्षिणकर्णे एवं कथयेयुः।

**१. ब्रह्मसावित्र्योः सौभाग्यम्**

**२. इन्देन्द्राण्योः सौभाग्यम्**

**३. शिवपार्वत्योः सौभाग्यम्**

**४. लक्ष्मीनारायणयोः सौभाग्यम्**

**अखण्डसौभाग्यवती भव। पुत्रपौत्रवती भव।**

ततो वधूं वरस्य वामभागे उपावेशयति। अत्र च वध्वाः सीमन्ते वरः सिन्दूरं ददाति।

ततस्तां दृढपुरुषेण उन्मन्थ्य अग्नेः प्राग्वा उदग्वा अनुगुप्त आगारे रोहिते आनडुहे चर्मणि उपवेशयति।

**मन्त्रः - इह गावो निषीदन्त्विहाश्वा इह पुरुषाः। इहो सहस्त्रदक्षिणो यज्ञ इह पूषा निषीदतु॥**

### स्विष्टकृद्धोमः

**ॐ अग्नये स्विष्टकृते स्वाहा।** इदमग्नये स्विष्टकृते न मम।

### पूर्णपात्रप्रदानम्

अधुना संस्रवप्राशनम्। पवित्राभ्यां मार्जनम्। अग्नौ पवित्रप्रतिपत्तिः। पूर्णपात्रदानम्।

संकल्पः - कृतस्य कर्मणः सांगतासिद्ध्यर्थं ब्रह्मणे आचार्याय वा पूर्णपात्रं तुभ्यमहं सम्प्रददे॥ प्रणीताविमोकः। आपः शिवाः इति मार्जनम्। परिस्तरणान्युत्तरे विसृजेत्। ततः स्वकीयाय आचार्याय दक्षिणा दातव्या।

यदि वरः ब्राह्मणः तर्हि गां दद्यात्, क्षत्रियश्चेत् भूमिं, वैश्यश्चेत् अश्वं दद्यात्।

अत्र सर्वत्र परम्परा स्वीकर्तव्या।

### ध्रुवदर्शनम्

**ॐ ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रवैधि पोष्ये मयि मह्यं त्वादात्। बृहस्पतिर्मया पत्या प्रजावती सञ्जीव शरदः शतम्॥** ततो विवाहदिनमारभ्य दम्पत्योर्नियमाः। त्रिरात्रम् अक्षारलवणाशिनौ स्याताम्। त्रिरात्रमधः शयीयाताम्। संवत्सरं न मिथुनमुपेयाताम्। द्वादशरात्रं षड्रात्रं त्रिरात्रमन्ततः।

संकल्पः - कृतस्य कर्मणः सांगतासिद्ध्यर्थं यथासंख्याकान् ब्राह्मणान् यथाकाले यथासम्पन्नेन अन्नेनाहं तर्पयिष्ये। तेन कर्माङ्गदेवताः प्रीयन्तां न मम।

कृतस्य होमस्य सांगतासिद्ध्यर्थं नानागोत्रेभ्यो ब्राह्णेभ्यो गन्धादिभिः सम्पूज्य यथोत्साहं दक्षिणां दास्ये।

ततः **शतमिन्नु०** आदिभिः आशिषो देयाः।

### अथ चतुर्थीकर्म

**चरुकंसारभक्षणविधिः -**

विवाहदिवसाच्चतुर्थ्यामपररात्रे भार्यया सह मंगलं स्नात्वाऽहतवाससी परिधाय धृतमंगलतिलकः शुभासने वर उपविशति। तत्र दक्षिणतो वधूः। वरः आचम्य प्राणानायम्य। सुमुखश्चेति पठित्वा।

संकल्पः - अद्येत्यादि०विवाहांगभूतं चतुर्थीकर्म करिष्ये।

तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं करिष्ये।

तदनन्तरं स्थण्डिले पञ्चभूसंस्कारपूर्वकं गृहाग्निमानीय स्थाप्य उत्तरे जलकुम्भस्य स्थापना कर्तव्या। प्रणीता-प्रोक्षण्योः स्थापनं कृत्वा कुशकण्डिका कर्तव्या। अग्नौ चतस्रः आहुतयः देयाः -

ॐ प्रजापतये स्वाहा (तूष्णीम्) इदं प्रजापतये न मम। ॐ इन्द्राय स्वाहा, इदमिन्द्राय न मम। ॐ अग्नये स्वाहा,

इदमग्नये न मम। ॐ सोमाय स्वाहा, इदं सोमाय न मम।

चतुर्थीकर्मणि साक्षिनाम्ने वैश्वानराय नमः। गन्धाक्षतपुष्पाणि समर्पयामि।

**पंच घृताहुतयः -**

१. **ॐ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणास्त्वा नाथकाम उपधावामि याऽस्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा॥** इदमग्नये न मम॥

२. **ॐ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणास्त्वा नाथकाम उपधावामि याऽस्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा॥** इदं वायवे न मम॥

३. **ॐ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणास्त्वा नाथकाम उपधावामि याऽस्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा॥** इदं सूर्याय न मम॥

४. **ॐ चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणास्त्वा नाथकाम उपधावामि याऽस्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा॥** इदं चन्द्राय न मम॥

५. **ॐ गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणास्त्वा नाथकाम उपधावामि याऽस्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा॥** इदं गन्धार्वाय न मम॥ **प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणास्त्वा नाथकाम उपधावामि याऽस्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा॥**

**ततः स्थालीपाकेन एका आहुतिः होतव्या।**

**ॐ प्रजापतये स्वाहा।** इदं प्रजापतये न मम। अत्र नवाहुतयः दातव्याः।

**अधुना ब्रह्मणे पूर्णपात्रं दातव्यम्।**

**- कृतस्य चतुर्थीकर्मणः सांगतासिद्ध्यर्थं ब्रह्मन् पूर्णपात्रं तुभ्यमहं सम्प्रददे।**

पश्चिमे प्रणीताविमोकः। तेन मार्जनम्। ततः उदपात्रेण जलेन वरो वधूमूर्ध्नि अभिषिञ्चति।

तत्र मन्त्रः -

**ॐ या ते पतिघ्नी पशुघ्नी यशोघ्नी निन्दिता जारघ्नी ततऽएनां करोमि सा जीर्य त्वं मया सहासौ।**

अथैनां वधूं स्थालीपाकं वरः प्राशयति। कन्यामात्रा चतुर्वारं परिवेषणं कार्यम्। ततो वर एनां प्राशयति। असौ स्थाने नामग्रहणं करोति वरः। अमुकी देवी इति।

अत्र कन्यायाः नामोच्चारणं कर्तव्यम्।

१. **प्राणैस्ते प्राणान् सन्दधामि।**

२. **अस्थिभिः अस्थीनि सन्दधामि।**

३. **मांसैर्मांसं संदधामि।**

४. **त्वचा त्वचं सन्दधामि।**

ततो वधूः स्वशुद्ध्यर्थमाचामेत्। तत आचार्यो हस्ते अक्षतान् गृहीत्वा।

**उभयोः वधूवरयोः सुप्रतिष्ठितमस्तु।** इति तयोः शिरसि क्षिपेत्। अत्र मनोजूतिः इति मन्त्रं वदेत्।

ततो वरो वधूदक्षिणस्कन्धस्य उपरि हस्तं नीत्वा पठेत्।

**ॐ यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम्। वेदाहं तन्मां तद्विद्यात् पश्येम शरदः शतञ्जीवेम शरदः शतम्।** इति

संकल्पः - कृतस्य चतुर्थीकर्मणः साङ्गतासिद्ध्यर्थं यथासंख्याकान् ब्राह्मणान् कुमारिकाबटून् यथाकाले यथासम्पन्नेन अन्नेन अहं तर्पयिष्ये।

-कृतस्य कर्मणः सांगतासिद्ध्यर्थं नानागोत्रेभ्यो ब्राह्मणेभ्यो यथोत्साहं दक्षिणां दास्ये।

**आशीर्वादः**

**ॐ विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्न ऽ आसुव॥**

**ॐ पुनस्त्वाऽदित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो व्वसुनीथ यज्ञैः।**

**घृतेन त्वं तन्वं व्वर्धयस्व सत्याः सन्तु यजमानस्य कामाः॥**

इति चतुर्थीकर्म

## शब्दार्थाः

**सप्ताचलम्** - सप्तवचनानि, **वरवचनम्** - वरप्रतिज्ञा, **शुचिः** - पवित्रता, **मिथः** - परस्परम्, **सुभगा** - वनिता, **श्वसुरः** - कन्यायाः पिता।

## स्वाध्यायः

**१. कोष्टकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(१) एकमिषे ......... त्वा आनयतु। (विष्णु, रुद्र, ब्रह्म)

(२) द्वे ......... नयतु। (पक्षे, ऊर्जे, गृहे)

(३) पंच ......... नयतु। (गृहेभ्यः, पशुभ्यः, प्रजाभ्यः)

(४) त्वत्तो मेऽखिल .........। (शिवं, भद्रं, सौभाग्यं)

(५) ......... पालयिष्यामि। (गेहं, समाजं, कुटुम्बं)

**२. श्लोकपूर्तिः करणीया।**

(१) त्वत्तो मेऽखिल सौभाग्यं.........

(२) मिष्ठान्नव्यञ्जनादीनि.........

(३) शुचिः शृङ्गारभूषाहं.........

**३. निम्नलिखितानां टिप्पणी कार्या।**

(१) चतुर्थीकर्म

(२) सप्तपदाक्रमणम्

**४. मन्त्रपूर्तिं कुर्वन्तु।**

(१) ॐ गन्धर्व प्रायश्चिते...।

(२) ॐ शतमिन्नु...।

(३) ॐ ध्रुवमसि ध्रुवम्...।

**५. अधोलिखितप्रश्नानां सक्षेपेण उत्तराणि लिखत।**

(१) प्रथममिषे को नयतु ?

(२) सप्तपद्या अपरं नाम लिखतु ?

(३) प्रथमां कन्याप्रतिज्ञां लिखन्तु ?

(४) अभिषेकः कैर्मन्त्रैर्भवति ?

(५) सूर्यदर्शनं कः करोति ?

(९) हृदयाभिलम्बनं कया रीत्या भवति ?

**छात्रप्रवृत्तिः**

- छात्रः विभिन्नश्रौतसूत्रानुसारं विवाहविधिं जानीताम्।

**अध्यापकप्रवृत्तिः**

- अध्यापकः अष्टविधानां विवाहानां विधिं ज्ञापयेत्।

●

# १९ अरणिमन्थनप्रयोगः

**प्रस्तावना**

(प्रतिष्ठादिकर्मसु यज्ञमीमांसादिग्रन्थेषु उत्तमाग्निरूपेण अरणिमन्थनस्य आवश्यकता वर्तते। काष्ठस्य काष्ठेन सह घर्षणेन-मन्त्रोच्चारणेन, अग्निप्रागट्यं भवति तस्य नाम अरणिमन्थनप्रयोगः अनेन मन्थनेन जाताग्नेः फलम् अत्युत्तमं भवति। तेन सर्वकार्यसिद्धिः। केन प्रकारेण अग्न्यु-उत्पादन भवति? इति जिज्ञासापूर्तिहेतवे पठन्तु पाठोऽयम्।)

(ऋच्छति / प्राप्यति अग्निम् इति अरणिः अर्थात् अग्निमन्थनम्)

---




आचम्य प्राणानाम्य। **सङ्कल्पः।** पूर्वोच्चारित-शुभपुण्यतिथौ क्रियमाणे प्रतिष्ठायागकर्मणि होमकर्मसम्पादनहेतवे कुण्डे अग्निप्रतष्ठिार्थं श्रीअरणीकाष्ठाद् अग्न्युत्पादनं करिष्ये।

**तदङ्गभूतं गणपतिस्मरणं पञ्चवाक्यैः पुण्याहवाचनम्।**

**सङ्कल्पः।** अस्य श्रीअरण्याः श्रीपवमानऋषिः श्रीअग्निर्देवतावर्षसहस्त्रानवच्छिन्न-महदैश्वर्यसम्पादनपूर्वकं दिव्यदेह-प्राप्तिफलसिद्ध्यर्थं श्रीअरणीकाष्ठाद् अग्न्युत्पादने विनियोगः॥

ततः कुण्डे स्वर्णखण्डं रजतखण्डं वा निक्षिप्य वस्त्रेण आच्छाद्य अरणीग्रहणं कुर्यात्।

आचार्यपूजनम् -

**ॐबृहस्पतेऽअतियदर्योऽअर्हाद्युमद्विभातिक्क्रतुमज्जनेषु।**

**यद्दीदयच्छवसऽऋतप्प्रजाततदस्मासुद्रविणं धेहि चित्रम्॥**

**आचार्यः** अरणी यजमानाय दद्यात्।

**आचार्यः** इष्टापूर्तस्मार्ताग्निसाधनभूते योनिरूपे इमे अरणी युवाभ्याम्

प्रतिगृह्णीताम्। **इयमधरा इयमुत्तरा।**

**यजमानदम्पती** - ॐ प्रतिगृह्णामि।

**ब्रह्मा** - इदं चात्र, इदम् ओबिली, इदं नेत्रम्,

इमानि सुवादीनि पात्राणि प्रतिगृहाण।

**यजमानदम्पती** - ॐ प्रतिगृह्णामि।

पत्नी तु यजमानहस्तात् अधरारणीम् अङ्के निदधाति। यजमान अपि उत्तरारणिम् अङ्के-निदधाति। उभौ अरण्योः पूजां कुरुतः।

प्राग्ग्रीव-उत्तरलोमकृष्णाजिनकम्बलोपरि समास्तीर्य तस्योपरि उदयगग्राम् अधरारणि निधाय ध्यायेत्।

**ध्यानम्** सर्वदेवमयीं देवीं अरणीं रूपधारिणीम्। ध्यायामि शमिगर्भस्थां यज्ञकार्यप्रवर्तिनीम्।

ॐ भूर्भुवः स्वः अग्न्युत्पादनहेतुभूताभ्यामुर्वशीपुरूरवास्वरूपिभ्यामधरोत्तरारणीभ्यां नमः ध्यायामि।

**आवाहनम् : मन्त्रःॐ अग्नेर्जनित्रमसि वृषणौ स्त्यऽउर्व्वश्यस्यायुरसि पुरूरवाऽअसि।**

**गायत्रेण त्वाच्छन्दसामन्थामि त्रैष्टुभेनन्त्वाछन्दसामन्थामिजागतेनत्वाछन्दसामन्थामि॥**

**श्लोकाः**

अग्निमन्थोजयः जेतुः अरणीगणकारकः। जयाजयन्तीनर्कारिनादेवी वैजयन्तिका॥

मन्थः श्रीपर्णी चैतानि नामान्युक्तानि वै तव। आवाहयामि यज्ञार्थं वरदाभव मे सदा॥

ॐ भूर्भुवः स्वः अग्न्युत्पादनहेतुभूताभ्याम् उर्वशीपुरूरवास्वरूपिभ्याम् अधरोत्तरारणीभ्यां नमः ध्यायामि। यथालाभोपचारैः पूजयेत्।

**प्रार्थना : मन्त्रःॐ भवतन्नः समनसौ सचैतसावरेपसौ।**

**भा यज्ञꣳहिꣳसिष्टंम्मायज्ञपतिंजातवेदसौशिवौभवतमवद्द्यनः॥**

**श्लोकः**

नमस्ते सर्वदे भद्रे शिवे भव महेश्वरि। या लक्ष्मीः सर्वभूतानां या च देवेष्ववस्थिता।

**सरलार्थः** हे अरणि! त्वं भद्रा, शिवा, माहेश्वरी, लक्ष्मीः सर्वभूतानां देवेषु च अवस्थिता असि।

**श्लोकः** अरणीरूपा सा देवी मम शान्तिं प्रयच्छतु। सर्वदेवयी देवीं सर्ववंदमयी शुभा।

**सरलार्थः** अरणिस्वरूपा सा देवी मम शांतिं प्रयच्छतु।

त्वमेव सर्वदेवमयी, शुभाकल्याणकर्त्री अस्ति, सा मम रक्षां करोतु।

**श्लोकः** अरणीरूपा सा देवी मम शान्तिं प्रयच्छतु। सर्वलोकनिमित्तायै सर्वलोकेष्ववस्थिता।

**सरलार्थः** अरणिस्वरूपा सा देवीमह्यं शांतिं प्रयच्छतु। सर्वलोकस्यनिमित्त-स्वरूपा एवं सर्वलोकेषु प्रतिष्ठितावर्तते। अरणीरूपा सा मह्यं कल्याणं प्रददातु। एवं सम्प्रार्थ्य।

**सङ्कल्पः** कृतेन पूजनेन श्रीउर्वशीपुरूरवास्वरूपिणी अधरोत्तरणी प्रीयेतां न मम।



**अग्न्युत्पादनम्**

सपत्नीको यजमान: अग्न्युत्पादनहेतवे अधरारण्याम् उक्तप्रदेशे प्रमथमन्थमूलं निधाय चात्राग्रे चोवलीमुदगग्रां च नेत्रेण चात्रं त्रिर्वेष्टयित्वा गाढं धृत्वा तस्यां योनौ उत्तरारणिम् आज्यलिप्तां कृत्वा पश्चिमाभिमुखोपविष्टया पत्न्यामन्थयेत् यावदग्रेरुत्पत्ति: पत्न्यामन्थयेत्। यावदग्नेरुत्पत्ति: पत्न्यामन्थनासमर्थे अन्ये ब्रह्मणा: मन्थयन्ति। एवम् अन्ये यजमाना: अपि मन्थयन्ति।

**अरणिमन्थनप्रयोग:**

मन्थनकाले ब्राह्मणा: अधोलिखितान् मन्त्रान् पठेयु:।

**यजुर्वेदीयमन्त्रा:** -

**१. समास्त्वाग्नऽऋतवोव्वर्धयन्तु संवत्सराऽऋषयोयानि सत्या।**
**संदिव्येन दीदिहिरोचनेन व्विश्वाऽआ भाहि प्प्रदिशश्चतस्त्र: ॥ 1/27 ॥**

**२. संचेध्यस्वाग्ने प्र च बोधयैनमुच्चतिष्ठ महते सौभगाय।।**
**मा च रिषदुपसत्ता तेऽअग्ने ब्रह्माणस्ते यशस: सन्तु मान्ये ॥ 2/27 ॥**

**३. त्वामग्ने वृणते ब्ब्राह्मणाऽइमे शिवोऽअग्ने संव्वरणे भवा न:।**
**सपत्नहा नोऽअभिमातिजिच्च स्वे गये जागृह्यप्प्रचुच्छन् ॥ 3/27 ॥**

**४. इहैवाग्नेऽअषिधारयारयिम्मात्त्वानिक्क्रन्पूर्वचितोनिकारिण:।**
**क्षत्रमग्ने सुयममस्तु तुब्भ्यमुपसत्ता वर्घतां तेऽअनिष्टृत:** ॥ 4/27 ॥

**५. क्षत्रेणाग्ने स्वायु: सद्ँरभस्वमित्रेणाग्ने मित्रधेयेयतस्व।**
**सजातानां मध्यमस्थाऽ एधिराज्ञामग्ने व्विहव्ळयोदीदिहीह** ॥ 5/27 ॥

**६. अतिनिहोऽअति स्त्रिषोत्यचित्तिमयरातिमग्ग्ने।**
**व्विश्वाहयग्ने दुरिता सहस्वाथास्म्मब्भ्यदँ सहवीराँरयिंदा:** ॥ 6/27 ॥

**७. अनाधृष्ष्योजातवेदाऽअनिष्टृतो व्विराडग्ने क्षत्रभृद्दी दिहीह।**
**व्विश्वाऽआशा: प्रमुञ्चन्मानुषीर्भिय: शिवेभिरद्य परि पाहिनोव्वृधे** ॥ 7/27 ॥

**८. बृहस्पते सवितर्बोधयैन ँ स ँशितं चित्सन्तराँ स ँशिशाधि।**
**व्वर्घयेनं महते सौभगायव्विश्वऽएनमनु मदन्तु देवा:** ॥ 8/27 ॥

**९. अमुत्रभूयादधयद्यमस्यबृहस्पते ऽ अभिसस्ते रमुञ्च:।**
**प्रत्यौहतामश्विनामृत्युमस्माद्देवानामग्ग्ने भिषजाशचीभि:** ॥ 9/27 ॥

**अथर्ववेदीयमन्त्रा:** - 15 **काण्ड: ॥**

मन्थनोत्तरं तदङ्गत्वेन आचार्यायाज्ञां दद्यात्।

तत: मृण्मयपात्रे शुष्कगोमयचूर्णं नारिकेलजटां गुग्गुलं च स्थापयित्वा तस्मिन् पात्रे अग्निम्-आहृत्य वेणुनलिकया प्रज्वालयेत् पूजयेत् च॥

**शब्दार्था:**

**अरणि:**=मन्थनकार्ये उपरि स्थापितं काष्ठम्, **इष्टापूर्तम्**=यज्ञादिधार्मिककर्कार्याणि एवं लोकोपकारकार्याणि, **ओबिली**=मन्थनार्थं काष्ठपात्रम्, **कृष्णाजिनम्**=कृष्णमृगस्य चर्म, **कम्बलम्**=उष्णवस्त्रम्, **मृण्मयपात्रम्**=मृदानिर्मितं पात्रम्

## स्वाध्यायः

**१. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वारिक्तस्थानानि पूरयत।**

(१) आचार्यप्रदत्तारणिं नीत्वा यजमानः आचार्याय ........ उत्तरं ददाति। (प्रतिगृह्णावः, प्रतिरोध;उपविशतु)

(२) अरणिमन्थनेन ........ भवति। (अग्निविसर्जनम्, वरुणस्थापनम्, अग्न्युत्पादनम्)

(३) अन्युत्पादनम् ........ काष्ठेन भवति। (उदुम्बरकाष्ठेन, अरणिकाष्ठेन, प्लक्षकाष्ठेन)

(४) अरणिरूपा देवी मह्यं ........ प्रयच्छतु। (शान्तिम्, कान्तिम्, क्रान्तिम्)

(५) प्रज्वलिताग्निं ........ पात्रे स्थापनीयम्। (लोहपात्रे, मृण्मयपात्रे, ताम्रपात्रे)

**२. निम्नलिखितप्रश्नानाम् एकवाक्येन उत्तरं लिखत।**

(१) उर्वशीपुरूरवास्वरूपा काऽस्ति?

(२) अरणिमन्थने कः ऋषि?

(३) अस्मिन् प्रयोगे आचार्यपूजनं केन मन्त्रेण अस्ति?

(४) कुण्डे किं निक्षिप्य अरणिग्रहणं कुर्यात्?

(५) यजमानाय अरणिंमन्थनसमये अरणिं कः ददाति?

**३. निम्नलिखितप्रश्नानाम् सविस्तरम् उत्तरं लिखत।**

(१) अरणिंप्रार्थनां विलिख्य श्लोकार्थो लेख्यः।

**४. निम्नलिखितश्लोकानां पूर्तिं कुरुत लिखत।**

(१) सर्वदेवमयी देवी ......... प्रवर्तिनीम्।

(२) मन्थः श्रीपर्णी ......... भव मे सदा।

(३) सर्वलोकनिमि ......... शान्तिं प्रयच्छतु।

**५. निम्नलिखितमन्त्राणां पूर्तिं कृत्वा भावार्थं लिखत।**

(१) अग्नेर्जनित्रमसि ......... मन्थामि।

(२) समास्त्वाग्न ......... प्रदिशष्चतस्रः।

(३) संचेध्यस्वाग्ने ......... सन्तु मान्ये।

**छात्रप्रवृत्तिः**

- छत्राः अग्निसूक्तस्य मुखपाठं कुर्युः॥

**शिक्षकप्रवृत्तिः**

- शिक्षकः छात्रैः वर्गे प्रायोगिकम् अरणीमन्थनं कारयेत्।

# २० कालसर्पप्रयोगः

**प्रस्तावना**

अस्माकं भारतीयवैदिक-सनातन-परम्परा जगति सर्वोत्कृष्टा प्रमाणीभूता च वर्तते।

अनया-परम्परा-आगता-गता च परं भारतीय - वैदिकी - सांस्कृतिकी - परम्परा चिरस्थायिनी सुरक्षिता, दृढा च अनुभूयते। संसारेऽस्मिन् मानवजीवने सुखदुःखयोः सङ्गमः दरीदृश्यते पुण्यफलं सुखं, पापफलं दुःखमिति।

---

भगवता श्रीकृष्णेन स्वयम् अर्जुनाय गीतायां उपदिष्टम् -

**अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्॥ गीता - १८-१२॥**

वेदानां षडङ्गानि - शिक्षा, कल्प, निरुक्तम्, व्याकरणम्, ज्योतिषम्, छन्दः तत्र ज्योतिषं नयनं स्मृतम्, ग्रहगणितं ज्योतिषम्।

पूर्वजन्मनि कृतं कर्म अस्मिन् जन्मनि शुभाशुभ-योगत्वेन मानवानां जन्मकुण्डल्यां जन्मावसरे जायते तेन मानव जीवने सुखदुःखञ्च अनुभूयते। केनचित् पूर्वजन्मनि सर्पग्रहण-ताडन-वधादिदोषः कृतश्चेत् तदा तस्य अस्मिन् जन्मनि राहुकेत्वोर्मध्ये सर्वे ग्रहाः मुख-पुच्छमध्यस्था भवन्ति तदानीमयं योगः जातकस्य जनुभवे कालसर्पप्रयोगः सम्भवन्ति, अस्य योगस्य नागदोष इति अपरा संज्ञा वर्तते। योगोऽयं महापुरुषयोगेतिनाम्नापि प्रसिद्धः। अतः केषाञ्चित् महानुभावानां जन्मकुण्डल्यां कालसर्प-योगः दृश्यते। अतः ते अपि बहुधा प्रसिद्धिम् अवाप्य कुत्रचित् विषये सुखानुभूतिः न प्राप्ता। बहुधा प्रायः द्वादशप्रकारेण अस्य गणना गणिता, तदर्थं संशोधनीयोऽयं विषयोऽस्ति। राहोः अधिदेवता नर कालः तथा प्रत्यधिदेवता सर्पः ग्रहशान्त्यथम् अधिदेव-प्रत्यधिदेवतानां पूजा कर्तव्या। अतः "कालसर्पशान्तिः" नामकः योगः प्रसिद्धः।

अग्रेराहुरधः केतुः सर्वे मध्यं गताः ग्रहाः।
योगोऽयं कालसर्पाख्यो शीघ्रं तं तु विनाशय॥

सर्पस्य मुखं राहुः सर्पस्य पुच्छः केतुः भवति। ग्रहाणां पूजा, जपः, दशांशहोमः, ब्रह्मभोजनम्, दानञ्च आवश्यकमेव मन्त्र-जपार्थं शिव-मन्दिराणि उत्तमं स्थलम्।

सर्वजनहिताय - सर्वजनसुखाय च अस्मिन् प्रकरणे कालसर्पयोगः (शान्तिप्रयोगः) समाविष्टः।




**कालसर्पयोगकुण्डली**

- **कालसर्पयोगस्य लक्षणानि**

विवाहे विलम्बः, गृहे क्लेशः, दाम्पत्यजीवने असंतोषः, विलम्बेन सन्तानप्राप्तिः, अयोग्यसन्ततिः मानवजीवने मानसिकी अशान्तिः विद्यार्थी अवस्थायां विद्याभ्यासे वारं वारं, विक्षेपः, वाणिज्ये अनिश्चितता, धनहानिः, दारिद्र्य योगः, जीवने नैराश्यम् दुःस्वप्नदर्शनं त्रिविधताप-पीडा भवति चेत् तदा कालसर्पयोगस्य सम्भावना वर्तते।

● **कदा कुत्र कर्तव्योऽयं विधिः**

प्रायः अमावास्यां तिथौ बुधवासरे श्रेष्ठः योग भवति तदा अयं विधिः कर्तव्यः तथा च केचन आश्लेषा नक्षत्रदिने पञ्चम्यां - नवम्यां - चतुर्दश्यां वा सोमवासरे अपि कुर्वन्ति।

अयं विधिः जलप्रधाने तीर्थक्षेत्रे संगमे शिवालये शिवसन्निधौ अथवा गृहे भवति (गृहस्थस्य क्रिया सर्वा न सिद्धयति गृहं विना)

**अस्य प्रधानदेवता स्थापनम्**

**नैर्ऋत्ये** - राहुः

**वायव्याम्** - केतुः/कालः

**मध्ये** - नव-सर्पाः

**ईशाने** - रुद्रः - मृत्युञ्जयः

**नागमण्डलोपरि** - मनसादेवी - अमृतरक्षिणी

**राहुकृते** - कृष्णवस्त्रं - कृष्णघटः कृष्णमुद्राः वा कृष्णमासाः (अडद) स्थापनम्

**रुद्रकृते** - कृष्णतिलाः वा अभावे अक्षतैः स्थापनम्।

'श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत्' अत्र शान्तिकामना वर्तते अतः ग्रहयज्ञः करणीयः।

**पूजने विशेषः** - नीलवस्त्रं - कुंकुमं - चन्दनं - अगुरुचन्दनं - नीलपुष्पाणि - नीलाक्षताः - लाक्षाधूपः - घृतदीपः मासान्ननैवेद्यम्॥

सुखासने कृतनित्यक्रियो यजमानो धौते वाससी परिधाय उपविश्य आचम्य प्राणानायम्य भस्मधारणपूर्वकं सुतिलकं कंकणबन्धनं कृत्वा देवब्राह्मणान् नमस्कृत्य, प्रायश्चित्तं विधाय, प्रधानसङ्कल्पं कुर्यात्। यथा -

● विष्णुर्विष्णुर्विष्णुरित्यादि विष्णुस्मरणपूर्वकं गोत्रोच्चारसमन्वितम् अद्येत्यादिशुभपुण्यतिथौ - अमुकगोत्रोत्पन्नः अमुकशर्मा/वर्मा/गुप्तः अहं मम / मम पुत्रस्य / मम कन्यायाः पूर्वजन्मनि सर्पग्रहण - ताडनात् अथवा वधादिदोषप्रभावात् अस्मिन् जन्मनि जन्मकुण्डल्यां राहु-केतुसंज्ञकक्रूरग्रहान्तरालस्थित-सूर्यादिसकलग्रहजनित-कालसर्पनामक - अनिष्टयोगः तेन योगदोषात् इह जन्मनि अनपत्यता, असाध्यरोगः, विवाहे विलम्बः, व्यापारे हानिः, समाजे अप्रतिष्ठा, दुःख-दारिद्रय-दौर्भाग्यादिदोषपरिहारार्थं नवनागदेवताप्रसन्नताप्राप्त्यर्थं सग्रहमखां कालसर्पयोगशान्तिं करिष्ये।

तत्रादौ निर्विघ्नतासिद्धयर्थं गणपतिपूजनं, पुण्याहवाचनं वसोर्धारासमन्वितमातृकापूजनम्, आयुष्यमन्त्रजपं, नान्दीश्राद्धम्, आचार्यादि - ऋत्विगवरणम्, अग्निप्रतिष्ठादिकर्म करिष्ये। ततः दिग्रक्षणादारभ्य अग्निस्थापनान्तं कर्म समाप्य प्रधानदेवतावाहनादिकं कार्यम्।

मध्यपीठे कृष्णवस्त्रं प्रसार्य तदुपरि माषैः अष्टदलं विलिख्य मध्ये प्रधानकलशं संस्थाप्य दिक्षु विदिक्षु अन्यान् अष्टकलशान् तेषु पूर्णपात्रोपरि पूर्वप्रतिष्ठितनवनागदेवताः संस्थाप्य - आदौ मध्यकलशपूर्णपात्रोपरि क्षौमं वस्त्रं प्रसार्य पीठपूजां कुर्यात्।

● **पीठपूजा**

हस्ते अक्षतान् गृहित्वा -

ॐ मं मण्डूकाय नमः (आदौ ॐकारः अन्ते च नमः इति सर्वत्र व्याहरेत्) आं आधारशक्त्यै। मूं मूलप्रकृत्यै। कं कालाग्निरुद्राय। आं आदिकूर्माय। अं अनन्ताय। आं आदिवराहाय। पं पृथिव्यै। हं हेमगिरये। नं नन्दनोद्यानाय। कं कल्पवृक्षाय। मं मणिभूतलाय। दं दिव्यमण्डपाय। सं स्वर्णवेदिकायै। वै वैराग्याय। ऐ एश्वर्याय। अं अनैश्वर्याय। सत्त्वाय

प्रबोधात्मने। रजसे प्रकृत्यात्मने। तमसे मोहात्मने। दशकलात्मने वह्निमण्डलाय। द्वादशकलात्मने सूर्यमण्डलाय। षोडशकलात्मने सोममण्डलाय। मां मायातत्त्वाय। विं विद्यातत्त्वाय। शं शिवतत्त्वाय। ब्रं ब्रह्मणे। मं महेश्वराय। आं आत्मने। अं अन्तरात्मने। पं परमात्मने। जीं जीवात्मने। ज्ञां ज्ञानात्मने। कं कन्दाय। नं नीलाय। मं महापद्माय। रं रत्नेभ्यः। कं केसरेभ्यः। कं कर्णिकायै। इति पीठदेवताः नमस्कृत्य। पीठदेवताभ्यो नमः इति संपूज्य। तदुपरि भूर्जपत्रे अथवा ताम्बूलोपरि बिन्दुत्रिकोण-षट्कोण-चतुरस्र-अष्टकोणयन्त्रं विलिख्य तदुपरि सर्पाकाराकृतिं कृत्वा वा ताम्रपत्रे लिखितं सर्पयन्त्रं प्रतिष्ठामययन्त्रं पूजयेत्। यथा-मध्ये-अनन्ताय नमः। आग्नेय्यां-गरुडाय नमः। नैर्ऋत्यां-व्यासाय नमः। वायव्यां - दुर्गायै नमः। ईशाने - सरस्वत्यै नमः। पूर्वे - ऐश्वर्याधिपतये वरुणाय नमः। दक्षिणे - धर्माधिपतये सोमाय नमः। इत्यावाह्य, प्रतिष्ठाप्य, यन्त्रस्थदेवताभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि, नमस्करोमि इति सम्पूज्य नमस्कृत्य च। मध्यपीठस्य पूर्वाद्यष्टदिक्षु अष्ट-भैरवान् स्थापयेत्

यथा - पूर्वे - असिताङ्गभैरवाय नमः। आग्नेय्याम् - रुरुभैरवाय। दक्षिणे - चण्डभैरवाय। नैर्ऋत्याम् - क्रोधभैरवाय। पश्चिमे-उन्मत्तभेरवाय। वायव्याम् - कपालभैरवाय। उत्तरे - भूषणभैरवाय। ऐशान्याम् - संहारभैरवाय। इत्यावाह्य प्रतिष्ठाप्य असिताङ्गादिभैरवेभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि॥

- **कालपुरुषपूजनम्**

ततः मध्यपीठस्य दक्षिणस्यां दिशि एकस्मिन् पूगीफले कालपुरुषम् आवाह्य पूजयेत्

**ध्यानम्**

**ॐ कार्षिरसि समुद्रस्य त्त्वा क्षित्त्याऽउन्नयामि। समापोऽअद्भिरग्मत समोषधीभिरोषधीः॥**

एह्येहि दण्डायुध धर्मराज कालाञ्जनामाल विशालनेत्र।
विशालवक्षस्थल रुद्ररूप गहाण पूजां भगवन्नमस्ते॥
यमो निहन्ता पितृधर्मराजः वैवस्वतो दण्डधरश्च कालः।
प्रेताधिपो दत्तकृतानुसारी कृतान्त एतत् दशभिर्जपन्ति॥

ह्रीं कालाय नमः कालम् आवाहयामि स्थापयामि। कालपुरुषाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि। हस्ते गन्धाक्षतपुष्पाणि गृहित्वा नामपूजां कुर्यात् - ॐ यमाय नमः। धर्मराजाय। मृत्यवे। अंतकाय। वैवस्वताय। कालाय। सर्वभूतक्षपाय। औदुम्बराय। दध्नाय। नीलाय परमेष्ठिने। वृकोदराय। चित्राय। चित्रगुप्ताय। इति संपूज्य प्रार्थयेत् -

महिषस्थ नमस्तेऽस्तु धर्मराज मनोस्तुऽते।
ईषत्पीन नमस्तेऽस्तु दण्डहस्त नमोऽस्तु ते॥
धर्मराज महाकाय दक्षिणाधिपते प्रभो।
रक्तेक्षण महाबाहो मम पीडां निवारय॥

हस्ते जलमादाय - अनेन पूजनेन कालपुरुषः प्रीयताम्।

- **सर्पदेवतापूजनम्**

**( १ ) मध्यकलशे अनन्तः**

**ॐ तन्मित्रस्य व्वरुणस्याभिचक्षे सूर्ष्यो रूपङ्कृणुते द्यौरुपस्थे।**
**अनन्तमन्न्यद्दृशषदस्य पाजः कृष्णमन्न्यद्धरितः सम्भरन्ति॥ 33/38॥**
**अनन्तं सर्वनागानामधिपं विश्वरूपिणम्। जगतां शान्तिकर्तारं मण्डले स्थापयाम्यहम्॥**
**योऽसौनागानामधिपं ब्रह्माण्डं सचराचरम्। पुष्पवद् धारयेत् मूर्ध्नि तस्मै नित्यं नमो नमः॥**

**अनन्तं विप्रवर्णं च तथा कुङ्कुमवर्णकम्। फणासहस्रसंयुक्तं तं देवं स्थापयाम्यहम्॥**

विप्रवर्णाय कुंकुमरूपाय सहस्त्रफणामण्डलविभूषिताय श्रीअनन्ताय नमः अनन्तम् आवाहयामि स्थापयामि।

**अनन्तस्य दक्षिणपार्श्वे राहुः -**

**ॐ कयानश्चित्रऽआ भुवदूती सदावृधः सखा। कया शचिष्ठया वृता॥** 4/36॥

अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम्। सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहम्॥

ॐ राहवे नमः राहुम् आवाहयामि स्थापयामि।

**अनन्तस्य वामपार्श्वे केतुः -**

**केतुं कृण्वन्नकेतवे पेशोमर्याऽअपेशसे। समुखद्भिरजायथाः॥ 29/37॥**

पलाशपुष्पसंकाशं तारकाग्रहमस्तकम्। रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम्॥

ॐ केतवे नमः केतुम् अवाहयामि स्थापयामि।

**( २ ) पूर्वकलशे वासुकिः**

**ॐ देहि मे ददमि ते नि मे धेहि नि ते दधे। निहारं च हरासि मे निहारं निहाराणि ते स्वाहा॥ 3/50॥**

क्षत्रवर्णं पीतरूपं फणैः सप्तशतैर्युतम्? युक्तमुत्तङ्गकायं च वासुकिं स्थापयाम्यहम्॥

क्षत्रवर्णाय पीतरूपाय सप्तशतफणामण्डलविभूषिताय श्रीवासुकये नमः वासुकिम् आवाहयामि स्थापयामि।

**( ३ ) आग्नेयकलशे शेषः**

**ॐ व्विष्णोर्नु कं व्वीर्याणि प्रवोचं यः पार्थिवानि व्विममे रजाꣳसि।**

**योऽअस्कमायदुत्तरꣳ सधस्थं व्विचक्रमाणस्त्रेधोरुगायो विष्णवे त्त्वा॥ 5/18॥**

विप्रवर्णं श्वेतरूपं सहस्रफणसंयुतम्। स्थापयामि च तं देवं शेषं वै विष्णुरूपिणम्॥

विप्रवर्णाय श्वेतरूपाय सहस्त्रफणामण्डलविभूषिताय उत्तुङ्गकायाय श्रीशेषाय नमः शेषम् आवाहयामि स्थापयामि।

**( ४ ) दक्षिणकलशे पद्मनाभः**

**ॐ उग्रल्लोहितेन मित्रꣳ सौव्व्रत्येन रुद्रं दौर्व्रत्यनेन्द्रं प्रक्रीडेन मरुतो बलेन साध्यान् प्रमुदा।**

**भवस्य कण्ठ्यꣳ रुद्रस्यान्तः पाश्व्यंम्महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत्॥ 39/9॥**

वैश्यवर्णं नीलरूपं फणैःपञ्चशतैर्युतम्। युक्तमुत्तुङ्गकायं च पद्मनामं नमाम्यहम्॥

वैश्यवर्णाय नीलरूपाय पञ्चाशत् फणामण्डलविभूषिताय श्रीपद्मनाभाय नमः पद्मनाभम् आवाहयामि स्थापयामि।

**( ५ ) नैर्ऋत्यकलशे कम्बलः**

**ॐ सीसेन तन्त्रं मनसा मनीषिणऽऊर्ण्णासूत्रेण कवयो वयन्ति।**

**अश्विना यज्ञꣳ सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यन्॥ 19/80॥**

कम्बलं शूद्रवर्णं च शतत्रयफणैर्युतम्। स्थापयामि च नागेशं प्रणमामि पुनः पुनः॥

शूद्रवर्णाय नीलरूपाय त्रिशतफणामण्डलविभूषिताय श्रीकम्बलाय नमः कम्बलम् अवाहयामि स्थापयामि।

**( ६ ) पश्चिमकलशे शङ्खपालः**

**ॐ अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः। तमीमहे महागयम्।**

**उपयामगृहीतो स्यग्नये त्वा व्वर्च्चसऽएष के योनिरग्नये त्त्वा व्वर्चसे।**

**शङ्खपालं क्षत्रवर्णं पीतं सप्तशतैर्युतम्। युक्तमुत्तुङ्गकायं च शिरसा प्रणमाम्यहम्॥**

**क्षत्रियवर्णाय पीतरूपाय सप्तशतफणामण्डलविभूषिताय श्रीशङ्खपालाय नमः शङ्खपालम् अवाहयामि स्थापयामि।**

**( ७ ) वायव्यकलशे कर्कोटकः**

**ॐ सोमाय कुलुंगऽआरण्यो षोनकुलः शका ते पौष्णाः क्रोष्टा मायोरिन्द्रस्य गौरमृगः पिद्वो न्यंकुः कक्कटस्तेनुमत्यै प्रतिश्रुत्कायै चक्रवाकः॥ 24/32॥**

शूद्रवर्णं श्वेतरूपं शतत्रयफणायुतम्। युक्तमुत्तुङ्गकायं च कार्कोटं प्रणमाम्यहम्॥

शूद्रवर्णाय श्वेतरूपाय त्रिंशत्फणामण्डलविभूषिताय श्रीकम्बलाय नमः कार्कोटम् अवाहयामि स्थापयामि।

**( ८ ) उत्तरकलशे कालियः**

**ॐ पुरुषमृगश्चन्द्रमसो गोधा कालका दार्वाघाटस्ते वनस्पतीनां कृकवाकुः सवित्रो ह ꣳ सो वातस्य नाक्रो मकरः कुलीपयस्तेकूपारस्य ह्रियै शल्यकः॥ 24/35॥**

कालियं पन्नगाधीशं फणानेकशतं वलम्। कालाग्निमिव दुर्धर्षं तेजसादित्यसन्निभम्॥

दिव्याम्बरधरं दीप्तं रत्नकुण्डलमण्डितम्। ब्रह्माण्डाधारसम्भूतं यमुनान्तरवासिनम्॥

शूद्रवर्णाय कृष्णरूपाय अनेकशतफणामण्डलविभूषिताय श्रीकालियाय नमः कालियम् आवाहयामि स्थापयामि।

**( ९ ) ऐशानकलशे तक्षकः**

**ॐ नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेम्यः कर्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः॥ 16/27॥**

वैश्यवर्णं नीलरूपं फणै पञ्चशतैर्युतम्। युक्तमुत्तुङ्गकायं च तक्षकं स्थापयाम्यहम्॥

वैश्यवर्णाय नीलरूपाय पञ्चशतफणामण्डलविभूषिताय श्रीतक्षकाय नमः तक्षकम् आवाहयामि स्थापयामि।

इत्यावाह्य। ॐ मनोजूतिरिति मन्त्रेण प्रतिष्ठाप्य। उपचारमन्त्रैः, नाममन्त्रैः, ॐ सर्पेभ्यो नमः इति मन्त्रेण वा यथाशक्ति पूजयेत्। तत्र पूजाविधौ ध्यानावाहनाद्यनुक्रमे पुष्पार्पणानन्तरम्।

- **अङ्गपूजा**

सहस्रफणाय नमः - पादौ पूजयामि। गूढगुल्फाय नमः गुल्फौ पूजयामि। हेमजङ्घाय नमः जङ्घे पूजयामि। मन्दतीव्रगतये नमः जानुनी पूजयामि। कञ्चुकीधराय नमः कटीं पूजयामि। गम्भीरनाभाय नमः नाभिं पूजयामि। वातरशनाय नमः उदरं पूजयामि। मणिधराय नमः हस्तौ पूजयामि। उरगाय नमः स्तनौ पूजयामि। कालियाय नमः कण्ठं पूजयामि। विषवक्त्राय नमः वक्त्रं पूजयामि। फणिधराय नमः ललाटं पूजयामि। सुलक्षणाय नमः शिरः पूजयामि। अनन्ताय नमः सर्वाङ्ग पूजयामि।

- **नामपूजा**

ॐ उरगाय नमः। पन्नगाय नमः। शङ्करभूषणाय नमः। अनन्तफणाभूषणाय नमः। पातालवासिने नमः। यमुनान्तरवासिने नमः। नागेन्द्राय नमः। नागकन्यापरिवृताय नमः। नागलोकाधिपतये नमः। (अवकाशे सति अष्टोत्तररशतोत्तरसहस्त्रनामभिः वा पूजनं कर्तुं शक्यते।)

ततः सौभाग्यद्रव्यादारभ्य समाप्तिपर्यन्तं पूजनं कृत्वा अन्ते प्रार्थना- नमोऽस्तु सर्पेभ्यो०॥

ब्रह्मलोके च ये सर्पाः शेषनागपुरोगमाः। नमोऽस्तु तेभ्यः सुप्रीताः प्रसन्नाः सन्तु मे सदा॥

विष्णुलोके च ये सर्पा वासुकिप्रमुखाश्च ये। नमोस्तु०॥

रुद्रलोके च ये सर्पास्तक्षकप्रमुखाश्च ये। नमोस्तु०॥

खाण्डवस्य तथा दाहे स्वर्गं ये च समाश्रिताः। नमोस्तु० ॥

सर्पसत्रे च ये सर्पाः आस्तिकेन च रक्षिताः। नमोस्तु० ॥

प्रलये चैव ये सर्पाः कर्कोटप्रमुखाश्च ये। नमोस्तु० ॥

धर्मलोके च ये सर्पाः वैतरण्यां समाश्रिताः। नमोस्तु० ॥

ये सर्पाः पार्वतीयेषु दरीसन्धिषु संस्थिताः। नमोस्तु० ॥

ग्रामे वा यदि वाऽरण्ये ये सर्पा बिलसंस्थिताः। नमोस्तु० ॥

रसातले च ये सर्पाः अनन्ताद्या महाबलाः। नमोस्तु० ॥

कल्याणरूपं फणिराजमग्र्यं नानाफणामण्डलराजमानम्॥

भक्त्यैकगम्यं जनताशरण्यं भजाम्यहं नः स्वकुलाभिवृद्ध्यै।

राहु-केतुसमन्वित-अनन्तादिनागदेवताभ्यो नमः प्रार्थनापूर्वकं नमस्करोमि।

**हस्ते जलमादाय** - अनेन कृतेन पूजनेन राहुकेतुसहित-अनन्तादिनवनागदेवताः प्रीयन्ताम्

- **होमविधिः**

हस्तप्रमाणं स्थण्डिलं कुण्डं वा विधाय ब्राह्मणद्वारा अग्निप्रणयनादिकं कुर्यात्। दिग्रक्षणं पञ्चगव्यादिकं कृत्वा कुण्डपूजनम्, अग्निस्थापनं, ग्रहस्थापनं, पूजनं, कुशकण्डिकां च कुर्यात्।

- आधाराज्यमागहोमं कृत्वा बलवर्धननामानम् अग्निं संपूज्य द्रव्योत्सर्गं कुर्यात्। वराहुतिं दत्त्वा, ग्रहहोमं यथाविधि कुर्यात्। तदनु प्रधानहोमः कार्यः।

**प्रथमं कालः**

पायस-तिल-समित् अथवा यव - आज्यादिद्रव्यैः प्रतिद्रव्यं चत्वारो विप्राः होमं कुर्युः।

यथा -

- **ॐ कार्षिरसि समुद्रस्य त्त्वा क्षित्याऽउन्नयामि। समापोऽअद्भिरग्मत समोषधीमिरोषधीः॥ 6/8॥** स्वाहा॥ अथवा नाममन्त्रेण ॐ कालाय स्वाहा इति। वैदिकपौराणिकमन्त्रेण वा नाममन्त्रेण यथासमयम् अष्टोत्तरशताहुतीः जुहुयात्। प्रधानहोमः अपि पूर्ववत् कर्तव्यः यथा - **ॐ नमोस्तु सर्पेभ्यो०** इति मन्त्रेण वा पौराणिकमन्त्रेण वा नाममन्त्रेण यथा - ॐ अनन्ताय स्वाहा। अष्टोत्तरशताहुतीः जुहुयात्। एवमेव राहु-केत्वोः 28 आहुतयो देवाः। तदनन्तरं चत्वारो विप्राः हवनीयद्रव्यैः वासुक्यादि-तक्षकान्तानां प्रत्येकं अष्टाभिः आहुतिभिः होमः

यथा -

ॐ वासुकये स्वाहा। ॐ शेषाय स्वाहा। ॐ पद्मनाभाय स्वाहा। ॐ कम्बलाय स्वाहा। ॐ शंखपालाय स्वाहा। ॐ कर्कोटकाय स्वाहा। ॐ कालियाय स्वाहा। ॐ तक्षकाय स्वाहा। तदनन्तरम् असिताङ्गादिभैरवानाम् अष्टाभिराहुतिभिः होमः यथा

ॐ असितांगभैरवाय स्वाहा। ॐ रुरुभैरवाय स्वाहा। ॐ चण्डभैरवाय स्वाहा। ॐ क्रोधभैरवाय स्वाहा। ॐ उन्मत्तभैरवाय स्वाहा। ॐ कपालभैरवाय स्वाहा। ॐ भीषणभैरवाय स्वाहा। ॐ संहारभैरवाय स्वाहा। इति होमं विधाय स्थापितदेवतानां होमः कार्यः। तत्र पीठदेवतानां होमं कृत्वा 108 संख्यया व्याहृतिहोमः। ततो नवग्रहफलहोमः। गुग्गुलसर्षप-लक्ष्मीहोमाः। अनन्तरं -

**पूजा स्विष्टं नवाहुत्यो बलिः पूर्णाहुतिस्तथा। श्रेयः सम्पाद्यदानं च अभिषेको विसर्जनम्॥**

● **अभिषेक:**

आचार्य: नवनागकलशोदकं, रुद्रकलशोदकं, तथा वनस्पतिपत्र-चर्म-काषायोदकं तीर्थोदकं च एकस्मिन् पात्रे एकीकृत्य उत्तराभिमुखं सवालं यजमानम् उत्तराभिमुखाः विप्राः शिक्यादौ शतछिद्रं कुम्भं, शूर्पं वा अन्तर्धाय वैदिक-पौराणिकमन्त्रैः अभिषिञ्चेयुः।

यथा -

● पयः पृथिव्याम् ०। पञ्चनद्यः ० आपो हि ष्ठा ०। तत्त्वायामि ०। मानस्तोके ०। पवित्रेस्थो ०। आपोऽस्मान् ०। पुनन्तु मा देवजनाः ०। द्यौः शान्तिः ०।

● **पौराणिक मन्त्राः**

योऽसौ वज्रधरो देवो महेन्द्रो गजवाहनः। सर्पजातं शिशोर्दोषं मातापित्रोर्व्यपोहतु॥

योऽसौ शक्तिधरो देवो हुतभुङ्मेषवाहनः। सप्तजिह्वश्च देवाग्निः सर्पदोषं व्यपोहतु॥

योऽसौ दण्डधरो देवो धर्मो महिषवाहनः। सर्पजातं शिशोर्दोषं व्यपोहतु यमो यमः॥

योऽसौ खड्गधरो देवो निर्ऋतो राक्षसाधिपः। प्रशामयतु सार्पोत्थं दोषं सर्पसमुद्भवम्॥

योऽसौ पाशधरो देवो वरुणश्च जलेश्वरः। नक्रवाहः प्रचेतानो सर्पदोषं व्यपोहतु॥

योऽसौ देवो जगत्प्राणो मारुतो मृगवाहनः। प्रशामयतु सार्पोत्थं दोपं जातस्य शान्तिदः॥

योऽसौ निधिपतिर्देवः खड्गभृद् वजिवाहनः। मातापित्रोः शिशोश्चैव सर्पदोषं व्यपोहतु॥

योऽसौ पशुपतिर्देवः पिनाकी वृषवाहनः। कालसर्पसमुद्भतं दोषमाशु वयपोहतु॥

विघ्नेशः क्षेत्रपो दुर्गा लोकपाला नवग्रहाः। सर्पदोषप्रशमनं सर्वे कुर्वन्तु शान्तिदाः॥

कालसर्पजदोषस्य पाता पित्रोर्जनस्य च। भ्रातृ-ज्ञाति-कुलोत्थानां सर्वे कुर्वन्तु शान्तिदाः॥

● अभिषेकानन्तरं शुद्धजलेन स्नात्वा शुद्धवस्त्राणि परिधाय स्वासने उपविश्य कुंकुमतिलकं कुर्यात्। कांस्यपात्रे घृतं प्रपूर्य आज्ये पुत्रपत्न्योः मुखच्छायां पश्येत्। छायापात्रं कस्मैचिद् विप्राय सदक्षिणं दद्यात्। विप्रेभ्यो दक्षिणां दत्त्वा आशीर्ग्रहणं कुर्यात्। आवाहितदेवतानां च विसर्जनं कुर्यात्। इति कालसर्पयोगविधानम्।

## स्वाध्यायः

**१. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यं चित्वारिक्तस्थान पूर्ति कार्या।**

(१) अस्माकं संस्कृतिः ......... वर्तते। (उत्कृष्टा, मध्यमा, आप्लुता)

(२) पुण्यफलं ......... अस्ति। (जीवनम्, सुखम्, वैराग्यम्)

(३) ज्योतिषं ......... स्मृतम्। (नयनम्, मुखम्, चरणम्)

(४) अस्य योगस्य ......... अपरा संज्ञा। (राजयोग, नागदोष, सन्तानयोग)

(५) अस्य ......... प्रकरणे गणना गणिता। (पञ्च, द्वादश, नव)

(६) जपार्थं ......... मन्दिराणि उत्तमम् स्थलम्। (बुघ, बौध, शिव)

(७) ......... नक्षत्र दिने कालसर्पयोगस्य पूजा भवति। (अश्विनी, रोहिणी, आश्लेषा)

(८) श्रीकामः शांतिकामो वा ......... यज्ञं समाचरेत्। (इन्द्रयज्ञम्, देवयज्ञम्, ग्रहयज्ञम्)

(९) दक्षिणस्यां दिशि ......... पुरुषम् आवाहयेत्। (कालपुरुषम्, देवपुरुषम्, राजपुरुषम्)

(१०) विघ्नेशः क्षेत्रपो ......... लोकापालाः नवग्रहाः। (दुर्गा, तनुजा, भव्या)

२. **निर्देशानुसारम् उत्तराणि लिखत।**

**( क ) द्वित्रवाक्यैः उत्तराणि लिखत।**

(१) प्रधानदेवतास्थापनम्

(२) पूजने विशेषः

(३) वेदानां षडङ्गानि

(४) महापुरुषयोगः

**( ख ) टिप्पणी लेख्या।**

(१) अस्य योगस्य लक्षणानि

(२) अस्य परिकल्पना

(३) अस्य सङ्कल्पः

**( ग ) सविस्तरतम् उत्तरत।**

(१) अभिषेकाय पौराणिकश्लोकः

(२) नवनागनामानि स्थापनम् च

**( घ ) मन्त्रपूर्ति कार्या**

(१) कयानश्चित्र.........

(२) मनोजूति.........

**( च ) श्लोकपूर्ति कार्या**

(१) अग्रेराहुरधः..........

(२) ब्रह्मलोके.........

**प्रवृत्तिः ( १ )**

**प्रायोगिकम्**

- छत्राःकालसर्पयोगप्रकाराणामन्वेषणं कुर्वन्तु।
- कालसर्पयोगस्य शान्तिविधानं कण्ठस्थीकुर्युः।

**अध्यापकप्रवृत्तिः**

- अध्यापकः छात्रान् कालसर्पयोगस्य मूलमवगमयेत्, तस्य च फलकथनमपि ज्ञापयेन्।

# २१ अर्कविवाहप्रयोगः

**प्रस्तावना-**

''**सुखाय कर्माणि करोति लोकः**'' मानव सुखाय प्रयतते तथापि कदाचित् जीवने दुःखमेव प्राप्यते तत्र कारणं भाग्यमेव स्यात्, कर्मणां सिद्धिरसिद्धिर्वा दैवाधिनेति व्यवह्रियते, प्राक्कृतकर्मफलपरिपाको नियतोऽतो नियतिरिति च दैवस्य नामान्तरं भवति, सुरासुरकृतसमुद्रमन्थने समेऽपि भागे प्राप्तव्ये हरिर्लक्ष्मीं लेभे हरस्तु हालाहलमेव, उक्तं च -

दैवं फलति सर्वत्र न च विद्या न च पौरुषम्।
समुद्रमथनाल्लेभे हरिर्लक्ष्मीं हरो विषम्॥

''**सुभाषितम्**''

तादृशं दैवस्य प्राबल्यं तथापि योग्यश्रद्धा-विश्वासेन कृतं विधानं किञ्चत् सारल्यं ददाति।

अस्मिन् संसारे षड्-विधानि सुखानि सन्ति

अर्थागमो नित्यमरोगिता च
प्रिया च भार्या प्रियवादिनी च।
वश्यश्च पुत्रोऽर्थकरी च विद्या
षड् जीवलोकस्य सुखानि राजन्॥

''**महाभारतम्**''

यस्य पुरुष-जातकस्य जन्मकुण्डल्यां मंगलो-वा पापग्रहाः स्युः किन्तु स्त्री - जातकस्य जन्मकुण्डल्यां पापग्रहाः न सन्ति तदा पुरुषजातककृते द्विपत्नियोगः निवृत्त्यर्थं ज्योतिर्विद्भिः ''**अर्कविवाहः**'' विधानं निर्दिष्टमस्ति।

तृतीया मानुषी कन्या नोद्वाह्या म्रियते हि सा।
विधवा वा भवेत्तस्मातृतीयेऽर्कं समुद्वहेत॥

''**धर्मसिन्धु**''

चतुर्थादिविवाहार्थं तृतीयेऽर्कं समुद्वहेत्।
आदित्यस्य दिवसे वापि हस्तर्क्षे वा शनैश्चरे॥

''**ब्र. नि. कर्म**''

अतः जनानां सुखाय अस्मिन् प्रकरणे ......... अर्कविवाहप्रयोगः निरूप्यते।

**पूर्वसज्जता**

वरो विवाहसम्भारान्गृहित्वा स्वकीयतृतीयविवाहात्प्राक् दिनचतुष्टयाधिकन्यवहिते हस्तनक्षत्रयुते शुभे शनिवासरे रविवासरे वा ग्रामद्बहिः प्राच्यामुदीच्यां वा पुष्पफलाद्यैर्युतम् अर्कं सम्पाद्य तत्र गत्वा तस्य समीपे स्थण्डिलं कृत्वा तस्य पश्चिमतः पूर्वाभिमुखम् उपविश्य।




- **आचमनं, प्राणायामं पवित्रिधारणञ्च कृत्वा प्रधानसङ्कल्पं कुर्यात्।**

- **सङ्ल्प - ॐ विष्णुर्विष्णुर्विष्णु: श्रीमद् भगवतो.... इत्यादि पठित्वा एवं ग्रहगुणविशेषेण विशिष्टायां शुभपुण्यतिथौ श्रुतिस्मृति पुराणोक्त फलप्राप्ति पूर्वकं मम जन्मकुण्डल्यां विधुरादि सकलदोष निवारणार्थं मम तृतीयमानुषीविवाहजन्यदोषनिवृत्त्यर्थं श्रीपरमेश्वरप्रीतये तृतीयमर्कविवाहमहं करिष्ये।**
- **पुनर्जलं गृहीत्वा** - तत्रादौ निर्विघ्नतासिद्धये गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्धारापूजनम् आचाराद्वैश्वदेव सङ्कल्पं नान्दीश्राद्धम् आचार्याद्यृत्विग्वरणञ्च करिष्ये।

इति दिग्रक्षणं कलशार्चनं गणपतिपूजनाद्याचार्यवरणान्तं च कर्म कृत्वा आचार्यं प्रार्थयेत्।

(आचार्यद्वयम्॥ कर्मार्थं स्वकुलाचार्यमपरकन्यादानार्थं च)

कन्यापिता यथा सूर्यो देवानाञ्च प्रजापतिः।
तथा त्वमर्कदानार्थमाचार्यत्वं कुरु प्रभो॥

एवं संप्रार्थित आचार्यस्ततो वरस्य मधुपर्केणार्चनं कुर्यात्। (विष्टरं, पाद्यम्, अर्घम्, आचमनं, मधुपर्कप्राशनं कृत्वा पुनः आचमनम्।)

**ततो वरः अर्कस्य समीपे स्थित्वा अर्कं प्रार्थयेत्।**

''त्रिलोकवासिन् सप्ताश्व छायया सहितो रवे।
तृतीयोद्वाहजं दोषं निवारय सुखं कुरु।''

ततो वरः अर्कवृक्षे ॐ **आकृष्णेन०** इति मंत्रेण छायया सहितं सूर्यम् आवाह्य प्रतिष्ठापयेत्। ॐ ''**भूर्भुवः स्वः छायासहिताय श्रीसूर्याय नमः।**'' इति मंत्रेण षोडशोपचारैः पूजनं कुर्यात्। तत्र गुड- ओदनं नैवेद्य दक्षिणां दत्वा आरार्तिक्यं कृत्वा अनेन पूजनेन छायासहितः श्रीसूर्यः प्रीयतां न मम।

एवं संपूज्य ततोऽर्कं वस्त्रेण सूत्रेण च आवेष्टय ''ॐ आपोहिष्टा ०'' इति मंत्रेण अर्कं जलैरभिषिच्य वरोऽर्कस्य प्रदिक्षिणां कुर्यात्।

''अर्कप्रीतिकरा येयं त्वया सृष्टा पुरातनी।
अर्कजा ब्रह्मणा सृष्टा ह्यस्माकं परिरक्षतु॥ १॥
नमस्ते मङ्गले देवि नमः सवितुरात्मजे।
त्राहि मां कृपया देवि पत्नी त्वं म इहागता॥ २॥''

इति प्रदक्षिणां कृत्वा वरोऽर्कं प्रार्थयेत्-

''अर्कस्त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च।
वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्धनः।
तृतीयोद्वाहजं मृत्युं त्वं मे भो सुविनाशय॥''

- तदनन्तरम् आचार्यः अर्कस्य वरस्य च मध्येऽन्तर्पटं धृत्वा मङ्गलाष्टकं पठेत्। तदननतरम् अन्तरपटं निःसार्यार्कस्योपरि अक्षतान् दद्यात्।
- ततो आचार्यो हस्ते जलं गृहीत्वा देशकालौ सङ्कीर्त्य एवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ अस्य वरस्य तृतीयोद्वाहजनितसर्वारिष्टविनाशार्थं तथा च श्रीसवितृसूर्यनारायणप्रीतये (ब्रह्मविवाहविधिना) अर्कविवाहविधिना अर्कविवाहं करिष्ये॥
- वरस्य हस्ते सुप्रोक्षितादिकं दद्यात्।

''शिवा आपः सन्तु। सन्तु ते शिवाः आपः॥ सौमनस्यमस्तु। अस्तु सौमनस्यम्॥ अक्षतं चारिष्टञ्चास्तु

अस्त्वक्षतमरिष्टञ्च॥ गन्धाः पान्तु सौमङ्गल्यं चास्तु॥ अक्षाताः पान्तु आयुष्यमस्तु॥ पुष्पाणि पान्तु सौश्रियमस्तु॥'' तृतीयोद्वाहजन्य दोषपरिहारोऽस्तु॥

- **ततो वरस्य गोत्रोच्चारपूर्वकदानसङ्कल्प** -
- ''अमुकगोत्रस्य अमुकप्रवरान्वितस्य अमुकवेदशाखाध्यायिनः अमुकनाम्ने **प्रपौत्राय।**

अमुकगोत्रस्य अमुकप्रवरान्वितस्य अमुकवेदशाखाध्यायिनः अमुकनाम्ने **पौत्राय।**

अमुकगोत्रस्य अमुकप्रवरान्वितस्य अमुकवेदशाखाध्यायिनः अमुकनाम्ने **पुत्राय।** अमुकानाम्रे **वराय** - काश्यपगोत्रस्य काश्यपवत्सारनैध्रुवेतित्रिप्रवरान्वितस्य आदित्यस्य **प्रपौत्रीम्।** सवितुः **पौत्रीम्।** सूर्यस्य **पुत्रीम्।** आर्कीनाम्रीं कन्यां सूर्यदेवत्यां भार्यात्वेन तुभ्यमहं संप्रददे॥ इति वरहस्ते सकुशं जलं दद्यात्। तथा च -''

''अर्ककन्यामिमां विप्र यथाशक्तिविभूषिताम्।
गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय॥'' इति दानमन्त्रं पठेत्॥

- **पुनर्जलमादाय** - कृतास्यार्कदानकर्मणः साङ्गतासिद्ध्यर्थम् इमां दक्षिणां तुम्ययमहं सम्प्रददे। इति दक्षिणां दद्यात्। वरः ''**ॐ स्वस्ति**'' इति ब्रूयात्॥

ततो वरः अर्कवृक्षस्योपरि गन्धाक्षतपुष्पसमन्वितजलाञ्जलीन् दद्यात्-यथा मन्त्रः -

- ॐ यज्ञो मे कामः समृद्ध्यताम्। ॐ धर्मो मे कामः समृद्ध्यताम्। ॐ यशो मे कामः समृद्ध्यताम्। इति जलाञ्जलिदानम् दानम्।

''ॐ परित्वा'' इति मन्त्रेण च पञ्चवृता सूत्रेणार्कमावेष्टयेत्। पुनः पञ्चगुणेन सूत्रेण अर्कस्य दक्षिणस्कन्धं ''बृहत्साम ० इति मन्त्रेण ''ॐ यदाबघ्नन् ०'' इति मन्त्रेण च रक्षार्थं बघ्नीयात्॥

यथा - ''बृहत्सामनक्षत्रमद्गृद्धवृष्ण्यं त्रिष्टुभौजशुभितमुग्रवीरम्।
इन्द्रस्तोमेन पञ्चदशेन मध्यमिदं वातनु सगरेण रक्ष॥'' ''ॐ यदाबघ्ननन् ०''

- ततो अर्कस्य दिक्षु विदिक्षु च अष्टौ कुम्भान् संस्थाप्य वस्त्रेण त्रिसूत्रेणा चावेष्ट्य हरिद्रागन्धादीन् कुम्भे क्षिप्त्वा तेषु कुम्भेषु ''**ॐ विष्णवे नमः**''इति नाममंत्रेण महाविष्णुम् आवाह्य षोडशोपचारैः पूजयेत्॥

ततो स्थण्डिले पञ्चभूसंस्कारपूर्वकम् आचार्यद्वाराऽअग्निस्थापनं कृत्वा ब्राह्मणाञ्च वृत्वा प्रोक्षण्याः प्रत्युत्पवनान्तं विधाय उपयमनकुशानादाय ''**तिष्ठन् समिधोऽभ्याधाय**'' इत्यारभ्य पर्युक्षणान्तं कृत्वाऽऽघारवाज्यभागौ जुहुयात्
(मनसा) ''ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम।
ॐ इन्द्राय स्वाहा इदं इन्द्राय न मम।
ॐ अग्नये स्वाहा इदं अग्नये न मम।''
ॐ सोमाय स्वाहा इदं सोमाय न मम।'' एवमाघारवाज्यभागौ हुत्वा **ॐ सङ्गोभिः।**

इति मंत्रेण होमं कुर्यात्।

ॐ सङ्गोभिराङ्गिरसो नक्षमाणोभगऽइवेदर्यमणं निनाय। जनेमित्रोनदम्पतीऽअनक्ति वृहस्पते-वाजयाशूँरिवाजौ स्वाहा॥ **इदं बृहस्पतये न मम॥ १॥**

ॐ यस्मै त्वा कामकामाय वयं सम्राड्-यजामहे।
तामस्मभ्यं कामं दत्वा यथेयं घृतं पिब स्वाहा॥ **इदमग्नये न मम॥ २॥**

- ततो व्यस्तसमस्त व्याहृतिभिरष्टोत्तरशतम् अष्टाविंशतिरष्टौ वा होमः। ॐ भूः स्वाहा इदमग्नये०। ॐ भुवः स्वाहा इदं वायवे ०। ॐ स्वः स्वाहा इदं सूर्याय ० ॐ भूर्भुवः स्वः स्वाहा इदं प्रजायतये० इति हुत्वा ततो भूराद्या स्विष्टकृदन्ता दशाहुतयः। ततः संस्रवप्राशनादि प्रणीताविमोकान्तं सर्वं कुर्यात्।

ततो वरः अर्कं प्रदक्षिणीकृत्य प्रार्थयेत्॥

''मया कृतमिदं कर्म स्थावरेषु जरायुणा। अर्कापत्यानि नो देहि तत् सर्वं क्षन्तुमर्हसि॥''

- ततो आचार्यः ''**ॐ ऋचं वाचम्**'' इति शान्त्यध्यायं जपेत्। ततो वर आचार्याय गोयुग्म वा तन्मूल्यं दद्यात्। यथाकालेऽष्टौ ब्राह्मणान् भोजयिष्ये इति भोजनसंकल्पं कृत्वा अन्येभ्यो ब्राह्मणेभ्यो भूयसीम् आचार्याय च दक्षिणां सर्वोपस्करं च दद्यात्॥ ततो वरो गणेशं कुम्भस्थितं महाविष्णुम् अग्निञ्च विसृज्य।

जलं गृहीत्वा - अनेन यथाज्ञानेन कृतेनार्कविवाहकर्मणा श्रीपरमेश्वरस्वरूपी श्रीसूर्यनारायणः प्रीयताम्।

- अनेन कर्मणा तृतीयमानुषीविवाहजन्यदोषपरिहारोऽस्तु॥

**पुनर्विष्णुं प्रार्थयेत्॥ ॐ विष्णवे नमः॥ ॐ विष्णवे नमः॥ ॐ विष्णवे नमः॥ इति आर्कविवाहः॥**

## स्वाध्यायः

**१. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यं चित्वा रिक्तस्थानपूर्तिं कार्या।**

(१) सुखाय ......... करोति लोकः। (कर्माणि, भवनानि, दानानि)
(२) कर्मफलं ......... व्यवह्रियते। (मानवाधीनम्, कालाधीनम्, दैवाधीनम्)
(३) हरिर्लक्ष्मी लेभे ......... हालाहलम्। (पुरुषस्तु, हरस्तु, जीवस्तु)
(४) पुरुषजातककृते ......... अर्कविवाहविधानं निर्दिष्टम्। (पौराणिकैः, ज्योतिर्विद्भिः, रसज्ञैः)
(५) ......... अर्कं समुद्वहते। (तृतीये, प्रथमं, चतुर्थे)
(६) ......... नक्षत्रयुते शनिवासरे अर्कविवाह भवति। (मूल, हस्त, मघा)
(७) छायासहिताय ......... नमः। (अघोराय, विष्णवे, सूर्याय)
(८) शिवा ......... सन्तु। (आपः, मेघाः, पर्वताः)
(९) प्रथमं ......... गोत्रोच्चारः। (कन्यायाः, वरस्य, उभयोः)
(१०) तृतीया ......... कन्या नोद्वाह्या म्रियते हि सा। (मानुषी, देव, गन्धर्व)

**२. निर्देशानुसारम् उत्तराणि लिखत।**

**(क) दित्रवाक्यैः उत्तराणि लिखत।**

(१) द्विपत्नीयोगः
(२) आचार्य प्रार्थना
(३) मधुपर्कार्चनम्
(४) पञ्चभूसंस्काराः

**(ख) टिप्पणी लेख्या।**

(१) भाग्यं फलति सर्वत्र।
(२) अर्क प्रार्थना।

**(ग) श्लोकपूर्तिं कार्या**

(१) अर्थागमो..........
(२) अर्ककन्यामिमां.........
(३) चतुर्थ्यादि.........

**(घ) मन्त्रपूर्तिं कार्या**

(१) आकृष्णेन..........
(२) आपोहिष्ठा..........
(३) यज्ञो मे कामः..........

**छात्रप्रवृतिः**

- छात्राः अर्कविवाहस्य अर्किसूर्ययोः पौराणिकं महत्वं संशोधयेयुः।

**अध्यापकप्रवृत्तिः**

- अध्यापकः छात्रान् अर्कविवाहे सूर्यमहत्त्वं ज्ञापयतु।

●●●